श्रीः

# परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षात्मकं सम्पादनम्

## THE DOṢODDHĀRA –
## A COMMENTARY ON PARIBHĀṢENDUŚEKHARA
## A CRITICAL EDITION

पाण्डिच्चेरी विश्वविद्यालयस्य पी.एच्.डी. इत्युपाधिप्राप्तये प्रस्तुतोऽयं

शोधप्रबन्धः

**Thesis** submitted to Pondicherry University in

Partial fulfillment for the Degree of Doctor of Philosophy in Sanskrit


मार्गनिर्देशकः/ **Supervisor**

डा. का.इ.धरणीधरः

**Dr. K.E.Dharaneedharan**

शोधप्रबन्धकर्ता / **Researcher**

दिलीप कुमार दासः

**Dillip Kumar Das**

संस्कृतविभागः

**DEPARTMENT OF SANSKRIT**

पाण्डिच्चेरी विश्वविद्यालयः

**PONDICHERRY UNIVERSITY**

पुदुच्चेरी / **PUDUCHERRY – 605014**


**APRIL – 2011**

# पाण्डिच्चेरी विश्वविद्यालयः

## मानविकसंकायः

## संस्कृतविभागः

*डॉ० का.इ. धरणीधरः* — *Dr.K.E.DHARANEEDHARAN*

*प्रवाचकः मार्गदर्शकश्च* — *ASSOCIATE PROFESSOR & SUPERVISOR*


## प्रमाणपत्रम्

*“**परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षात्मकं सम्पादनम्**” इति शीर्षकाङ्कितोऽयं शोधप्रबन्धः **श्री दिलीप कुमार दास** इत्यभिधेन छात्रेण मदीयमार्गदर्शने यथाविधि रचितः। अत्र अपेक्षिता सर्वापि सामग्री शोधप्रबन्धकर्त्रा स्वयमेव संकल्पिता संकलिता च। शोधप्रबन्धोऽयं पाण्डिच्चेरीविश्वविद्यालयस्य पी-एच्.डी. इत्युपाधये निर्दिष्टसमये यथाविधि सज्जीकृतस्सन् समर्प्यते इति प्रमाणीक्रियते। एवं शोधप्रबन्धोऽयं न कस्मिन्नपि विश्वविद्यालये कस्यामपि संस्थायां वा कस्मैचिदपि उपाधये समर्पितपूर्वः इति च प्रमाणीक्रियते।*

## CERTIFICATE

*This is to certify that the thesis entitled “**THE DO ODDHĀRA- ENDUŚEKHARA) - A CRITICAL EDITION**” submitted to the Pondicherry University in partial fulfillment of the requirements for the award of the Degree of Doctor of Philosophy in Sanskrit, is a record of research work done by Sri **DILLIP KUMAR DAS,** during the period of his study in the Department of Sanskrit, Pondicherry University, under my supervision and guidance. It has not formed the basis for the award of any Degree/Diploma/Associateship or other similar title of any other University.*

*Place: Puducherry* — ***(का.इ. धरणीधरः)***

*Date: 01-04-2011* — *( K.E.DHARANEEDHARAN )*

# पाण्डिच्चेरी विश्वविद्यालयः

## मानविकसंकायः

## संस्कृतविभागः

*दिलीप कुमार दासः* **DILLIP KUMAR DAS**

*अनुसन्धाता* *RESEARCHER*

## प्रतिज्ञापत्रम्

*इदमहं प्रतिजाने यत् पाण्डिच्चेरी विश्वविद्यालयस्य संस्कृतविभागे पी-एच्.डी. इत्युपाधिप्राप्तये समर्प्यमाणः* ***"परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षात्मकं सम्पादनम्"*** *इति शीर्षकाङ्कितोऽयं शोधप्रबन्धः* ***श्री दिलीप कुमार दास इत्यभिधेन*** *छात्रेण मयैव निर्मितः। अत्र अपेक्षिता सामग्री सर्वापि स्वयमेव संकल्पिता संकलिता च। अयं शोधप्रबन्धः कस्मिन्नपि विश्वविद्यालये कस्यामपि संस्थायां वा कस्मैचिदपि उपाधये न समर्पितपूर्वः। अयं पाण्डिच्चेरी विश्वविद्यालये पी-एच्.डी. इत्युपाधये निर्दिष्टसमये यथाविधि सज्जीकृतस्सन् समर्प्यते मया।*

## DECLARATION

*I hereby declare that the thesis entitled "**THE DO ODDHĀRA- ENDUŚEKHARA) -A CRITICAL EDITION"** submitted to the Pondicherry University in partial fulfillment of the requirements for the award of the **Degree of** Doctor of **Philosophy** in Sanskrit is a record of original research work done by me, under the supervision and guidance of **Dr.K.E.Dharaneedharan,** Associate Professor, Department of Sanskrit, Pondicherry University, Puducherry. The content embodied in this thesis has not been submitted in part or in full for the award of any other Degree/Diploma/Associateship or other similar title in any other University.*

*Place: Puducherry* *(दिलीप कुमार दासः)*

*Date: 01-04-2011* ***( DILLIP KUMAR DAS)***

# ॥ॐ ॥ मङ्गलाचरणम् ॥ॐ ॥

**॥ॐ नमः श्री गणेश शारदा गुरुभ्यो नमः ॥**

**॥ॐ नमः श्री शब्दब्रह्मात्मने  श्री नटराजराजाय नमः ॥**

**॥ॐ नमः शब्दविद्यासंप्रदायकर्तृभ्यो नमो महद्भ्यो नमो गुरुभ्यः ॥**

येनाक्षरसमाम्नायम्  अधिगम्य महेश्वरात् ।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।

पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ २ ॥

# संकेताक्षरविवरणम्

| | | |
|---|---|---|
| तै.संहिता. | - | तैत्तिरीय संहिता |
| न्या. सू | - | न्यायसूत्रम् |
| परि. | - | परिभाषेन्दुशेखरः |
| पा. शि. | - | पाणिनीय शिक्षा |
| ब्र. सू | - | ब्रह्मसूत्रम् |
| मनु | - | मनुस्मृतिः |
| मी.सू | - | मीमांसा सूत्रम् |
| वा.रा.उ.का. | - | वाल्मिकीरामायण उत्तर काण्डः |
| वै.सि.ल.म. | - | वैयाकरणसिद्धान्तलघुमंजूषा |
| श.क. | - | शब्दकल्पद्रूमः |
| सं.व्या.शा.इ. | - | संस्कृत व्याकरण शास्त्र का इतिहास |
| सि.कौ. | - | सिद्धान्तकौमुदी |

F1 - French Institute, Pondicherry
Substance - Paper
Script- Devanagari.

G1 - Govt.Oriental Manuscript Library,
University Of Madras
Substance - Paper
Script- Grantha.

G2 - Govt.Oriental Manuscript Library,
University Of Madras
Substance - Palm Leaf
Script- Grantha.

# परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य

# पाठसमीक्षात्मकं सम्पादनम्


**भूमिका** **I - X**

**प्रथमोऽध्यायः** **1 - 32**

- संस्कृतव्याकरणशास्त्रस्य वैशिष्ट्यम्
- व्याकरणशास्त्रस्य प्रयोजनम्
- आधुनिककाले संस्कृतव्याकरणशास्त्रस्य प्रासङ्गिकता
- व्याकरणशब्दस्य निष्पत्तिः
- व्याकरणशास्त्रस्य वेदमूलकत्वम्
- संस्कृतव्याकरणशास्त्रस्य अतिप्राचीनता
- व्याकरणप्रभेदाः
- नवव्याकरणसंक्षिप्तपरिचयः
    - ऐन्द्रव्याकरणम्
    - चान्द्रव्याकरणम्
    - काशकृत्स्नव्याकरणम्
    - कौमारव्याकरणम्
    - शाकटायनव्याकरणम्
    - सारस्वतव्याकरणम्
    - आपिशलिव्याकरणम्
    - शाकल्यव्याकरणम्

❖ पाणिनीयव्याकरणम्

➢ पाणिनिसूत्राणां प्राशस्त्यम्
➢ स्थूलतया पाणिनीयस्वरूपम्
➢ पाणिनीयव्याकरणे मुनित्रयस्य प्रामाण्यम्
➢ अद्यतने काले प्रामाणिकेषु नागेशः
➢ नागेशपूर्ववर्तिपरिभाषाग्रन्थकर्तारः

❖ व्याडिः
❖ पुरुषोत्तमः
❖ सीरदेवः
❖ नीलकण्ठदीक्षितः
❖ श्री हरिभास्कर अग्नीहोत्री

➢ नागेशभट्टकृतग्रन्थाः

**द्वितीयोऽध्यायः** **33 - 72**

➢ सूत्रस्य स्वरूपम्
➢ सूत्रस्य षड्प्रकारः

❖ संज्ञासूत्रम्
❖ परिभाषासूत्रम्
❖ विधिसूत्रम्
❖ नियमसूत्रम्
❖ अतिदेशसूत्रम्
❖ अधिकारसूत्रम्

➢ परिभाषाशब्दस्य अर्थः

- परिभाषाणां भेदाः
- परिभाषाणां मूलम्
- प्राचीनानि परिभाषासूत्राणि
- परिभाषाणां कार्यम्
- परिभाषाणां लक्ष्यम्
- परिभाषेन्दुशेखरस्य वैशिष्ट्यम्
- परिभाषेन्दुशेखरस्य प्रकरणत्रयम्
- विद्यमानपरिभाषाग्रन्थेषु परिभाषन्दुशेखरस्य शेखरायमाणत्वम्
- परिभाषेन्दुशेखरव्याख्यानपरम्परा विमर्शः
- मन्नुदेवप्रणीतदोषोद्धारव्याख्यानस्य वैशिष्ट्यम्
- मन्नुदेवस्य परिचयः
- मन्नुदेवस्य वंशवृक्षः
- प्रकृतव्याख्यायाः मातृकाणां विवरणम्
- प्रकृतव्याख्यायाः सम्पादने समादृता रीतिः
- मातृकापरस्परसम्बधसूचकरेखाचित्रम्
- मातृकाणां छायाचित्राणि

## तृतीयोऽध्यायः 73 - 94

- मन्नुदेवेन समर्थितानां परिभाषाणां विवरणम्
- नागेशेन प्रतिपादिताः विद्यमानाः परिभाषाः
- व्याख्यानरहिताः परिभाषाः
- विमर्शनविषयरहिताः परिभाषाः

**चतुर्थोऽध्यायः** **95 - 225**

- परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षात्मकं सम्पादनम्
  - ❖ शास्त्रत्त्वसम्पादनोद्देश्यं नाम प्रथमं प्रकरणम्
  - ❖ बाधबीजं नाम द्वितीयं प्रकरणम्
  - ❖ शास्त्रशेषं नाम तृतीयं प्रकरणम्

**उपसंहारः** **226 - 229**

**अनुबन्धवर्गः** **230 - 261**

(1) शोधप्रबन्धे उपयुक्तानां सूत्राणां सूची

(2) शोधप्रबन्धे उपयुक्तानां वार्तिकानां सूची

(3) शोधप्रबन्धे उपयुक्तानां ग्रन्थानां सूची

# भूमिका

## प्राक् स्मरणम्

अमरवाण्यां संस्कृतभाषायां प्राचीनाकालादारभ्य अद्यावधि सहस्रशो ग्रन्थाः प्रकाशिताः प्रकाशयिष्यन्ते च। प्रकाशितग्रन्थवैशिष्ट्यं च अप्रकाशितानां ग्रन्थानां प्रकाशनं सम्पादनं च, अर्थात् तालपत्ररूपेण स्थितानां देशे विविधप्रान्तेषु तत्तत्प्रान्तीयभाषा-लिपिमध्ये लिखितानां मुद्रापितानां मौखिकरूपेण साम्प्रदायिकपण्डितानां सविधे स्थितानां ग्रन्थानां प्रकाशनं विश्वव्यापृतसंस्कृताभिमानानां प्रमोदाय, विश्वश्रेयसे चात्यन्ता-वश्कमित्यवगम्यते। अधुना शोधकार्यार्थं पाण्डुलिप्याः सम्पादनं प्रकाशनं च एकः प्रमुखविषयः। तालपत्रम्, मातृका, हस्तलेखः इत्यादि पाण्डुलिप्याः पर्यायवाचिशब्दाः। अस्या महत्त्वं प्राचीनकालादारभ्य अद्यतनकालपर्यन्तं संशोधनकार्ये परिलक्ष्यते। सम्प्रति अस्योपरि वैज्ञानिकप्रयोगाः परिदृश्यन्ते, ते अतीव प्रशंसनीयाः। पुनश्च ज्ञानप्रसारणार्थं विभिन्नपद्धतयः स्वीक्रियन्ते। सत्यज्ञानार्थं मूलतत्त्वस्य अनुसन्धानं नितान्तम् आवश्यकम्। आधुनिकयुगे भारतीयज्ञानपद्धत्यनुसारं हस्तलेखस्य अध्ययनं सम्पादनं च विशिष्टस्थानं प्राप्नोति। पुरातनग्रन्थे अपिहितज्ञानविज्ञानयोः प्रसारार्थं हस्तलेखस्य प्रकाशनं शोधकर्तृणां प्रमुखलक्ष्यम्। एतत् ज्ञात्वा पाण्डुलिपि सम्पादनं प्रकाशनं च निमित्तं मम मनसि जिज्ञासा जाता।

यदा मम पाण्डिच्चेरीविश्वविद्यालये "एम०ए संस्कृतम्" कक्ष्यायां प्रवेशो लब्धः, तस्मिन्नेव समये श्रीभट्टोजिदिक्षितकृतः सिद्धान्तकौमुद्यादि व्याकरणग्रन्थाध्ययनं जातम्। तस्मिन्नेव काले व्याकरणन्यायशास्त्रादि पठनार्थं बहुप्रयत्नः कृतः मया। यदा मया "एम्०फिल् संस्कृतम्" मध्ये प्रवेशो लब्धः, तस्मिन्नेव समये National manuscript mission परिचालिता मातृका सरंक्षणं विषयमधिकृत्य मया किञ्चित् श्रुतम्। तदनन्तरं French Institute - Pondicherry , Govt. oriental manuscript

library -Chennai, Indira Gandhi National centre for arts- New Delhi इत्यादि मातृकासंग्रहालयः गत्वा तत्र मातृकाणां सम्पादनं विषये अध्ययनं कृतं मया। तत्र देवनागरी, ग्रन्थः इत्यादि प्राचीनलिपीनां अध्ययननिमित्त प्रयासः कृतः मया। मया "एम०फिल् संस्कृतम्" मध्ये शिक्षाशास्त्रसम्बन्धः कालनिर्णयशिक्षायां कालनिर्णयटिकानाम्ना एका मातृका सम्पादनं अध्ययनं च कृतम्।

## शोधप्रबन्धस्य उद्देश्यम्

एतत् सुविदितमेव सर्वेषां संस्कृतज्ञानां कृतो यद् व्याकरणशास्त्रं सर्वेषु शास्त्रेषु प्राथम्यं भजते इति। प्रथमे विद्वांसो वैयाकरणाः, व्याकरणस्य मूलत्त्वात् सर्वविद्यानाम् इत्याभाणकम् इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्, इयं सा मोक्षमाणानामजिह्वा राजपद्धतिरिति काशिका [1] वा व्याकरणस्य प्राथम्यमुद्घोषयति। अनेकेषु व्याकरणेषु सत्स्वपि पाणिनीव्याकरणं सर्वत्र जगति अतिशेते। विश्लेषणात्मकरीत्या शब्दशास्त्रस्य अध्ययनाय प्रक्रियाग्रन्थानामावश्यकता सर्वैः सुरभारतीसमुपासकैः स्वीकृता वर्तते। सत्स्वपि बहुषु सटीकप्रक्रियाग्रन्थेषु नागोजीभट्टकृतो परिभाषेन्दुशेखरः सर्वग्रन्थशेखरायमाणः शेखरग्रन्थः प्रसिद्धोऽस्ति। परिभाषेन्दुशेखरस्य बहूनि व्याख्यानानि विद्वद्भिः विरचितानि। परन्तु नागेशभट्टस्य पाण्डित्यमसहमानाः केचन परिभाषेन्दुशेखरस्य बहूनि दूषणपराणि व्याख्यानानि कृतवन्तः। यतः मन्नुदेवः नागेशस्य साक्षात् शिष्यः गुरोः दूषणानि असहमानः तान् दूषणकण्टकान् उद्धर्तुं प्रयतमानः परिभाषेन्दुशेखरस्य दोषोद्धारव्याख्यानं कृतवान्। अत्र प्रायशः नागेशसिद्धान्तं ये खण्डितवन्तः, तान् सिद्धान्तान् सर्वान् संदूष्य पुनः नागेशस्य सिद्धान्तं प्रकाशितवान्। अस्याः व्याख्यायाः पठनेन नागेशस्य हृदयम्, वैयाकरणानाम् आशयाः, परिभाषाणां गूढार्थतत्त्वं च ज्ञातुं शक्यन्ते। परिभाषेन्दुशेखरग्रन्थस्य अनेकासु व्याख्यासु मन्नुदेवकृत दोषोद्धारः इति व्याख्यानस्य प्रकाशनं एतावत् पर्यन्तं न जातम्। अतः तस्याः व्याख्यायाः

---

[1] काशिका Vol-1

प्रकाशनेन वैयाकरणाः विद्वांसः लाभान्विताः भवेयुः इति शोधप्रबन्धनिमार्णरूपप्रयत्नः मया विधीयते।

## पूर्वशोधकार्यपरिशीलनम्

शोधविषयस्य स्वातन्त्र्यं विचिन्त्य अस्य पूर्वशोधकार्यपरिशीलनं मया कृतम्। परं तु कुत्रापि परिभाषेन्दुशेखरस्य दोषोद्धारव्याख्यानस्य सम्पादनं प्रकाशनं च मया न प्राप्तम्। परन्तु परिभाषेन्दुशेखरस्य अन्य व्याख्यायाः उपरि केचन शोधप्रबन्धाः वर्तन्ते। एवं परिभाषाशास्त्रोपरि केचन विशिष्टशोधप्रबन्धाः मया प्राप्ताः। अत्र परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षात्मकं सम्पादनमिति शोधप्रबन्ध-निर्माणे मम प्रयासः स्वतन्त्रः। परन्तु एतत् ग्रन्थसम्पादनार्थं पूर्वशोधकार्यपरिशीलनं निरीक्षणं च मया कृतम्। संस्कृत-हिन्दी-आङ्गलभाषासु यानि व्याख्यानानि उपलब्धानि तानि सर्वाणि सम्यक् अधीतः दोषोद्धारव्याख्यानस्य पाठसमीक्षात्मकसम्पादनकार्ये प्रयत्नः मया कृतः। इदनीं परिभाषेन्दुशेखरमधिकृत्य प्रस्तुतानां शोधविषयाणामाकलनमत्र प्रस्तूयते मया।

तद्यथा-

1. A Critical Edition of the Paribhasarthasangraha, D.Indira, Rastriya Sanskrit Vidyapeetha, 1978
2. A Critical Edition of Trisikha : A Commentary on the Paribhasendusekhara , T.G. Anantha Subramanyam, Rastriya Sanskrit Vidyapeetha, Tirupati 1982
3. A Critical study of Sarvamangala Commentary of Seshasharma on the Paribhasendusekhara, M.K.Kashinatha Upadhyaya, Rastriya Sanskrit Vidyapeetha, Tirupati, 1983
4. Paribhasendusekhara : A study, B.S.Ramakrishna Rao, Poona University, Pune, 1984

5. Paribhasa's in Sanskrit grammar : A Study , Sesha kumar A, Andhra University, 1991
6. Paribhasendusekharasya Haimavati tikayar Samiksatmakam adhyyanam, Babaji Charan Sahu, Puri Campus, RSKS Delhi, 1991
7. Bhagabattula harishastrivirachitayah vakyarthachandrikakhya Paribhasendusekharavyakhyah samikshatmakamadhyanam, G.S.V. Datatrayamurty, Rastriya Sanskrit Vidyapeetha, Tirupati, 2005
8. The Tripathaga : ( A commentary on Paribhasendusekhara) : A Critical Edition and Study, A. Rangarajan, Pondicherry University, 2011

## शोधप्रबन्धसम्पादने समादृता अनुसन्धानपद्धतिः

शोधकार्यारम्भे एव वयं कां रीतिं प्रविधिं वा अनुसृत्य इदमनुसन्धानं कुर्मः इति एकः मुख्यः विचारयोग्यविषयः। प्राच्यविद्या संशोधनक्षेत्रे विविधानुसन्धानप्रकाराः वर्तन्ते। तन्मध्येषु संकल्पनात्मकम्, अवधारणात्मकम्, योगदानात्मकम्, ग्रन्थसमीक्षात्मकम् इत्यादयः प्रमुखाः भेदाः परिलक्ष्यन्ते। पुनश्च विविधानुसन्धानपद्धतयः सन्ति। तेषु सर्वेक्षणपद्धतिः, शास्त्रियपद्धतिः, तुलनात्मकपद्धतिः, पाठानुसन्धानपद्धतिश्च मुख्यतया विराजन्ते। अत्र पाण्डुलिपि सम्पादनम् इति प्रबन्धनिर्माणरूपः प्रयत्नः क्रियते मया। शोधप्रबन्धेऽस्मिन् पाठानुसन्धानपद्धतिरीत्या यथाशक्ति यथामति प्रबन्धोऽयं सम्पाद्यते। अत्र पाठचयनं पाठसंशोधनं च इति प्रतिपाद्यविषयं स्वीकृत्य पाठानां परीक्षणं विधाय तेषु अन्यतमस्य अधिकृतस्य ग्रहणं पाठचयनं क्रियते ।

## शोधप्रबन्धस्य संक्षिप्तविवरणम्

अयं शोधप्रबन्धः पञ्चभिः अध्यायैः उपनिबद्धाः। प्रथमाध्याये व्याकरणशास्त्रस्य वैशिष्ट्यम्, व्याकरणशब्दस्य निष्पत्तिः, व्याकरणशास्त्रस्य वेदमूलकत्वम्, संस्कृतव्याकरणशास्त्रस्य अतिप्राचीनता पाणिनिसूत्राणां प्राशस्त्यम् , स्थूलतया पाणिनीयस्वरूपम् , पाणिनीयव्याकरणे मुनित्रयस्य प्रामाण्यम् , अद्यतने काले प्रामाणिकेषु नागेशः , नागेशपूर्वात् परिभाषाग्रन्थकर्तारः , नागेशभट्टकृतग्रन्थाः इत्यादि विषयाः विवेचयिष्यन्ते।

द्वितीयाध्याये सूत्रस्य लक्षणम्, सूत्रभेदाः, परिभाषाशब्दस्य अर्थः , परिभाषाणां भेदाः, परिभाषाणां मूलम्, प्राचीनानि परिभाषासूत्राणि, परिभाषाणां कार्यम्, परिभाषाणां लक्ष्यम्, परिभाषेन्दुशेखरस्य वैशिष्ट्यम्, परिभाषेन्दुशेखरस्य प्रकरणत्रयम्, विद्यमानपरिभाषाग्रन्थेषु परिभाषेन्दुशेखरस्य शेखरायमाणत्वम्, परिभाषेन्दुशेखरव्याख्यान-परम्परा विमर्शः, मन्नुदेवप्रणीतदोषोद्धारव्याख्यानस्य वैशिष्ट्यम्, मन्नुदेवस्य परिचयः, प्रकृतव्याख्यायाः मातृकाणां विवरणम्, प्रकृतव्याख्यायाः सम्पादने समादृता रीतिः इत्येते विषयाः प्रदर्शयिष्यन्ते।

तृतियाध्याये व्याख्यानरहिताः परिभाषाः, विमर्शनविषयरहिताः परिभाषाः, नागेशेन व्याख्याताः व्यवहारे विद्यमानपरिभाषाः, मन्नुदेवेन समर्थिताः परिभाषाः इत्यादिविषयाः निरूपयिष्यन्ते।

चतुर्थाध्याये परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षत्मकं सम्पादनं क्रियते।

उपसंहारात्मकेऽस्मिन् प्रकरणे पूर्वोक्ताध्यायेषु निरूपितानां विषयाणां सारः प्रकटयिष्यते।

एवं भूमिका, विषयसूची, इत्यादयोऽपि अनुसन्धानपद्धत्यनुसारमत्र निवेशिताः।

एवम् अनुबन्धवर्गे प्रकृतप्रबन्धे सममुपयुक्तानाम् अष्टाध्यायीसूत्राणां वार्तिकानां ग्रन्थानां च सूची निवेशयिष्यते।

# सविशेषस्मरणम्

अनन्तक्लेशसाध्येऽस्मिन् कर्मणि साफल्यप्राप्त्यर्थं बहुभिः बहुधा साहाय्यं विहितमिति बहूनामहं वस्तुतः अधमर्णोऽस्मि। अतः किञ्चिदपरं कर्तुमहमप्रभुरपि तदीयोपकारस्मरणाय कृतज्ञताज्ञापनं तु अवश्यं करोम्यहम्।

प्रप्रथमं भगवतः परमेश्वरस्य असीमया कृपया एतत् कार्यं सफलतां प्राप्नोतीति तमीश्वरं सततं नमामि। निवेदये च तं यदग्रेऽपि शैक्षणिकक्षेत्रे मम अप्रकम्प्यो विकासो भवेदिति। महदिदं कार्यं किमपि पाण्डित्यं विना न कर्तुं शक्यते। अतः महत्या कृपया प्रबन्धस्यास्य विषयचयनं कृत्वा तदनुकूलमक्षरशः ग्रन्थान् पाठयित्वा समुचितग्रन्थौपयिकान् विषयान् प्रदाय आद्यन्तं सम्यगवलोक्य आशीर्वचोभिः सह मामनुगृहीतवद्भ्यः मम गुरुवर्येभ्यः पाण्डिच्चेरी विश्वविद्यालयस्य संस्कृतविभागस्य प्रवाचकपदमलंकुर्वाणेभ्यः शिष्यवात्सल्यपरिपूर्णेभ्यः **डाँ. का. इ. धरणीधरन्** महोदयेभ्यः चरणकमलयोः श्रद्धया शिरोनतिप्रणामेन हार्दिकीं कृतज्ञतां साञ्जलिवद्धं नमोवाकं च समर्प्य आत्मानं कृतार्थयितुमिच्छामि।

अतः परमहं अद्वैतवेदान्तशास्त्रे वैदुष्यपूर्णेभ्यः विशिष्य शिष्यवत्सलेभ्यः सहृदयेभ्यः प्रवाचकपदमलंकुर्वाणेभ्यः विभागीयशोधसमितिसदस्येभ्यः **डाँ. जानकीराम कृष्णन्** वर्येभ्यः कार्तज्ञ्यं प्रकटयामि। अथ अहं तत्र तत्र कर्मणि प्रोत्साहनप्रदानेन अपेक्षितमार्गप्रदर्शनेन च साहाय्यं विदधद्भ्यः व्याकरणशास्त्रे वैदुष्यपूर्णेभ्यः स्मितपूर्वभाषिभ्यः सहृदयेभ्यः शोधप्रबन्धसमितीसदस्येभ्यः फ्रेन्च् इन्स्टीटुट् प्राच्यविद्याविभागस्य गवेषकपदमलंकुर्वाणेभ्यः **डाँ. श्रिष्टि लक्ष्मीनृसिंह**गुरुवर्येभ्यः कृतज्ञतां प्रकटयामि।

अतः परमहं साहित्यशास्त्रे वैदुष्यपूर्णेभ्यः विशिष्य शिष्यवत्सलेभ्यः सहृदयेभ्यः संस्कृतविभागाध्यक्षपदमलंकुर्वाणेभ्यः आचार्य पदमलंकुर्वाणेभ्यः श्रीमद्भ्यः **डाँ. सी. एस्. राधाकृष्णन्** वर्येभ्यः कार्तज्ञ्यं प्रकटयामि।

तथैव तदा तदा एतत्कर्मणि प्रोत्साहनप्रदानेन अपेक्षितमार्गप्रदर्शनेन च साहाय्यं विदधद्भ्यः संस्कृतविभागस्य प्रवाचकेभ्यः श्रीमद्भ्यः **डाँ. चक्रधरबेहेरा** वर्येभ्यः मम कृतज्ञतां प्रकटयामि। संस्कृतविभागस्य व्याख्यातृपदमलंकुर्वाणेभ्यः अस्मदभि वृद्धिकाङ्क्षापूर्णेभ्यः श्रीमद्भ्यः **डाँ सी. पालय्या** महोदयेभ्यः कृतज्ञतां निवेदयामि। संस्कृतविभागस्य व्याख्यातृपदमलंकुर्वाणेभ्यः सहृदयेभ्यः श्रीमद्भ्यः **श्री अनिलप्रताप गिरि** महोदयेभ्यः कृतज्ञतां प्रकटयामि।

तथैव एतत् विषये अध्ययनेषु उपकृतवद्भ्यः फ्रेन्च् इन्स्टीट्टुटस्थ प्राच्यविद्याविभागस्य अवसरप्राप्तव्याकरणाचार्येभ्यः श्रीमद्भ्यः **डाँ . वि. कृष्णामाचार्ये-** वर्येभ्यः कृतज्ञतां प्रकटयामि।

एवमेतत्कर्मणि महतीं प्रेरणां दत्त्वा सततम् आशीर्वचोभिः माम् अनुग्रहं कुर्वाणेभ्यः भवानिपाटणास्वयंशासितमहाविद्यालयस्य संस्कृतविभागस्य अध्यक्षवर्येभ्यः श्रीमद्भ्यः **डाँ. हरेकृष्णमेहेर**महोदयेभ्यः कृतज्ञतां आविष्करोमि। तथैव एतत् विषये अध्ययनेषु उपकृतवद्भ्यः भवानिपाटणास्वयंशासितमहाविद्यालयस्य संस्कृतविभागस्य प्रवक्तृपदमलं कुर्वाणेभ्यः श्रीमद्भ्यः **प्रह्लादलोचन भोई** वर्येभ्यः मम कृतज्ञतां आविष्करोमि।

कस्यापि प्रबन्धस्य निर्माणं ग्रन्थालयापेक्षां विना असम्भवीति सर्वविदितम्। अतः केचन ग्रन्थालयाः साम्प्रतं निर्देष्टव्या मया यत्र बहुविधं साहाय्यं यथावसरं मया प्राप्तम् - ते च-

१ आनन्दरङ्गपिल्लै ग्रन्थालयः, पाण्डिच्चेरी विश्वविद्यालयः

२ फ्रेन्च इन्स्टिटयुट्, पाण्डिच्चेरी

३ सर्वकार्यप्राच्यविद्यामातृकासंग्रहालयः, मद्रास्

४ संस्कृतविभागग्रन्थालयः,पुणे विद्यापीठः,पुणे

५ कुप्पुस्वामी शास्त्री रिसर्च इन्स्टिटयुट्, चेन्नै- ८

६ अड्यार् ग्रन्थालयः, चेन्नै - २०

७ पट्टाभिरामशास्त्रिग्रन्थालयः,राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति, आन्ध्रप्रदेशम्

८ श्री चन्द्रशेखरेन्द्रसरस्वती अन्तः राष्ट्रियग्रन्थालयः, एनाथुर्, काञ्चिपुरम्

९. केन्द्रीय ग्रन्थालयः, जवाहारलालनेहेरुविश्वविद्यालयः, नवदिल्लीः

१०.इन्दिरागान्धी स्मारकीग्रन्थालयः, हैदराबाद केन्द्रीय विश्वविद्यालयः, हैदराबाद

११. इन्दिरागान्धी जातीयकलाकेन्द्रः ग्रन्थालयः, नवदिल्लीः

१२. केन्द्रीय ग्रन्थालयः, सम्बलपुरविश्वविद्यालयः , सम्बलपुरम्

एतेषां ग्रन्थालयानामधिकारिगणेभ्यः कर्मचारिभ्यश्च कृतज्ञतां प्रकटयामि। एवमेतत्कर्मणि महतीं प्रेरणां दत्त्वा सततम् आशीर्वचोभिः माम् अनुग्रहं कुर्वाणाभ्याम् अस्मन्मातरपितृभ्याम् हार्दिकं साञ्जलिबद्धम् आधमर्ण्यं निवेदयामि।

एवमेतत्कर्मणि प्रमुखत्वेन प्रोत्साहकजनकत्वेन च सहाय्यं विदधद्भ्यो माहेस्थ राजीवगान्धी आयुर्वेद चिकित्सकलाशालायां प्रवक्तृ पदमलङ्कुर्वाणेभ्यः डाँ. देवव्रत पण्डा महोदयेभ्यः प्रणामाञ्जलिं समर्पयामि। अनुज अनिल् भ्राता, भगिनी मिल्ली, हेमन्त काका, विजय काका, आनन्द दादा, प्रमोद सार्, उज्ज्वल सार्, शिवकुमार सार्, सुरेन्द्रन् सार्, नरेन्द्रन सार्, रङ्गराजन् भ्राता, डाँ. देवीप्रसादमिश्रः, डाँ.अनिल कुमार आचार्यः, सुरेश्वरमेहेरः, निरंजनः, आवर्तः, मधुमिता, तनुजा, निवेदिता, प्रशान्तदासः, प्रशान्तः, जौर्तिमयबेहेरा, जौतिरंजन्, अक्षयकुमार प्रधान, विरव्रत, अन्ये च ये अत्यन्तं सहायं कृतवन्तः तेभ्यः सर्वेभ्यः मम अधमर्णतां समर्पयामि। मम सहपाठिभ्यः सहवासिभ्यः च, संस्कृतच्छात्रेभ्यः प्रत्यक्षतया परोक्षतया च शोधकार्येऽस्मिन् उपकृतवद्भ्यः सुहृज्जनेभ्यः परिवारसदस्येभ्यः सर्वेभ्यः धन्यवादान् समर्पयामि।

पाण्डिच्चेरी विश्वविद्यालयः इत्थम्

दिनाङ्कः ०१-०४-२०११ शोधप्रबन्धकर्त्रा

दिलीप कमार दासः

# प्रथमोऽध्यायः

## संस्कृतव्याकरणशास्त्रस्य वैशिष्टयम्

ब्राह्मी तु भारती भाषा गीः वाक् वाणी सरस्वती[२] इति महतो कोषकारस्य अमरसिंहस्य विवरणम्। विश्वप्रतिष्ठितभाषाणां मध्ये संस्कृतं व्यापकतायां गुणगाम्भीर्ये च अन्याः सर्वाः अपि भाषाः अतिशेते। संस्कृतं न केवलं साहित्यिकदृष्ट्या प्राधान्यमेव अपितु वैज्ञानिकपद्धत्त्यनुसारेण प्रसिद्धमपि वर्तते। संस्कृतभाषायाः स्वरूपज्ञानाय व्यवहाराय तद् रक्षायै च सर्वतः प्रप्रथमं व्याकरणं ज्ञानम् अनिवार्यम्। शब्दशास्त्रं विना भाषायाः व्यवहारः नैव कर्तुं शक्यते। भाषा मानवस्य व्यावहारिकी सम्पत्तिः। तामन्तरेण परस्परं व्यवहारः नैव शक्यः। तथा च इतरविद्याप्रवेशलाभाय भाषास्वरूपज्ञानाय च व्याकरणमध्येयमिति सिद्धम्। तत्रापि भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती इति प्रशंसामापन्नायाः गीर्वाणवाण्याः स्वरूपज्ञानाय व्याकरणापेक्षा अतीव वर्तते। महाकविना दण्डिना प्रोक्तम् -

इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारे न दीप्यते[३] ॥ इति ॥

यदि शब्दरुपं ज्योतिः न दीप्यते । तर्हि कृत्स्नमिदं भुवनत्रयम् अज्ञानान्धकारे निमग्नं जायते इति शब्दस्यास्य महत्त्वमनिवार्यमेव। अतः संक्षिप्ततया वक्तुं शक्यते यद्

---

[2] अमरकोषः १-१-६

[3] काव्यादर्शः १-४

भाषाज्ञानं शब्दज्ञानपूर्वकं शब्दज्ञानञ्च व्याकरणज्ञानमन्तरा न सम्भवति। तथा चोक्तम् –

> व्याकरणात् पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति।
> अर्थात्तत्त्वज्ञानं तत्त्वज्ञानात् परं श्रेयः[४]॥ इति॥

धर्मार्थकाममोक्षाख्यपुरुषार्थफलप्रधाने कर्मनिबन्धने नानाविधसुखदुःखज्वालामालासमाकुलिते विचित्रेऽस्मिन् जगतीलेऽतीव दुर्लभं मानवजन्म। मानवजन्म लब्ध्वापि धर्मसाधनमन्तरा न पुरुषार्थसिद्धिः। धर्माधर्मविवेकश्च साङ्गोपाङ्गवेदाध्ययनमन्तरेण न भवितुमर्हति। तदुक्तम् भगवता पतञ्जलिना 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधानो च कृतो यत्नः फलवान् भवति' [५]। प्रकृतिप्रत्ययविवेचनपुरस्सरं भाषायाः स्वरूपमुपवर्णयत् साध्वसाधुशब्दनिरुपणं च कुर्वत् व्याकरणशास्त्रमितरशास्त्रापेक्षया विदुषामत्यन्तोपकारकम्। यतश्च तद्विना शब्दस्य सम्यग्ज्ञानाय सुष्ठु प्रयोगाय च नास्त्यन्यः लघूपायः। अत एवोक्तं भाष्येन चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम् इति[६]। एवमेव केनचिन्महाकविनाप्युक्तम् –

> अस्वीकृतव्याकरणौषधानामपाटवं वाचि प्रगाढमास्ते।
> कस्मिंश्चिदुक्ते तु पदे कथंचित्स्वैरं वपुः स्विद्यति वेपते च[७]॥ इति॥

---

[4] हेमचन्द्रानुशासनम् अ०१ – पृ०८

[5] महाभाष्य पस्पशाह्निकम्

[6] महाभाष्य पस्पशाह्निकम्

[7] विश्वगुणदर्शनचम्पू

व्याकरणं न केवलमत्यन्तोपकारकत्वेन। अपि तु परमपवित्रत्वेन च सम्भवितं प्राचीनैः।

अत एव काव्यमिमांसायां प्रोक्तम्-

आपः पवित्रं प्रथमं पृथिव्यामपां पवित्रं परमं च मन्त्राः।

तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः[८] ॥ इति ॥

एवमेव भाष्यकारेण शब्दस्यापि ज्ञाने प्रयोगे प्रयोजनम् । किम् एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति[९] । यद्येकः शब्दः कामधुग्भवति । किमर्थं द्वितीयः । तृतीयश्च प्रयुज्यते । नवै कामानां तृप्तिरस्ति इति वदता भाष्यकृता अलौकिकप्रयोजनप्रदर्शनद्वारा प्रंशसा कृता। एवम् -

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।

प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्[१०] ॥ इति ॥

इत्यनेन व्याकरणस्य प्रदीपवद्भाषाप्रकाशकत्वं सर्वविद्योपकारकत्वं च प्रदर्शितम्। ङमुखं व्याकरणं स्मृतमङ[११] इति उद्घोषयता शिक्षाकारेण षड्ङ्गेषु व्याकरणस्य मुख्यत्वं प्रतिपाद्यते। अत एव शिक्षाव्याकरणच्छन्दो निरुक्तज्यौतिषकल्पाख्येषु षट्सु अङ्गेषु व्याकरणस्य मुख्यत्वात् तत्र कृतः श्रमः अन्यविद्योपकारको भवतीत्यतः व्याकरणमवश्यमध्येयम् इत्याशयः भाष्ये प्रकाशितः। शुद्धशब्दज्ञानार्थं शुद्धशब्दप्रयोगार्थं

---

[8] काव्यमिमांसा -६

[9] महाभाष्य पस्पशाह्निकम्

[10] काशिका - १

[11] पा०शि० ४१

च व्याकरणज्ञानस्य अनिवार्यता सर्वैरेव संस्तूयते। पुनः सूक्ष्मातिसूक्ष्मविवेचनं व्याकरणशास्त्रेण क्रियते। अतः व्याकरणस्य पठनम् अनिवार्यमेव। अतः साधूच्यते-

यद्यपि बहु नाधीषे। तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत्। सकलं शकलं सकृत् शकृत्॥ इति॥

व्याकरणं न केवलं भावशुद्धिसाधनमेव। अपि तु शब्दब्रह्मशोधकं शब्दब्रह्मावाप्तिसाधनं च वर्तते। अतएव ऋग्वेदे वर्ण्यते यद् यो वाक्तत्त्वं सर्वथा पश्यति। वाक्तत्त्वमपि तस्मै स्वीयं प्रकटयति -

उत त्वं पश्यन् न ददर्श वाचम्। उत त्वः श्रृण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे। जायेव पत्य उशती सुवासाः[12]॥ इति॥

अत एव भगवता भर्तृहरिणा शब्दसंस्कारः शब्दब्रह्मप्राप्तिसाधनत्वेन निरूप्यते-

तस्माद् यः शब्दसंस्कारः। सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते[13]॥ इति॥

वाक्यपदीये शब्दतत्त्वस्य महत्त्वं प्रतिपादयति। तत्र वर्णितमस्ति शब्द एव नेत्ररूपः सन् जगदिदं द्योतयति। यथा-

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्माऽयं। भेदरूपः प्रतीयते[14]॥ इति॥

---

12 ऋग्वेद १०॥७१॥४

13 वाक्यपदीयम् १॥१३३

वाक्यपदीये शब्दस्य ज्ञानाश्रयत्वेन शब्दज्ञानयोः परस्परान्वयित्वं निर्णीयते। उक्तं च-

ना सोऽस्ति प्रत्ययो लोके। यः शब्दानुगमाद् ऋते।

अनुविद्धमिव ज्ञानं। सर्वं शब्देन भासते[१५]॥ इति॥

तत्त्वविशारदाः न केवलं व्याकरणं प्रशंसन्ति अपि तु विविधशास्त्रपारङ्गतम् इदं इति अभिनन्दयन्ति। काव्यशास्त्रतत्त्वज्ञमूर्धन्यः काव्यप्रकाशकारो मम्मटो वैयाकरणानां तत्त्वज्ञतां प्रतिपादयन् अभिधत्ते - 'बुधैर्वैयाकरणैः प्रधानभूतस्फोटव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः [१६] '। विविधा दार्शनिकाः, भाषाशास्त्रज्ञाः, साहित्यशास्त्रज्ञाः अन्ये च पण्डिताः व्याकरणस्य महत्त्वम् उद्घोषयन्ति। तज्ज्ञानं अनिवार्यत्त्वेन प्रतिपादयन्ति। अपरं च काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् इति उक्तयनुसारं संस्कृतवाङ्मये व्याकरणशास्त्रस्य महत्त्वमतीव दृश्यते।

**व्याकरणशास्त्रस्य प्रयोजनम्**

प्रथम विद्वांसः वैयाकरणाः इति वचनात् व्याकरणशास्त्रस्य प्रयोजनं ज्ञाप्यते। शिष्टपरिज्ञानार्थाऽष्टाध्यायी [१७] इत्यपि महर्षिपतञ्जल्युक्तिः शब्दानुशासनस्य महत्त्वं

---

[14] वाक्यपदीयम् १॥११९

[15] वाक्यपदीयम् १॥१२४

[16] काव्यप्रकाश प्रथम उल्लास

[17] महाभाष्य पस्पशाह्निकम्

प्रतिपादयति। एतादृशं व्याकरणेनैव संस्कृतशब्दानां प्रकृतिप्रत्ययस्वरवर्णमात्रादिज्ञानपूर्वकं साधुत्वं ज्ञाप्यते। ततस्तेषां साधुशब्दानां लोके भाषायामस्माभिः प्रयोगः क्रियते। भाषा नाम मनुष्यस्य सामाजिको धर्मः। भाषामाध्यमेनैव मानवसमुदायः स्वीयं निखिलं सामाजिकं संश्लेषमाविष्करोति। तदर्थम् अस्माकं शब्दसाधुत्वं प्रयोजनार्थं प्राचीनकाले शब्दानुशासनस्य प्रयोजनकथनावसरे भगवता भाष्यकारेणोक्तम् - कानि पुनः शब्दानुशासनस्य प्रयोजनानि ' रक्षोहागमलघ्वसन्देहाः प्रयोजनानि। रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति। ऊहः खल्वपि न सर्वैर्लिङ्गैः च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते च अवश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान न अवैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्। आगमः खल्वपि ब्राह्मणेन निष्कारणोधर्मः षडङ्गो वेदोऽध्ययो ज्ञेयश्चेति। प्रधानं षडङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। लघ्वर्थं चाध्येयं व्याकरणम् । ब्राह्मणेनावश्यं शब्दा ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातम्। असन्देहार्थं चाध्येयं व्याकरणम्। एते व्याकरणस्य पञ्च मुख्यप्रयोजनानि सन्ति। पुनश्च व्याकरणस्य त्रयोदश गौणप्रयोजनानि वर्तन्ते। (१) तेऽसुराः। (२) दुष्टः शब्दः। (३) यदधीतम्। (४) यस्तु प्रयुङ्क्ते। (५) अविद्वांसः। (६) विभक्तिं कुर्वन्ति। (७) यो वा इमाम्। (८) चत्वारि। (९) उत त्वः। (१०) सक्तुमिव। (११) सारस्वतीम्। (१२) दशभ्यां पुत्रस्य। (१३) सुदेवोऽसि वरुणेति। एतादृशं व्याकरणस्य शास्त्रियप्रयोजनविषये प्रतिपादयति।

**आधुनिककाले संस्कृतव्याकरणशास्त्रस्य प्रासङ्गिकता**

परमसन्तोषप्रदोऽयं विषयः यत् सूचनातन्त्रज्ञानयुगेऽस्मिन् संस्कृतव्याकरण-शास्त्रस्य महत्त्वम् अतीव प्रंशसनीयः इति। पाणिनीयम् अष्टाध्यायीतन्त्रं न केवलं

संस्कृतस्य व्याकरणशास्त्रम् अपि तु विज्ञानम्। विज्ञानक्षेत्रे यथा विविधप्रकाराः प्रयोगाः क्रियन्ते। तथा पाणिनीयविज्ञानेऽपि तदीयेन ग्रन्थस्वरूपेण अनितरसाधारणेन विशिष्टयन्त्रनिर्माणद्वारा प्रयोगकरणे निवेशितमतिरहभवम्। इदं च यन्त्रं वैज्ञानिक-दृष्टिकोणादिकमपि अद्वितीयमिति मे प्रतिभाति। सामन्यतः सङ्गणकभाषाविज्ञानक्षेत्रे आ दशकात् विभिन्नप्रयासाः क्रियमाणाः सन्ति। भाषाविज्ञानं वा तुलनामकभाषाविज्ञानं वा विज्ञानस्य क्षेत्रविशेषरूपेण प्रादुरभवत् तदा पाणिनीयसिद्धान्तानां प्रचुरतरः उपयोगदृष्टः। शाब्दबोधप्रक्रिया एवं भाषाप्रक्रिया उभयोः क्षेत्रे पाणिनीय व्याकरणस्य आवश्यकता अस्ति। सङ्गणकयन्त्रेऽपि संस्कृतभाषायां प्रयोगः अतीव प्रशंसनीयः। अधुना यावत् संस्कृतव्याकरणे न केवलं साहित्यविशिष्टम् अनुसन्धानं प्रचलति अपितु यान्त्रिकविज्ञानप्रक्रियाविशिष्टम् संशोधनकार्यं तत्र तत्र चलति। यत् निष्कर्षः भवति संस्कृतव्याकरणं न केवलं शास्त्रियविषयः अपितु वैज्ञानिकरिर्सचसम्बधितविषयरूपेण सम्प्रति प्रसिद्धलाभः करोति।

**व्याकरणशब्दस्य निष्पत्तिः**

लोकव्यवहारप्रवृत्तौ प्रथितो भाषाप्रवहाः व्याकरणेन अनुबध्यते। उच्चारण-नूच्चारणप्रकारेण प्रवर्तमानं भाषास्वरूपं परिभ्रष्टं माभूत् सुरक्षितं स्यादित्येतदर्थं व्याकरणशास्त्रं प्रवृत्तम्। शब्दानुशासनपदेनापि व्याकरणशास्त्रमभिधीयते। अनुशासनं हि चेतनेषु शक्यते न तु जडभूतेषु शब्देषु। अतोऽनुबन्धनमेव तेषामनुशासनम्। व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागविषयीक्रियन्ते असाधुशब्देभ्यो विविच्य बोध्यन्ते साधु शब्दा अनेनेति व्युत्पत्त्या वि आङ् पूर्वात् डुकृञ करणे इत्यास्माद् धातौः ङ्ककरणाधि करणयोश्चट्ट (३-३-११७) इति पाणिनीय सूत्रेण करणार्थकल्युट्प्रत्ययतान्तो निष्पद्यतेऽयं व्याकरण शब्दः। अनया व्युत्पत्त्या शब्दस्वरूपप्रतिपादकत्वमभिगम्यते।

व्याक्रियते याथातथ्यं विविच्यतेऽनेनेति व्युत्पत्त्या दर्शनस्वरूपमभिलक्ष्यते। असाधु-शब्दावधिकसाधुशब्दपृथक्करणत्वम् व्याकरणशास्त्रस्य सामान्यलक्षणम्। अर्थात् व्याक्रियन्ते व्युत्पाद्यन्ते अपशब्देभ्यः साधुशब्दाः पृथकृत्य ज्ञायन्ते इति व्याकरण-पदस्य अभिप्रायः। महाभाष्ये चोक्तं लक्ष्यलक्षणे व्याकरणम्[१८]। लक्ष्यं च लक्षणं चेति समुदितं व्याकरणं अभिप्रेतम्।। शब्दानुशासनम् इति व्याकरणस्याऽन्वर्थं नाम। अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य बोध्यन्ते इत्यनुशासनम्। शब्दानुशासनम्। शब्दानुशासनमिति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तः शब्दानुशासनं शब्दो निष्पद्यते। शास्त्रपदेन सामानाधिकरण्यात् शब्दानुशासनं नाम शास्त्रम्। तच्च व्याकरणमेव। अत एव भगवता पतञ्जलिना - अथ शब्दानुशासनम्[१९] इति व्याकरणस्य साक्षात् प्रयोजनमभिहितम्।

## व्याकरणशास्त्रस्य वेदमूलकत्वम्

अपौरुषेयाः खलु वेदाः। वेदानां स्वतः प्रामाण्यं विद्यते। धर्माधर्मयोः कर्तव्याकर्तव्ययोः सदसत्त्वोः विवेकाय वेदा एव प्रमाणम्। अपि च जगति विद्यमानस्य सर्वस्यापि ज्ञानस्रोतसो मूलत्त्वेन वेदानामेव व्यवहारः। इह संसारे प्रवृत्तानां सर्वासामपि विद्यानां मूलं परमेश्वरोपदिष्टो वेद एवेति न तिरोहितम् विदुषाम्। भगवता मनुनाऽपि वेदानां सर्वज्ञानमयत्वमङ्गीकृतम्। तद्यथा-

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।

---

[18] महाभाष्य पस्पशाह्निकम्

[19] महाभाष्य पस्पशाह्निकम्

स सावेरऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥[२०] इति ॥

विद् ज्ञाने इति ज्ञानार्थकाद्धातोः 'भावे' (३-३-१८) इति सूत्रेण घञ् प्रत्यये वेद इति रूपं निष्पद्यते। एवमेव विद् सत्तायाम् विद विचारणे। विद्लृ लाभे विद् चेतनाख्याननिवासेषु इति धातुभ्योऽपि घञ् प्रत्यये वेद इति रूपं निष्पद्यते। एवं च ज्ञानविज्ञाननिचयः मानवकर्तव्यबोधकाः शाश्वतसुखप्रापकाः वेदाः इत्यभिज्ञायन्ते। ऋग्यजुस्सामाथर्वनामभिः चत्वारो वेदभागाः लोके प्रथिताः। एतेषां चतुर्णां वेदानाम् अर्थावगमाय जना असमर्था जाताः तदा वेदाङ्गानां रचनाऽभूत्। तथा च उवाच निरुक्तेयास्कमुनिः साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मस्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तेऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च[२१] ॥ इमानि वेदाङ्गानि षडिति विदितचरमेव विदुषाम्। तद्यथा -

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥ इति ॥

इत्युक्तरीत्या शिक्षा। कल्पः। व्याकरणं। निरुक्तं । छन्दः। ज्यौतिषञ्च वेदाङ्गानि भवन्ति। एतैः षड्भिरङ्गैः वेदः महदुपाक्रियते। तद्यथा शिक्षाग्रन्थाः वर्णोच्चारणविधिं विशेषतो वर्णयन्ति। कल्पसूत्रेषु विवधाध्वराणां संस्कारादीनां च वर्णनं लभ्यते। व्याकरणे उदात्तादिस्वराविचाराः तत्स्वरसंचारनियमाः तथा प्रकृतिप्रत्ययादिविभागाः इत्यादयः बहवः विचाराः लक्ष्यन्ते। निरुक्ते वैदिकपदानां निर्वचनं सम्प्राप्यते। छन्दसि विद्यमानानां मन्त्राणां वृत्तज्ञानाय छन्दश्शास्त्राध्ययनमनिवार्यम्। शुभमुहूर्तादिज्ञानाय कालविधान-

---

[20] मनु २-७ ॥

[21] निरुक्तम् १

शास्त्रस्यास्य ज्यौतिषस्य प्रवृत्तिः। एवं रीत्या वेदाङ्गाभूतानामेतेषां षण्णां महदुपकारकत्वं महत्त्वं च अभिवीक्ष्य इत्थं प्राह पाणिनीयशिक्षायां पाणिनिमहर्षिः-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते[२२]॥

वैदिकेषु मन्त्रेषु अनेकेषां पदानां व्युत्पत्तिरपि दरीदृश्यते या च व्याकरणस्य वेदमूलकत्वं प्रतिपादयति। तथा च ऋग्वेदे समाम्नायते - उत त्वः पश्यन्न ददर्श वाचम्[२३]। व्याकरण शब्दो यस्माद्धातोर्निष्पद्यते तस्य मूलेऽर्थे प्रयोगो यजुर्वेदेऽवलोक्यते। तथा हि- दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः॥[२४] व्याकरणशास्त्रस्योत्पत्तिः कदा सञ्जातेति विषये निश्चितरूपेण किञ्चित् वक्तुं दुष्करमेव। परं तु लब्धवैदिकपदपाठानां रचनाकालात् प्रागेव संस्कृतव्याकरणशास्त्रस्य पूर्णत्वं सञ्जातमासीदिति तु प्रायेण निश्चितमेव। तद्यथा- वेदेषु समाम्नायते-वाजिनोऽवती। समऽजग्मानः। रुद्रवर्तनी इति रुद्रऽवर्ततनी। सर्वासामपि विधानमूलं वेद एव इति सर्वेषामपि पण्डितानां सम्मतिः। आदिप्रवक्तारं ब्रह्माणम् आरभ्य दयानन्दस्वरस्वति पर्यन्तं वेद एव सर्वज्ञानमयमिति सर्वे स्वीकृतवन्तः[२५]।

---

[22] पा०शि० ४१-४२

[23] ऋग्वेद० १० ॥७१ ॥४

[24] यजुर्वेद १९ ॥७७

[25] We may divide the whole of Sanskrit Literature, beginning with Rig-veda ending with Dayananda's introduction to his edition of the Rig-Veda. India: what can it teach us, Lecture 111 of Maxmuller .

अतः व्याकरणशास्त्रस्यापि मूलं वेद एव। अथ एव महामुनिः यास्कः। महाभाष्यकारः पतञ्जलिश्चैतादृशान् मन्त्रान् स्मरति येषु व्याकरणस्य मूलं वेद इति सूचिततमस्ति। यथा–

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवा मर्त्यांन् आविवेश[२६]॥

अस्य मन्त्रस्य पतञ्जलिः एवं व्याख्यां चकार – चत्वारि शृङ्गा इति चत्वारि शृङ्गाणि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः – त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे – द्वौ शब्दात्मनौ नित्यः कार्यश्च। सप्तहस्तासो अस्य सप्तविभक्तयः। त्रिधा बद्धः – त्रिषु स्थानेषु बद्धः । उरसि कण्ठे शिरसीति। वृषभो वर्षणात् । रोरवीति- शब्दं करोति । कुत एतत् रौतिः शब्दकर्मा। महादेवो मर्त्यांन् आविवेशेति। महान्देवः- शब्दः। मर्त्याः- मरणधर्माणः मनुष्याः । तानाविवेश। महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणम्[२७]।

## संस्कृतव्याकरणशास्त्रस्य अतिप्राचीनता

संस्कृतभाषाया अनदित्वात् तत् व्याकरणमपि अनादि। वैदिकपदपाठानां रचनात्पूर्वमेव व्याकरणस्य स्थितिरवलोक्यते। व्याकरणशास्त्रस्योद्गमः कदा अभवदिति यद्यपि निश्चयेन वक्तुमशक्यं तथापि व्याकरणस्य बीजानि वेदब्राह्मणोपनिषत्सु स्पष्टतया आलक्ष्यन्ते। ऋग्वेदे तु चत्वारि वाक् परिमिता पदानि इत्यादि उल्लिखितमस्ति। गोपथब्राह्मणे

---

26 ऋग्वेद ४॥५८॥३

27 महाभाष्य पस्पशाह्निकम्

तु स्पष्टतया व्याकरणस्य भाषाशास्त्रीयशब्दानां प्रयोगो दृश्यते- ओंकारं प्रच्छामः। को धातुः । किं प्रतिपादिकम् । किं नामाख्यातम्। किं लिङ्गम् । किं वचनं। का विभक्तिः । कः प्रत्ययः। कः स्वरः । उपसर्गो निपातः किं वै व्याकरणम् । को विकारः । को विकारी । कतिमात्रः । कतिवर्णः । कत्यक्षरः । कः संयोगः। किं स्थाननादानुप्रदानुप्रदानुकरणम्[२८] इति । एवं प्रकृतिप्रत्यययोः। धातूपसर्गयोः समासघटक-पूर्वोत्तरपदानां च विभागः सम्पूर्णतया निर्धारितः आसित्। एतत् शब्दशास्त्रमधिकृत्य व्याकरणमिति नाम बहुत्र प्रयुक्तं दृश्यते। तद्यथा वाल्मीकेः रामायणे –

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किञ्चिदपभाषितम्[२९] ॥ इति

अनेन सुविदितं यत् त्रेतायुगेऽपि व्याकरणशास्त्रस्य सुव्यवस्थितं पठनपाठनमवर्ततेति ज्ञायते। तत् काले व्याकरणशास्त्रस्य स्थानं सुदृढम् आसीत्।

सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा[३०] ॥ इति ॥

महाभारतेऽपि व्याकरणशास्त्रस्य स्थितिरासीदिति । एवं पुराकल्पे एतदासीत्। संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। इतीदं पतञ्जलिवचः [३१] प्रमाणयति पुरा व्याकरणाध्ययनमासीदिति। एतादृशः व्याकरणशास्त्रस्य अतिप्राचिनता साध्यते।

---

[28] गो०ब्रा०पूर्व १ ॥ २४

[29] रामायण०काण्ड० ३ स ॥३ ॥श्लो ॥२९

[30] महाभारतम् गीताप्रेस्

**व्याकरणप्रभेदाः**

सामान्यतः छान्दसः। लौकिकं। छान्दसलौकिकञ्चेति व्याकरणं त्रिधा विभक्तुं शक्यते। तत्र छान्दसं प्रातिशाख्यादि। छान्दसलौकिकं पाणिन्यादि व्याकरणम्। प्रातिशाख्यं वेदानां प्रतिशाखासम्बद्धम्। वेदस्य यावत्यः शाखाः सन्ति तावान्ति प्रातिशाख्यानि वर्तेरन्। परमद्यत्वे षडत्व प्रातिशाख्यान्युपलभ्यन्ते। लौकिकव्याकरणं द्विधा विभज्यते सच्छान्दसं । लौकिकमात्रं चेति। सच्छान्दसं पाणिनीयं । लौकिकमात्रं कातन्त्रादि। लौकिकव्याकरणस्य बहवो भेदा विद्यन्ते। सम्प्रत्यपि अष्टादशाधिका व्याकरणस्य परम्परा प्रवर्त्तिता दृश्यते। तेष्वपि अष्टौ वा नवसंख्याका वा प्राधान्येन गृहीताः सन्ति। अष्टौ भेदाः[३२] यथा-

ब्राह्ममैशानमैन्द्रं च। प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलं चेति। पाणिनीयमथाष्टमम्॥[३३] इति॥

तत्राष्टानां व्याकरणानां प्रणेतृणां विषये मतभेदोऽवलोक्यते। यथा –

यस्मिन्व्याकरणान्यष्टौ निरुप्यन्ते महान्ति च।
तत्राद्यं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते॥
तृतीयं याम्यमाख्यातं चतुर्थं रौद्रमुच्यते।
वायव्यं पञ्चमं प्रोक्तं षष्ठं वार्णमुच्यते॥

---

[31] महाभाष्य पस्पशाह्निकम्

[32] व्याकरणमष्टप्रभेदम्। दुर्गा निरुक्तवृत्ति च आनन्दाश्रमा सं०फ पृ०७४

[33] हैम-बृहद्वृत्त्यवचूर्णि

सप्तमं सौम्यमाख्यातमष्टमं वैष्णवं तथा ॥[३४] इति ।

एतदतिरिक्तं सरस्वती कण्ठाभरणे भास्कराचार्यविरचिते लीलावती ग्रन्थे बोपदेवेन स्वीयकवि कल्पद्रुमट्ट ग्रन्थे अष्टवैयाकरणानामुल्लेखो विहितः –

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।

पाणिन्यमरजैनेद्रा जयन्त्यष्टौ हि शाब्दिकाः[३५] ॥ इति ॥

सत्यप्येवं मतभेदे सम्प्रदायप्रवर्तका आचार्या अष्टावेवेति इतिहासप्रणेतृणां लोकमणिदाहालमहाशयानामाशयः। रामायणे तावत् सोऽयं नवव्याकरणार्थवेत्ता[३६] इति वचनेन व्याकरणस्य नवविधत्वमुच्यते। तथैव गीतासारनामके हस्तलेखेऽपि [३७] नवानां व्याकरणशास्त्रकर्तृणां विचारः सुविशदं निरूप्यते तद्यथा –

अष्टादशपुराणानि नवव्याकरणानि च ।

निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम्[३८] ॥ इति ।

श्रीतत्त्वनिधि इत्यभिधेये वैष्णवग्रन्थे नव व्याकरणानां वर्णनं विहितम् –

---

34 सं०व्या०शा०इ० पृ-८५

35 सं०व्या०शा०इ० पृ-७३

36 वा०रा०उ०का०३६ ॥४७ Madras Law Journal Press 1633 edition

37 B.O.R.I Pune Collection

38 गीतसारम् श्लो० ५७, Mss no-163, Year-1883-84

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्॥[39]

**नवव्याकरणसंक्षिप्तपरिचयः[40]**

**ऐन्द्रव्याकरणम्**

ऐन्द्रव्याकरणस्य प्रसिद्धिः संस्कृतसाहित्यनिकाये सम्यक्जयऽऽसीत्। अस्य प्रशंसागानं महाभारतटीकायां समुपलभ्यते। अधुनातनकाले लुप्यमानयास्यैन्द्रव्याकरणस्य रूपरेखं पाठकानां पुरतः यत् अष्टाध्यायां अपेक्षया ऐन्द्रव्याकरणं बृहत्तरमासीदिति प्राचीन कालेऽस्य व्याकरणस्य सूत्राणि यदि वा कालवक्षसि विलुप्तानि इति कथासरितसागरदिषु वर्ण्यते। तथापि तस्यैन्द्रव्याकरणस्य अथवर्णसमुहः । अथ पदम् इति प्रथमं स्मारयति नितरां तदव्याकरणविषये। अदितिकश्यपयोः सुतेनेन्द्रण व्यरचीदं व्याकरणम्। बृहस्पतिशिष्योऽयम्। ऐन्द्रव्याकरणेऽस्मिन् पञ्चविंशतिसहस्त्रसङ्ख्याकाः श्लोका आसन्निति। हिमवत्पर्वतनिवासिनोऽस्य कालो विक्रमतः १।५०० पूर्वमासीदिति च ज्ञायते।

**चान्द्रव्याकरणम्**

चान्द्रमार्षग्रन्थेषु अन्वेषणीयम्। चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठः इत्यादिभिः वचनैः चान्द्रव्याकरणस्य सत्ता स्वीक्रियते। चन्द्रगोमी कर्ताऽस्य व्याकरणस्य। पाणिनीयं व्याकरणमुपजीव्येदं व्याकरणं व्यरचि। अयं बोद्ध मतानुयायी वङ्गदेशीयश्च। व्याकरणेऽस्मिन् पातञ्जलमहाभाष्यस्य महान् प्रभावः अस्ति। चान्द्रव्याकरणस्य

---

[39] सं०व्या०शा०इ०पृ- ७५

[40] See History of Sanskrit Grammar (Vol-1) by Yudhistir Mimamsak (Hindi Edtion)

प्रथमश्लोकेन ज्ञायते यदयं बौद्धमतानुलम्बी आसीदिति। जर्मन देशे यदेव चान्द्रव्याकरणं प्रकाशितं तत्तु अपुर्णमेव। विक्रमतः एकसहस्त्रवर्षपूर्ववर्ती।

**काशकृत्स्नव्याकरणम्**

काशकृत्स्नेन प्रोक्तमिदम्। काशकृत्स्नेः पुत्रोऽयम्। उत्तरभारतीयस्यास्य गुरोर्नाम बादरायणः। "त्रिकं काशकृत्स्नम्" (५-१-५८) इति काशिकावृत्तिग्रन्थेनास्य व्याकरणमध्याय त्रयसंवलितमिति ज्ञायते। महाभाष्येऽस्य नाम स्मर्यते। काशकृत्स्नव्याकरणं शब्दकलाप इत्यपि नाम्नाऽभिधीयते। पाणिनेः पूर्वकालिकोऽयमित्येव ज्ञायतेऽस्य कालविषये नत्वधिकम्।

**कौमारव्याकरणम्**

पूर्वमुक्तदिशा नवानां व्याकरणानां मध्ये कौमारमप्यन्यतमम्। परन्त्वस्य व्याकरणस्य विषये कर्तृ तत्कालादिविषये च किमपि प्रमाणं नोपलभ्यते।

**शाकटायनव्याकरणम्**

शाकटायनेन प्रणीतमिदं व्याकरणम्। व्याकरणे शकटस्य च तोषकम् इति पतञ्जलिमहर्षेर्वचनेन अस्य पिता शकटः। शकटस्यापत्यमित्यर्थे शकटशब्दात् फक् प्रत्यये रूपमिदम्। काण्वशिष्योऽयम्। "नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः" (६-२-१३२) इति सूत्रे सिद्धान्तकौमुद्यां शाकटायनपुत्र इत्युदाहरणदानेननास्य कश्चित्पुत्र आसीदिति निर्णीयते। शाकटायनस्य महावैयाकरणत्वं स्पष्टमेव लभ्यते। अस्य व्याकरणपरिमाणविषये प्रमाणं कुत्रापि नोपलभ्यते।

**सारस्वतव्याकरणम्**

सारस्वतव्याकरणमिदमनुभूतिस्वरूपाचार्यप्रणीतमस्ति। अस्य व्याकरणस्य विषये बहूनां तर्काणामावश्यकता नास्ति। यतो हि ग्रन्थोऽयमिदानीं सर्वत्रोपलभ्यते। क्वचित् विदेशेष्विदानीमप्यस्य व्याकरणस्याध्ययनाध्यापने प्रचलती स्तः। अत्र भाषाया नियमाः सरलतया प्रतिपादिताः। अस्य ग्रन्थस्य व्याख्याता श्रीचन्द्रकीर्तिसूरिः। १९३८ तमे वर्षे मुम्बेय्यां निर्णयसागरमुद्रणालये प्रकाशितोऽयं ग्रन्थः। एतत् ग्रन्थे उपलभ्यतथ्यानुसारेण अनुभूतिस्वरूपचार्या दाक्षिणात्या इति। अस्य च कालः प्रायो विं॥ सं॥ ११५० इति वक्तुं शक्यते।

**आपिशलिव्याकरणम्**

अस्य प्रणेताऽऽपिशलिः। "वा सुप्यापिशलेः" (६-१-८९) इति पाणिनेरष्टाध्याय्यां काशिकावृत्तौ च स्मृतोऽयमपिशलस्य सुत इति स्पष्टीभवति। प्राग्देशीयोऽयं विक्रमतः ३००० वर्षेभ्यः पूर्वकालिकः। "अष्टका आपिशलपाणिनीयाः" इति वचनेनास्य व्याकरणेऽध्यायानां सङ्ख्याऽष्टाविति प्रतीयते।

**शाकल्यव्याकरणम्**

पाणिनिप्रणीतायामष्टाध्याय्यां शाकलस्य नाम चतुः कृत्वः स्मृतम्। अतोऽयं ततः पूर्वकालिक इति निस्सन्दिग्धम्। शकलशब्दादपत्यार्थे यञ्प्रत्यये निष्पन्नेन शाकल्यशब्देन सूच्यते यदस्य पिता शकल इति। उभयविधानां लौकिकवैदिकशब्दानामन्वाख्यानमत्र कृतम्। अस्य कालः विक्रमतः ३२०० वर्षेभ्यः पूर्वतनः। " इकोऽसवर्णे शाकलस्य ह्रस्वश्च" (६-१-१२३) इति सूत्रभाष्ये शाकल्यनियमानां शाकलशब्देनोल्लेखनं दृश्यते।


**पाणिनीयव्याकरणम्**

पूर्ववर्तिषु ऐन्द्रादिव्याकरणेषु समग्रस्य शब्दराशेर्व्युत्पत्तिसामर्थ्यं दृष्ट्वा करुणापूर्णान्तरङ्गो भगवान् पाणिनिः लोकानुजिघृक्षया लौकिकवैदिकोभयप्रयोगसाधनार्थं महेश्वरप्रसादप्राप्ततेजसा अष्टाध्यायीं जग्रन्थ। चतुसहस्त्रसूत्राणि निबद्धानि अयं अष्टाध्यायी ग्रन्थः। संस्कृतव्याकरणजगति यस्यैव नाम सश्रद्धं समुपचार्यते। साङ्गोपाङ्गनिबद्धा यस्य कृतिः विश्वेऽस्मिन् पठ्यते पाठ्यते। सागरोपमं शब्दराशिमष्टभिरध्यायैः लघिष्ठैः सूत्रैः ऋषिर्व्याकार्षीदिति चमत्कारकोऽयं विषयः। अ इ उ ण् इत्यादीनि चतुर्दशमाहेश्वर सूत्राणि उपजीव्य प्रत्याहारमुद्रया वैज्ञानिकसूत्ररचनापद्धतिः पाणिनेराचार्यस्य प्रतिभायाः अलौकिकशक्तिं प्रकाशयति। पाणिन्यष्टाध्याऽयाः उपरि कात्यायनमुनिना वार्तिकं कृतम्। समयस्त्रोतसि अवोध्यं विलुप्तं पाणिनिकृतव्याकरणमुद्धर्तुं भगवान् शेषः पतञ्जलिरूपेणाविर्बभूव। अष्टाध्याऽयाः उपरि विरचितोऽस्य भाष्यग्रन्थः महाभाष्यरूपेण सर्वेषां संस्कृतसाहित्यभाषाणां शिरोदेशं विमण्डयति। न केवलं व्याकरणसम्प्रदाये अपि तु सकलसंस्कृतवाङ्मये नवीनरीत्या निर्मितं भाष्यमिदमद्भुतमुद्वहति । सर्वे विद्वांसः एतन्निकटे नतमस्तकाः। "यथोत्तरं मुनीनां प्रामाण्यम्" [४१] इति वचनात् महाभाष्यकारस्य पतञ्जलेः मतमेव सर्ववादिसम्मतम्। अतः पाणिनीयव्याकरणं त्रिमुनिव्याकरणमिति प्रसिद्धम्। पाणिनिकात्यायनपतञ्जलयः त्रिमुनयः।

---

[41] केयटभाष्य पृ १ भ१भ २९

## यथोत्तरं मुनीनां प्रामाण्यम्




## पाणिनिसूत्राणां प्राशस्त्यम्

इन्द्र-काश्यप-गार्ग्य-गालव-सेनक-शाकल्य-चाक्रवर्मा-भारद्वाज-शाकटायन-स्फोटायन प्रभृतयः स्वस्वकाले भाषासंस्काराय शब्दानुशासनानि व्याकरणपरपर्यायाणि प्रणीतवन्तः। वाग्वै पराच्यव्याकृताभवत् । ते देवाः इन्द्रमब्रवृन् इमां नो वाचं व्याकुरु इति तामिन्द्रो मध्यतो वक्रम्य व्याकरोत् तस्मादियं व्याकृता वादुत्यते इति श्रुत्या [४२] इन्द्रस्य व्याकरणकर्तृत्वमनुमीयते। एवम् “तृषिमृषिकृशेः काश्यपस्य” (१-२-२५)। “ओतो गार्ग्यस्य” (८-३-२०) इत्यादौ पाणिनिना काश्यपादीनां स्मरणात् तेऽपि व्याकरणकर्तारः आसन् इति ऊह्यते। पूर्वं संक्षिप्ततया प्रणीतानां पश्चात्

[42] तै० संहिता ६४७स

विस्तृतीकरणम्। पूर्वं विस्तृतानां पश्चात् संक्षिप्तीकरणमित्यादिशास्त्रग्रन्थकर्तृणां स्वभावः। अतः ऋषिभिः प्रणीतेषु कैश्चित् संक्षिप्तैः कैश्चित् विस्तृतैर्भाव्यम्। एवं कैश्चित् वैदिकाब्दसाधनपरैः । कैश्चित् लौकिकशब्दसाधनपरैः भाव्यम्। तेषु शाकटायन-कातन्त्रचान्द्रमुग्धबोधादीनि लौकिकाशब्दमात्रान्वाख्यायकान्येव। एवमृषिपरम्परानिबद्धानि व्याकरणानि स्वकाले प्रचलन्तीं भाषां च सम्यक् परिशील्य अष्टाध्यायपरिमितैः किञ्चिदूनचतुस्सहस्त्रसंख्याकसूत्रैः नूतनं व्याकरणं 7 Century B.C समये प्रणीतवान् भगवान् पाणिनिः।

पाणिनिना कृतं व्याकरणं तु वैदिकलौकिकोभयभाषान्वाख्यायकम्। अत एव महाभाष्यप्रारम्भे अथ शब्दानुशासनं केषां शब्दानाम् । लौकिकानां वैदिकानां च इत्युक्तवता भगवत्पतञ्जलिना पाणिनीयस्य लौकिकवैदिकोभयभाषान्वाख्यायकत्वं प्रकटितम्। पाणिनीयव्याकरणनिर्माणप्रणालीविवरणव्याजने पूर्वव्याकरणापेक्षया अस्य वैशिष्ट्यमपि प्रकटितं भाष्यकारेण। तथा हि – "उक्तः शब्दः स्वरूपमप्युक्तम्। प्रयोजनान्यप्युक्तानि। शब्दानामनुशासनमिदानीं कर्तव्यम् तत्कथं कर्तव्यम् । किं शब्दोपदेशः कर्तव्यः । आहोस्विद अपशब्दोपदेशः आहोस्विदुभयोपदेशः" इति। अन्यतरोपदेशेन कृतं स्यात्। किं पुनरत्र ज्यायः । लघुत्वाच्छब्दोपदेशः इष्टान्वाख्यानं च भवति। अथ एतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः । गौरश्वः पुरुषो हस्ती शकुनिमृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः नेत्याह। अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते । बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्त्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। किं पुनरद्यत्वे तस्मादनभ्युपायश्शब्दानां प्रतिपत्तौ प्रतिपदपाठः।

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः। किञ्चित्सामान्यविशेषवल्लक्षणं कर्तव्यम्। येन अल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्। उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः। कश्चिदपवादः। कथं जातीयकः पुनरुत्सर्गः कर्तव्यः। कथं जातीयकोऽपवादः। सामान्येन उत्सर्गः कर्तव्यः। तद्यथा "कर्मण्यण्" (३-२-१) तस्य विशेषण अपवादः तद्यथा- "आतोऽनुपसर्गे कः" (३-२-३) इति पस्पशाह्निके भाष्यकारेण उक्तम्। एतेन प्राचीनैराचार्यैः कैश्चित् शब्दोपदेशश्च। अपशब्दोपदेश्च कृतः इति। कैश्चित् प्रतिपदपाठः कृत इति। कैश्चित् उत्सर्गापवादभावं विना शब्दानुशासनं कृतमिति च सूचितमिति ऊहितुं शक्यते। पूवोक्तसल्लक्षणलक्षितत्वादेव अन्यव्याकरणन्यपहाय पाणिनीयमेव व्याख्यातुं स्वीकृतवान् पतञ्जलिरित्यूहितुं शक्यते। अत एव वृद्धिसूत्रभाष्ये प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविय महता यत्नेन सूत्रणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्। किं पुनरियता सूत्रेण इति। इको यणचि इति सूत्रभाष्ये सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् इति च उक्तवता भाष्यकारेण पाणिनिसूत्राणां प्राशस्त्यं प्रकीर्तितम्।

## स्थूलतया पाणिनीयस्वरूपम्

पाणिनिमुनिकृतेषु सूत्रेषु उक्तानुक्तदुरुक्तचिन्तां कुर्वन् भगवान् कात्यायनः वार्तिकानि प्रणीतवान्। ततः सूत्रेषु वार्तिकेषु च आक्षेपसमाधानरूपं भाष्यं प्रणीतवान् भगवान् पतञ्जलिः। ततः वामनजयादित्याभ्यां काशिकानाम्नी वृत्तिः प्रणीता। अन्यश्च भागवृत्तिभाषावृत्तिप्रभृतयः वृत्तिग्रन्थाः प्रसिद्धाः। भाष्ये कैयटादिभिः कैश्चित् प्रदीपादिनामभिः। काशिकावृत्तौ जिनेन्द्रबुद्धिहरदत्तादिभिः न्यासपदमञ्जरी नामभ्यां च व्याख्यानानि कृतानि। ततः धर्मकीर्तेः प्रभृति भट्टोजीदिक्षितपर्यन्तं बहुभिः

पण्डितैः लघुनोपायेन शब्दनिष्पत्तिज्ञानार्थं रूपावतारप्रक्रियाकौमुदीप्रक्रियासर्वस्व-वैयाकरणसिद्धान्तकौमुदीनामभिः पाणिनिसूत्रक्रमम् उल्लीख्य प्रक्रियानुगुणक्रमविन्यस्तसूत्रं बहवः प्रक्रियाग्रन्थाः प्रणीताः। तत्रापि वैयाकरणसिद्धान्तकौमुदीसम्प्रदायः बहुप्रसिद्धिं प्राप। अस्मिन्नपि मार्गे प्रौढमनोरमातत्वबोधिनीशब्देन्दुशेखरप्रभृतयः व्याख्यानग्रन्थाः प्रमाणतया आदृताः आविर्भूताः। एते सर्वेऽपि प्रक्रियाप्रधानाः ग्रन्थाः इत्युच्यन्ते। अन्ये च केचन प्रक्रियाज्ञानार्थं वैयाकरणसिद्धान्तविवरणपराः परिभाषेन्दुशेखरप्रभृतयः वैयाकरणसम्प्रदाये मूर्धन्यभूताः दृश्यन्ते। अन्ये च वैयाकरणमतोन्मज्जनवैयाकरण-भूषणवैयाकरणसिद्धान्तमञ्जूषाप्रभृतयः आर्थिकग्रन्थाः वाक्यपदीयादयः दार्शनिकग्रन्थाः आविर्भूताः। तदेतत्सर्वं समुदितमद्यत्वे पाणिनीयव्याकरणपदेन व्यवह्रियते। व्याकरणपदार्थनिरुपणावसरे भाष्ये न हि सूत्रतः एव शब्दान् प्रतिपद्यन्ते। किं तर्हि व्याख्यानतः। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति। न केवलानि चर्चापदानि व्याख्यानम् वृद्धिः। आत्। ऐच् इति। किं तर्हि उदाहरणम् । प्रत्युदाहरणम्। वाक्याध्याहारः इत्येतत्समुदितं व्याख्यानं भवति। एवं तर्हि लक्ष्यलक्षणे व्याकरणम् इत्युक्तवता पतञ्जलिना सूत्रस्येव व्याख्यानानामपि व्याकरणत्वं सूचितम्। एवं च पाणिनेः प्रभृति एतावत्पर्यन्तं पाणिनीयक्रमानुसारेण वा। प्रक्रियाक्रमानुसारेण वा। प्रक्रियाविषये वा। अर्थविषये वा। पाणिनि सूत्राण्याधारीकृत्य यद्यदुद्भूतं तत्सर्वमपि पाणिनीव्याकरणपदेन व्यवह्रियते इति सिद्धम्।

## पाणिनीयव्याकरणे मुनित्रयस्य प्रामाण्यम्

एवं व्याख्योपव्याख्यानादिभिः बहुशाखां गतेऽस्मिन् पाणिनीये व्याकरणे पाणिनिप्रोक्तानां सूत्राणां लक्ष्यसंस्कारादिविषये यादृशं प्रामाण्यम् । तादृशं कात्यायनोक्तानां वार्तिकानाम्। भाष्यवचनानां चास्ति। अत एव रूपवती भार्या यस्य सः। रूपवद्भार्यः

इत्यत्र "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्" (६-३-३३) समानाधिकरणे इति सूत्रेण पुंवद्भावे निष्पन्नस्य रूपवद्भार्यः इत्यस्य यादृशं साधुत्वम् । तादृशमेव हस्तिनीनां समूहः हास्तिकम् इत्यादीनां भस्याढे तद्धिते इति वार्तिकेन पुंवद्भावभाजाम् । सर्वस्याः आगतः । सर्वमयः इत्यादिनां सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः इति भाष्यकार दृष्ट्या प्राप्तपुंवद्भावानामपि साधुत्वमङ्गीक्रियते।

न केवलं तैः साक्षात्कण्ठरवेण उक्तानाम्। अपि तु ज्ञापितानामपि वचनानां लक्ष्यसंस्कारकत्वे प्रामाण्यं स्वीकृतं साम्प्रदायिकैः। यथा पाणिनिः समानाधिकरणाधिकारस्थेन "कुमार श्रमणादिभिः" (२-१-६९) इति सूत्रेण प्रातिपदिकस्य कुमारशब्दस्य स्त्रीलिङ्गे श्रमणादिभिस्सह समानाधिकरणतत्पुरुषसमासं विहितवान् - "युवा खलतिपलितवलितजरतीभिः" (२-१-६६) इति सूत्रेण। परन्तु स्त्रीप्रत्ययरहितस्य कुमारशब्दस्य श्रमणादिभिः स्त्रीलिङ्गैः एवं स्त्रीप्रत्ययरहितस्य युवन्शब्दस्य स्त्रीप्रत्ययान्तेन जरतीशब्देन च साकं सामानाधिकरण्याभावात् तत्समासविधानं व्यर्थम्। एवं व्यर्थ सत् प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति ज्ञापयति। तेन कुमारशब्देन युवन्शब्देन च स्त्रीप्रत्ययविशिष्टयोः कुमारीयुवतिशब्दयोः ग्रहीतुं शक्यत्वात्। तयोः स्त्रीलिङ्गश्रमणादिभिः जरतीशब्देन च सामानाधिकरण्यं सूपपादमिति तत्समासविधानं चरितार्थं भवति।

एवं च पाणिनिप्रोक्तानाम् "इको यणचि" (६-१-७४) इत्यादीनामिव तद्ज्ञापितानां प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इत्यादीनामपि लक्ष्यसंस्कारकत्वेन प्रामाण्यस्वीकारादेव "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य" (८-३-४६) इति सूत्रस्य अयस्कुम्भः इत्यत्रेव अयस्कुम्भी इत्यादावपि प्रवृत्तिः। अयस्कुम्भी इत्यादीनामपि

प्रामाण्यं च सिद्धम्। एवं वार्तिककारः तेन तत्र न भवेतद्धिनियम्यम् (वा-१९३०सि०कौ० ४-१२) इति वार्तिके विनियम्यम् इति प्रयुक्तवान्। स च असतः "गदमदचरयमश्चानुपसर्गे" (३-१-१००) इति सूत्रेण यमधातोः यत्प्रत्यश्चेत्तर्हि अनुपसर्गे एव इति नियमनात् नीत्युपसर्गपूर्वकात् यमधातोः यत्प्रत्ययस्य अयुक्तत्वात्। एवमयं प्रयोगः असतः सन् नि इत्युपसर्गपूर्वात् यमेः यत् भवतीति ज्ञापयति। तेन अनियम्यस्य नायुक्तिः त्वया नियम्या ननु दिव्यचक्षुषा इत्यादिक विप्रयोगाणां साधुत्वसिद्धिः फलम्। एवं कार्तिक्याः प्रभृत्याग्रहायणीमासे इति "अपादाने पञ्चमी" (२-३-२८) इति सूत्रे भाष्यकारः प्रभृतिशब्दयोगे कार्तिकीशब्दात् पञ्चमी प्रयुक्तवान्। परं सा पञ्चमीं सूत्रवार्तिकाभ्यामविहिता इत्यसङ्गता। एवमसङ्गतस्सन् स प्रयोगः प्रभृत्यर्थकशब्दयोगे पञ्चमी भवति इति ज्ञापयति। तेन प्रथमाध्यायात्प्रभृति चतुर्थाध्यायपर्यन्तमेव शब्दकौस्तुभः मेरुपृष्ठादारभ्य ध्रुवपर्यन्तम् भावात्प्रभृति आरभ्य वा सेव्यो हरिः इत्यादिप्रयोगाणां साधुत्वं भवति। अत्र कार्तिक्याः प्रभृति इति भाष्यप्रतीकमादाय कैयटटन तत अरभ्येत्यर्थः भाष्यकारवचनात्प्रभृति पञ्चमी इत्युक्तम्। उद्योते नागेशेनापि प्रभृत्यर्थयोगे पञ्चमीति सूचितम् इत्युक्तम्। एवं च मुनित्रयोक्तानां वचनानं तद्ज्ञापितवचनानं च शब्दसाधुत्वान्वाख्यायकत्वमङ्गीकृतमिति सिद्धम्।

**अद्यतने काले प्रामाणिकेषु नागेशः**

महाभाष्यादिव्याकरणादिग्रन्थेषु कृतभूरिपरिश्रमाः अभिनवपतञ्जलीत्यादिविरुदं भजमानः नागेशभट्टः विराजते। व्याकरणमहाभाष्यस्य उद्योतव्याख्यायाः प्रसिद्ध टीकायाः स्वामी नागेशभट्टः व्याकरणसाहित्य-धर्मशास्त्र-अलङ्कार-सांख्ययोग-पूर्वोत्तर-मीमांसा-ज्यौतिषप्रभृति शास्त्रपण्डितवरेण्यानां मध्ये अयं मूर्धन्यः आसीत् । वैयाकरणनिकाये भर्तृहरेरनन्तरं नागेशभट्ट एवैकः प्रामाणिको विद्वान् वैयाकरणचक्रवर्तिश्च। सत्सु बहुषु

वैयाकरणग्रन्थेषु अभिनवपतञ्जलि नागेशभट्टविरचिताः महाभाष्यप्रदीपोद्योत-लघुशब्देन्दुशेखरपरिभाषेन्दुशेखरादिग्रन्थाः सुप्रसिद्धाः त्रिमुनिहृदयप्रदर्शकाश्च। एतादृग्रन्थाकर्ता वैयाकरणकुलशिरोमणिः नागेशभट्टः स्वजन्मना कतमदेशमलञ्चकार इति कालदेशनिर्णयज्ञैरपि न ज्ञायते। तथापि नागेजीभट्टविरचिते भाष्यव्याख्यानभूते विवरणे **काले इत्युपनामकशिवभट्टसूतेन सतीदेवीगर्भसमुद्भवेन** नागोजीभट्टेन विरचिते इति हस्तलिखितेषु बहुषु विवरणपुस्तकेषु उपलम्भात् काळेकुलावतंसशिवभट्टसुतः सतीदेव्याः पुत्रः आसीत् नागेशः। काळ इत्युपनाम महाराष्ट्रीयब्राह्मणेषु प्रसिद्धम् । अतोऽयं महाराष्ट्रीयाः। तथा च जी इत्यान्ता नामशैली महाराष्ट्रीयेष्वेव प्रसिद्धा। ततोऽयं महाराष्ट्रीयो ब्राह्मणः इत्यपि निश्चयते। अनेन स्वजनकयोः विषये स्वग्रन्थे शब्देन्दुशेखरेऽपि एवमुक्तम्।

शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः॥ इति॥

अपि च वैयाकरणमूर्धन्यस्य नागेशभट्टस्य कापि सन्ततिः न बभूव इति। अतः स्वग्रन्थौ एव पुत्रत्वेन अभिमतौ। तदुक्तं लघुशब्देन्दुशेखराख्ये स्वग्रन्थे -

शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका।

स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितो मया[४३]॥ इति॥

एवं हि श्रूयते यत् नागेशभट्टेन अष्टादशवारं गुरुमुखात् महाभाष्यस्य अध्ययनं कृतमिति। अत एव एवमुक्तं पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः इति। पूर्वोक्तरीत्या गुरुमुखात् लब्धज्ञानार्णवेन नागेशेन मञ्जूषाशेखररचनानन्तरं महाभाष्यप्रदीपस्य

---

[43] वै ॥सि ॥ल ॥मच्यअन्तिममङ्गलाचरणम्श्लो ४पृ ॥३०३फ

उद्योताख्याटीका उल्लिखिता अधिकं मञ्जूषायां द्रष्टव्यम् । शब्देन्दुशेखरे निरुपितमस्माभिः अयं प्रयागपार्श्ववर्तिनः श्रृङ्गवेरपुराधिपतेः राज्ञः रामसिंहस्य आस्थानपण्डितः आसीत्। अत एव तेन राज्ञा अस्य कुटुम्भभरणपोषणादिकं निर्वाहितम्। तदर्थं तस्य नामस्मरणपूर्वकं धन्यवादादिकं वितीर्य ग्रन्थं प्रारभते श्रृङ्गवेरपुराधीशात् मतो लब्धजीविकः इति। अपि च नूतनं जीवनचरित्रम् एवं श्रूयते श्रीनागेशभट्टस्य यज्ञोपवीतादिसंस्काराः जाताः। तदनन्तरं षोडशवर्षपर्यन्तं काश्यामितस्ततः अध्ययनार्थं परिभ्रममाणः एकदा पण्डितसभामेकामुपस्थाय सहसा प्रधानासनमलञ्चकार। तद्दर्शनेन कोपाविष्टैः पण्डितैः वाग्बाणैः भर्त्सयद्भिः सार्द्धचन्द्रं सद्यः निष्कासितः। तेन अपमानेन दुःखसागरे निमग्नोऽयं सर्वोत्कृष्टां विद्यामधिगम्य अहमपि अल्पीयसा समयेन सर्वान् जेष्यामि इत्येवं सङ्कल्प्य विमुक्ताहारः विद्याधि देवतां वागीश्वरीं देवीं पूजयामास। कतिपयैरेव दिवसैः वागीश्वर्याः कृपाकटाक्षव शात् सः करतलामलकीकृतसर्वशास्त्रार्थः जातः इति श्रूयते । गुरुगौरवप्रदाने उदाहरणभूतः अयम्। यतो हि यद्यपि अयं वागीश्वरीकटाक्षवीक्षणात् सकलशास्त्रार्थगूढार्थरहस्यं समधिगतवान्। तथापि गुरुशिष्यसम्प्रदायवशात् प्राप्तैव विद्या श्रेष्ठतमा भवति इति अनुसन्धाय पण्डितमण्डलमूर्धन्यात् भट्टोजिदीक्षितप्रपौत्रात् श्रीहरिदीक्षिताद् शब्दशास्त्रमधीत्य पण्डितमण्डलीमूर्धन्यतां प्राप।

**नागेशपूर्वात् परिभाषाग्रन्थकर्तारः**[४४]

नागेशभट्टस्य प्राक् अनेकाः परिभाषाग्रन्थकर्तारः आसन्। तेषु केचन विद्वांसाः परिभाषाग्रन्थस्योपरि बहुमुल्यं योगदानं दत्तवन्तः। तन्मध्येषु व्याडि। सीरदेवः।

---

[44] See History of Sanskrit Grammar (Vol-1) by Yudhistir Mimamsak (Hindi Edtion)

पुरुषोत्तमः। नीलकण्ठ दीक्षित। श्री हरिभास्कर अग्निहोत्री प्रभृतयः प्रमुखस्थानं भजन्ति। तेषां संक्षिप्तं परिचयः अत्र प्रस्तुयते।

**व्याडिः**

सर्वेषां परिभाषाग्रन्थानां मध्ये व्याडिकृत परिभाषावृत्तिः अतीव प्राचीनतमो ग्रन्थमिति ज्ञायते। अस्य ग्रन्थस्य समयः पाणिनीपतञ्जल्योः मध्ये इति वक्तुं शक्यते। व्याडिपरिभाषावृत्तौ ९३ परिभाषाणामेव वृत्तिः दृश्यते। ततः परिभाषा संख्या वृद्धिं प्राप्य १४० पर्यन्तं वर्तते परिभाषाः। व्याडिस्तु पाणिनेः मातुल इति प्रवादः प्रवर्तते। किन्तु पतंञ्जलेः पूर्वं व्याडिकालः इति विमर्शकानामभिप्रायः।

**पुरुषोत्तमः**

व्याडेः आचार्यस्यानन्तरं पाणिनीयव्याकरणेन सम्बद्धपरिभाषाणां व्याख्याता बोद्धवैयाकरणः पुरुषोत्तमदेवः। अनेन अष्टाध्यायीसूत्राणां व्याख्या भाषावृत्तिः इति कृता। इयं वृत्तिः प्राचीनतमा। अस्यां वृत्तौ लौकिकशब्दानां प्रक्रिया एव दृश्यते। किन्तु वैदिकप्रक्रियास्वरप्रक्रिया सम्बन्धिनां सूत्राणां निर्देशः अनुवृत्तिकार्यार्थमेव। तेषां व्याख्या न कृता। तदग्रन्थे ज्ञापकसमुच्चये ज्ञापकसिद्धपरिभाषेतरवचनानां संग्रहोऽपि दृश्यते। एतासां परिभाषाणां लघुपरिभाषावृत्तिरिति व्याख्या कृता। तस्य व्याख्यानस्य ललिता इति नाम। अस्यां ललितावृत्तौ व्याख्यायां प्रथमा परिभाषा अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् इति। व्याडेरपि इयमेव परिभाषा प्रथमा। एतासां परिभाषाणां मूलभूता न्यायमूला एव इति दृश्यते।

**सीरदेवः**

पुरुषोत्तमदेवस्य कालः द्वादशशताब्दः। तदनन्तरं सीरदेवस्य काल इति गवेषकाणामाशयः। सीरदेवेन परिभाषाणां बृहत्परिभाषा वृत्तिः इति नाम्नी काचित् व्याख्या रचिता। सीरदेवः अतीव प्रतिभासम्पन्नः व्याकरणाचार्यः। सीरदेवेन बृहत्परिभाषावृत्तिरिति लिखिता। दोर्भाग्यम् एतेषां जन्मस्थानं कालः इत्यादयः सप्रमाणं वक्तुं न पार्यते। पुरुषोत्तमदेव इति सीरदेवो अपि पाणिनीयव्याकरणपरम्परायामगत इति। सीरदेवस्य बृहत्परिभाषावृत्तिः सर्वत्र पठनपाठन विधौ प्रचलति। एतेषु कालेषु अष्टाध्यायां वृद्धिः निवेशिता। प्रक्रियाग्रन्थाः बहवः आविर्भूताः। धर्मकीर्तेः रुपावतार। प्रक्रियाकौमुदी। वैयाकरणसिद्धान्तकौमुदी इत्यादयाः उत्पन्नाः। एतेषां प्रक्रियाग्रन्थानां पठनपाठने प्रचुरः प्रचारः संजातः।

**नीलकण्ठदीक्षितः**

नीलकण्ठदीक्षितः सप्तदशतमशताब्द्यां पूर्वार्धे स्थितवान्। एभिः परिभाषावृत्तिः कृता। एते महावैयाकरणाः। एभिः भाष्यतत्वविवेकः इति ग्रन्थद्वयं निर्मितमिति ज्ञायते। भट्टोजी दीक्षितस्य सिद्धान्तकोमुदी प्रोढमनोरमा । तथा शब्दकौस्तुभः एतेषु स्थिताः विषयाः तत्र तत्र ज्ञाप्यन्ते। एतेषां परिभाषावृत्तौ १४० परिभाषाः व्याख्यातास्सन्ति।

**श्री हरिभास्करः अग्निहोत्री**

हरिभास्करः सीरदेववत् परिभाषाः अष्टाध्यायीक्रममनुसृत्य विभज्य व्याख्यां कृतवान्। सीरदेवेन प्रतिपादिताः विषयाः सुलभमार्गेण व्याख्यानेन च प्रतिपाद्यन्ते। किन्तु क्लिष्टशैल्या अनेन लिख्यते वृत्तिः। अपि च महाभाष्यविषयान् तत्र तत्र प्रतिपादयति। भर्तुहरेः कारिका अपि तत्र तत्र प्रमाणत्वेन निर्दिश्यते।

## नागेशभट्टकृतग्रन्थाः[४५]

संस्कृतवाङ्मये वाचस्पति मिश्रः महाभागा अन्तन्तरं नागेशभट्टस्य नाम प्रतीयते। श्री नागेशभट्टेन महान् परिश्रमणे प्रायतः सर्वशास्त्रमधिकृत्य किञ्चित् किञ्चित् लिखितम्। अतः स्वयमेव विलिखिता लघुमञ्जुषायां अन्ते स्पष्टतया लिख्यते – "सर्वशास्त्रार्थतत्वज्ञः सर्वत्र च निबन्धकृत्'' । यद्यपि प्रधानतया वैयाकरणाचार्यः तथापि दर्शनसाहित्यादि शास्त्रेषु अनेन स्वमत प्रमाणतया प्रतिपादितम्। अनेन रचितः व्याख्यानग्रन्थः मूलग्रन्थात् अपि महनीयं वर्तते। तेन प्रायशः १०० ग्रन्थाः प्रणितवन्तः। तेषु मध्येषु ९० ग्रन्थाः अत्र प्रतिपाद्यन्ते।

### व्याकरणशास्त्रसम्बन्धिताः ग्रन्थाः

१॥ वैयाकरणसिद्धान्तगुरुमञ्जूषा।

२॥ वैयाकरणसिद्धान्तलघुमञ्जूषा।

३॥ परमलघुमञ्जूषा।

४॥ बृहच्छन्देन्दुशेखरः।

५॥ लघुशब्देन्दुशेखरः।

६॥ महाभाष्य प्रदीपोद्योतः।

७॥ स्फोटवादः।

८॥ वैयाकरणभूषणटीका।

---

[45] परिभाषेन्दुशेखर। डा०पूर्णदत्त सिंह। इन्दु प्रकाशन । वाराणासी। १९८७। द्रष्टव्यम्

९॥ वैयाकरणभूषणसार टीका।

१०॥ एकश्रुतिवादः।

११॥ वैयाकरण कारिका।

१२॥ लघुशब्दरत्नम्।

१३॥ शब्दकौस्तुभ टीका।

१४॥ वृत्तिवादः।

१५॥ अष्टाध्यायी सूत्रपाठः।

१६॥ धातुपाठः।

१७॥महाभाष्यप्रत्याख्यान संग्रहम्।

१८॥ ज्ञापकसंग्रहः।

१९॥ तिङन्तसंग्रहः।

२०॥ वृत्ति संग्रहः।

२१॥शब्दानन्तसागरसमुच्चयः।

२२॥सुप्तिङन्तसागरसमुच्चयः।

२३॥ तात्पर्य दीपिका।

२४॥ णेरणौ वादार्थः।

२५॥ शंका समाधानम्।

२६ ॥ परिभाषेन्दुशेखरः ।

**<u>दर्शनशास्त्रसम्बन्धिताः ग्रन्थाः</u>**

१ ॥वेदान्तसूत्रवृत्तिः ।

२ ॥प्रभाकरचन्द्रतत्वदीपिका ।

३ ॥लघुसांख्यसूत्रवृत्तिः ।

४ ॥पातञ्जलिसूत्रवृत्तिः ।

५ ॥युक्ति मुक्तावली ।

६ ॥पदार्थ दीपिका ।

७ ॥परमार्थसारविवरणम् ।

**<u>अलंकारसाहित्यशास्त्रादिसम्बन्धिताः ग्रन्थाः</u>**

१ ॥ बृहतकाव्यप्रदीपोद्द्योतः ।

२ ॥लघुकाव्यप्रदीपोद्द्योतः ।

३ ॥गुरुमर्मप्रकाशः ।

४ ॥अलंकार सुधा ।

५ ॥षट्पदानन्दः ।

६ ॥चित्रमीमांसाखण्डन टीका ।

७ ॥रसमञ्जरी प्रकाशः ।

८ ॥रसतरङ्गिणी टीका ।

९ ॥उदाहरण दीपिका ।

१० ॥तिलक टीका ।

<u>**स्तोत्रसम्बन्धिताः ग्रन्थाः**</u>

१ ॥सेतु टीका ।

२ ॥दुर्गा सप्तशतीस्तोत्रटीका ।

३ ॥गीत गोविन्द टीका ।

४ ॥ सुधालहरी टीका ।

५ ॥ चण्डीस्तोत्र टीका ।

६ ॥ चण्डीस्तोत्र विधि ।

७ ॥चण्डीस्तोत्र प्रयोग व्याख्यानम् ।

८ ॥चण्डीविधानम् ।

९ ॥ लक्षण रत्नमाला टीका ।

१० ॥चण्डीपाठ टीका ।

११ ॥देवीमाहाम्य टीका ।

१२ ॥सप्तशती मन्त्र विभागः ।

१३ ॥ सप्तशतीपाठ पूजा पद्धतिः ।

**धर्मशास्त्रसम्बन्धिताः ग्रन्थाः**

१ ॥त्रिस्थली सेतुः ।

२ ॥काशीमाहाम्य संग्रहम् ।

३ ॥तिर्थेन्दुशेखरः ।

४ ॥कुण्डपद्धतिः ।

५ ॥आचारेन्दुशेखरः ।

६ ॥कालेन्दुशेखरः ।

७ ॥व्याससूत्रेन्दुशेखरः ।

८ ॥श्राद्धेन्दुशेखरः ।

९ ॥ प्रायश्चित्तेन्दुशेखरः ।

१० ॥प्रायश्चित्तसारसंग्रहः ।

११ ॥व्रात्यता प्रायश्चितनिर्णयः ।

१२ ॥गोत्रप्रवरनिर्णयः ।

१३ ॥आशौचनिर्णयः ।

१४ ॥इष्टिकाल निर्णयः ।

१५ ॥अष्टश्लोकी सापिण्ड्यमञ्जरी ।

१६ ॥उपाकर्मवादः ।

१७ ॥आशौचनिर्णयसंग्रहः ।

**<u>ज्यौतिषशास्त्रसम्बन्धिताः ग्रन्थाः</u>**

१ ॥तिथीन्दुशेखरः ।

२ ॥तिथि निणर्येन्दुशेखरः ।

३ ॥तिथि निर्णयः ।

४ ॥एकादशी निर्णयः ।

५ ॥ग्रह प्रबोधः ।

६ ॥ग्रहप्रबोधसरणि ।

७ ॥पर्वाधिकारः ।

८ ॥पर्व निर्णयः ।

**<u>तन्त्रसम्बन्धिताः ग्रन्थाः</u>**

१ ॥कात्यायनी तन्त्रम् ।

२ ॥कात्यायनी तन्त्र चण्डी पाक प्रकरणम् ।

३ ॥प्रयोग सरणी तन्त्रम् ।

४ ॥प्रयोगसरणिः ।

५ ॥इन्द्रजालविधानम् ।

**<u>गीताकोषप्रकीर्णादि सम्बन्धिताः ग्रन्थाः</u>**

१ ॥ रामगीता टीका ।

२ ॥अमर टिप्पणम् ।

३ ॥वेदेसूक्तभाष्यम् ।

४ ॥नागेशीयव्याख्या ।

५ ॥नागेशविवरणम् ।

# द्वितीयोऽध्यायः

## सूत्रस्य स्वरूपम्

व्याकरणशास्त्रे महर्षिपाणिनेर्लक्षणात्मिकाऽष्टाध्यायी अद्वितीया कृतिरस्ति। तत्र चतुस्सहस्त्राणि सूत्राणि प्रतिपादितानि सन्ति। अस्यामष्टाध्याय्यां न हि सर्वाण्येव सूत्राणि पाणिनिनैव निर्मितानि, किन्तु पूर्वाचार्यैः रचितानि सूत्राणि पाणिनिना अविकलं समुपन्यस्तानि।

अथ किमिदं सूत्रं नाम ? इति प्रश्नस्य समाधानं दीयते- वेष्टनार्थकात् सूत्र धातोः अदन्तान्नित्यचौरादिकण्यन्तात् करणे बाहुलकात् घञ् प्रत्यये, सूत्र्यते, विशिष्टोऽर्थः परिवेष्ट्यते येन विलक्षणेन शब्दराशिना तत्सूत्रम्। शब्दविशेषे योगरूढोऽयं सूत्रशब्दः "पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च" , " बलकुसुमशुल्बपत्तनरणाभिधानानि"[४६] इति। लिङ्गानुशासनीयसूत्रानुसारं पुंनपुंसकोभयलिङ्गः, तत्र नपुंसकमित्यधिकारात्। तथापि अद्यत्वे प्रचुरलोकव्यवहारतः नपुंसक एव प्रयुज्यते। सूत्रशब्दोऽयं नानार्थकः। यथा- वस्त्वारम्भकतन्तुषु सूत्रशब्दः प्रयुज्यते, एवमेव दार्शनिकनिकाये "सूत्रात्मा हिरण्यगर्भः" इत्यादिकव्यवहारेण स्थूलसृष्टेः कारणात्मनि सूक्ष्मतत्त्वेऽपि सूत्रशब्दः प्रसिद्धः। व्याकरणमहाभाष्ये भगवता पतञ्जलिना सूत्रमेव व्याकरणमिति प्रतिपादितम्। व्याकरणस्य सूत्रमित्यत्र "व्याकरण" पदेन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते। "सूचनात् सूत्रमिति सूत्रशब्दस्य व्युत्पत्तिः"[४७] । सूत्रत एव शब्दाः प्रतिपद्यन्ते, अतः शब्दाप्रतिपत्ति रूपो दोषोऽपि नाऽस्ति। अतः सूत्रत एव शब्दानां निष्पत्तिर्भवति। उक्तञ्च –

"सूत्रेष्वेव तत् सर्वं यद् वृत्तौ यच्च वार्तिके ॥" इति ॥

---

[46] लिङ्गानुशासनम् , नपुसंकलिङ्गाधिकारः पृ ४३

[47] सूचनात् सूत्रणाच्चैव…सूत्रस्थानं प्रचक्षते। सुश्रुत सूत्रस्थान ३

व्याकरणशास्त्रे एकलक्षणमुखेनाऽनेकलक्ष्याणां संग्रहः सूत्रद्वारा विधीयते। परमत्र सूत्रशब्दस्यानेकार्थत्वात् कोऽर्थोऽभिप्रेतो निबन्धकारस्येति जिज्ञासायां शब्दार्थविषयके सन्देहे तात्पर्यार्थनिर्णायकत्वेन हेतुतया प्रमाणभूतत्वे नैकार्थनियन्त्रकं भर्तृहरिवाक्यमनुस्मर्यते। यथोक्तं भर्तृहरिणा वाक्यपदीये –

संसर्गो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥[४८] इति॥

इत्युक्तदिशा प्रकरणाद्यनुरोधात् शब्दराशिविशेष एव सूत्रशब्दस्य तात्पर्यमवगन्तव्यम्। अतश्च विशिष्टार्थविशेषबोधकोऽल्पीयान् शब्दराशिः सूत्रमिति योगरूढ्या निष्पन्नमर्थं ज्ञात्वा सूत्रस्य लक्षणमपि अन्तर्निरूढं वेदितव्यम्। उक्तञ्च शिष्टैः–

"अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥"[४९] इति॥

अत्र लक्षणे असन्दिग्धमित्यनेन संशयभ्रमाद्यजनकत्वमुक्तम्। अत्र प्रमाजनकत्वमर्थत आयाति। अत एव प्रमाणभूतः शब्दः सूत्रमिति लब्धम्। तत्र च यतोऽल्पीयान् शब्दो भवेत्, स एव ग्राह्यः। सारवदित्यनेन गम्भीरार्थबोधकता, विश्वतोमुखमित्यनेन नानार्थकतापि लभ्यते। अस्तोभमित्यनेन स्तोभरहितम्, स्तोभश्चानर्थकः शब्दः, यथा सामवेदे "हाऊइ हाऊइ" इत्यादि। अनवद्यमित्यनेन गर्हितार्थराहित्यमिष्यते, एवञ्च सारवदित्यस्यैवेदं विवरणद्वयमस्तोभमनवद्यञ्चेति। न हि स्तोभस्य (प्रमादाद्युच्चरितस्य) अनवद्यस्य निन्दितार्थकस्य सारवत्ता वक्तुं शक्यते

---

48 वाक्यपदीयम्० २.३१५-३१६

49 वायुपुराणम्

केनचिदपि मनीषिणा। अतश्च प्रसक्तगम्भीरार्थविषयप्रमाजनकत्वे सति नानप्रयोजकत्वे च सति सर्वतोऽल्पीयान् वाक्यविशेषः सूत्रमिति सूत्रलक्षणं पर्यवस्यति। यथा- "इको यणचि" (६-१-७७) इति व्याकरणसूत्रम्। अत्र अजव्यवहितपूर्वत्वविशिष्टस्य इकः स्थाने यण् भवति, यण्घटितश्च शब्दः साधुर्भवति, स एव प्रयोक्तव्य इत्येवं यः प्रसक्तगम्भीरश्च वाक्यार्थस्तद्विषयकप्रमाजनकत्वमस्य सूत्रस्य, दृष्टादृष्टोभयविधप्रयोजनकत्वेन चास्य विश्वतोमुखत्वमपि सिद्ध्यति। "सुद्ध्युपास्यः", "मद्ध्वरिः" इत्यादि प्रयोगाणां साधुत्वज्ञापनं दृष्टफलम्, एकः अक्षरः सम्यग् ज्ञातः...... श्रुत्युक्तमदृष्टफलम्। सोच्चारणजन्यमपि फलमदृष्टमेव। उक्तञ्च महाभाष्ये भगवता पतञ्जलिना- 'वेदाङ्गभूतानां व्याकरणादीनां पुनः पुनरुच्चारणेन पुष्यात्मकं फलं बहुत्र, यथा पुष्यजननाय साधुभाषितव्यं पापजननायासाधुभिः'[५०] एवमेव "अथातो धर्मजिज्ञासा"[५१] इति मीमांसासूत्रे, "जन्माद्यस्य यतः"[५२] इत्यादि वेदान्तसूत्रे, "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[५३] इत्यादि न्यायसूत्रे च मदुक्तलक्षणं निर्बाधं समन्वेति। एतच्च सूत्रं शिष्टैः षड्विधमुपवर्णितम्।

तथा हि-

"संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते॥" इति॥

## सूत्रस्य षट्प्रकारः

---

[50] महाभाष्य पस्पशाह्निकम्

[51] मी०सू० १-१-१

[52] ब्र०सू० १-१-२

[53] न्या०सू० १-१-३

सूत्राणि षट्प्रकारकाणि भवन्ति। कानिचित् संज्ञारूपाणि, कानिचित् परिभाषारूपाणि, कतिचन च विधिरूपाणि कानिचित् पुनः नियामकानि भवन्ति। अतिदेशात्मकान्यपि कतिचन भवन्ति, तथैव च अधिकाररूपाण्यपि सूत्राणि भवन्ति।

## संज्ञासूत्रम्

संज्ञा च नाम यतो न लघीयः, अथवा शक्तिग्राहकत्वं संज्ञासूत्रत्वम्। संज्ञासूत्राणि यथा – "वृद्धिरादैच्" (१-१-१) , "अदेङ् गुणः" (१-१-२), "हलन्त्यम्" (१-३-३) इत्यादि। संज्ञासूत्राणि, संज्ञाशास्त्रं वा व्याकरणशास्त्रे प्रयुज्यमानानि पारिभाषिकपदानि बोधयन्ति। प्रातिपदिक (१-२-४५) , सर्वनाम (१-१-२६) , अव्यय (१-१-३६), टि (१-१-६३), घु (१-१-१९), वृद्धि (१-१-१), गुण (१-१-२), उदात्ता ( १-२-२९), अनुदात्त ( १-२-३०), स्वरित (१-२-३१) प्रभृतयः संज्ञाः व्याकरणशास्त्रे कथं प्रयुक्ताः? तासां संज्ञानां शास्त्रे कोऽर्थः। इत्यादिज्ञानमपि विधिशास्त्रस्याऽर्थबोधस्यैव द्वारम्। संज्ञा तावद् द्विविधा – शब्दसंज्ञा, अर्थसंज्ञा चेति भेदात्। वृद्धि - गुण प्रभृतयः संज्ञाः शब्दसंज्ञाः, विभाषा लोपादयोऽर्थसंज्ञाः। तथा च काश्चन अन्वर्थसंज्ञाः, काश्चन चाऽनन्वर्थसंज्ञाः। सर्वनामाऽव्यय प्रभृतयः संज्ञा अन्वर्थसंज्ञाः, यतो हि प्रधानसिद्धाः सर्वार्थवाचकाः सर्वविश्वप्रभृतयः शब्दा एव प्रातिपदिकानां स्थाने प्रयुक्तत्वात् सर्वनामान्युच्यन्ते। सर्वनामत्वार्थं सर्वादिगणे पाठने सह प्रधानसिद्धस्वीयसर्वार्थवाचकताऽप्यत्यावश्यकी प्रतीयते। अधिकरण , टि, घु प्रभृतयः संज्ञा अनन्वर्थसंज्ञाः सन्ति।

## परिभाषासूत्रम्

अनियमे नियमकारित्वं परिभाषासूत्रत्वम्। अर्थात् अनियमे नियमकारकं परिभाषासूत्रं भवति। तदुक्तं भगवता पतञ्जलिना –

"परिभाषा पुनरेकदेशस्था (सती)

सर्वं शास्त्रमभिज्वलयति प्रदीपवत्॥"[५४] इति॥

"परितो भाष्यतेऽनया"[५५] इति व्युत्पत्या "परिभाषा" शब्दः व्युत्पन्नः। श्री नागेशभट्टो व्याकरणमहाभाष्ये उद्योतटीकायां वदति-

"एकदेशस्थिता शास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते॥" [५६] इति॥

काशिकादिग्रन्थेषु "अनियमे नियमकारिणी परिभाषा" इति लक्षणमुपलभ्यते। "परिभाषेन्दुशेखर" ग्रन्थस्य "विजया" टीकायां श्री पं. जयदेवमिश्रेणोक्तम् – "विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगि साधुत्वाप्रकारक शक्त्यविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं परिभाषात्वम्।" [५७]

श्री पं. सभापतिशर्मोपाध्यायमहाभागा सिद्धान्तकौमुद्याः "लक्ष्मी" टीकायां स्वीकुर्वन्ति यत् – "परिभाषात्वञ्च- सङ्केत ग्राहकाभिन्नत्वे सति विधिशास्त्रविशिष्टत्वम्। वैशिष्टयञ्च अननुवृत्या स्वजन्यप्रमात्मकबोधापकारकत्वस्वप्रवृत्तिनिवृत्त्यन्यतरप्रयोजकत्व-विशिष्टपाणिनिप्रयत्नन्यायान्तरसिद्धत्वान्यतरसम्बन्धेन। अननुवृत्त्येति निवेशेनाधिकार-व्यवच्छेदः। आद्यसम्बन्धेनाऽष्टाध्यायीस्थपरिभाषाणां संग्रहः। द्वितीयेन न्याय-ज्ञापकसिद्धानाम् 'अनुदात्तम् पदमेकवर्जम्' इत्यादेश्च संग्रहः।"[५८]

परिभाषा द्विविधा – पाणिनिना अष्टाध्याय्यां पठिताः परिभाषाः, अन्यैः वैयाकरणैः कृताश्च। तादृशानि परिभाषासूत्राणि प्रथमश्रेण्यामागच्छन्ति। यथा – "आदेः परस्य"

---

54 महाभाष्य- उद्योतम् -२.१.१

55 काशिका Vol-1- 72-73p

56 महाभाष्य उद्योतम् -२.१.१

57 परि०विजया०टीका पृष्ठ ५

58 सि०कौ० लक्ष्मी ० टीका पृष्ठ १२

( १-१-५३), "इको गुणवृद्धी" (१-१-३) इत्यादि द्वितीयश्रेण्यां परिभाषामाश्रित्य कृता ग्रन्थाः परिभाषापाठादयो ग्रन्थाः समाविशन्ति। येषां पाणिनीयसूत्राणां यथाकालं यथोद्देशं च सम्पूर्णेऽपि व्याकरणशास्त्रे नियमकारित्वेनोपस्थितिर्भवति, तानि परिभाषासूत्राणीति वैयाकरणा वदन्ति। पाणिनिना अष्टाध्याय्यां प्रायेण पञ्चाशन्मिमतानि परिभाषासूत्राणि प्रणीतानि। परिभाषाणामिदमेव कार्यं भवति यद् व्याकरणशास्त्रे दृष्टस्याऽनियमस्य दूरीकरणम्। यथा-"तस्मिन्निति निर्दिष्टे पूर्वस्य" (१-१-६५) "तस्मादित्युत्युत्तरस्य" (१-१-६६) प्रभृतीनि परिभाषासूत्राणि।

## विधिसूत्रम्

लक्ष्यविषयकापूर्वसंस्कारविषयकबोधजनकत्वं विधिसूत्रत्वम्। यथा –"इको यणचि" ( ६-१-७४), "आद् गुणः" ( ६-१-८४) इत्यादि। विधिसूत्रं मुख्यतया द्विविधं भवति- उत्सर्गविधिः, अपवादविधिश्चेति भेदात्। सामान्यतया कस्यचन कार्यस्य प्रत्ययादेर्वा–विधायकत्वमुत्सर्गविधिरुच्यते। यथा-"कर्मण्यण्" ( ३-२-१ ) इति उत्सर्गविधिसूत्रम्। तादृशं विधायकसूत्रमपवादविधिरित्युच्यते यद् विशिष्टरूपेण कस्यचन कार्यस्य प्रत्ययस्य वा विधायकं स्यात्। यथा-"आतोऽनुपसर्गे कः"(३-२-३)। सूत्रमिदं अनुपसर्गे कर्मण्युपपदे आदन्ताद् धातोः 'क' प्रत्ययं विदधाति। अतः सूत्रमिदम् "कर्मण्यण्" इति सूत्रस्याऽपवादो मन्यते, यतो हि "कर्मण्यण्" कर्मण्युपपदे धातुमात्राद् अण् प्रत्ययं विदधाति। अनेन प्रतीयते यद् उत्सर्गविधेः क्षेत्रं विस्तृतं भवति, अपवादस्य च क्षेत्रं तदपेक्षया विशिष्टं संकुचितं वा भवति। अतः प्रायेण आदेशादिविधायकानि सर्वाण्यपि सूत्राणि उत्सर्ग–अपवादभेदेन द्विविधानि। यथा-"इको यणचि" इति सूत्रम् यदि उत्सर्ग – आदेशविधायकं सूत्रम् "अचि परे इकः स्थाने यण् विदधातीदं सूत्रम्", तर्हि "अकः सवर्णे दीर्घः" (६-१-९७) इति अपवाद–आदेशविधायकं सूत्रं वर्तते। "अकः सवर्णेऽचि पूर्वपरयोर्दीर्घ एकादेशं विदधातीदं सूत्रम्" ।

## नियमसूत्रम्

सर्वत्र प्राप्तस्य विधेस्तदितराविषयत्वसङ्कोचनं नियमः। यथा-"कृत्तद्धितसमासाश्च" ( १-२-४६), "रात्सस्य" (८-२-२४ ) इत्यादि। सामान्यतया विधेय उद्दामप्रवृत्तौ नियन्त्रणं विधातुं यत् सूत्रं निर्मीयते यद् उच्यते नियमसूत्रम्। नियमसूत्रं विधिसूत्रस्य क्षेत्रं सङ्कुचितं विधाय तत् समुचितमार्गे प्रवर्तयति। अनेन विधेस्तदितरविषयत्वमतिप्रसङ्गो वा दूरीभवति। अपवादविधिविषये नियमसूत्रं तस्य किञ्चित् क्षेत्रं स्वायत्तीकृत्य स्वयं विधायकं भवति।

नियमसूत्रस्य नियमन्त्रणक्षेत्रं न केवलमुत्सर्गविधिः, अपवादविधिर्वा, अपितु, संज्ञापरिभाषाऽधिकारसूत्राण्यपि नियमयति नियमसूत्रम्। यथा- "धातोस्तन्निमित्तस्यैव" (६-१-७७) इति सूत्रं नियमसूत्रमस्ति। लव्यम्, अवश्यालाव्यम् इत्यत्र लो + यम् , अवश्य लौ + यम् इति स्थितौ "वान्तो यि प्रत्यये" (६-१-७६ ) इति सूत्रेण वान्तादेशः प्राप्नोति ,किन्तु ओयते , औयत इत्यत्रापि वान्तादेशस्याऽतिप्रसङ्गः। अतस्तं नियमयितुं सूत्रं भवति- "धातोस्तन्निमित्तस्येव" इति। सूत्रेणाऽनेन नियमो विहितो यद् यादौ प्रत्यये परतः धातोः ओकारस्य, औकारस्य वा वान्तादेशः स्याच्चेत् तदैव स्याद् यदि यादिप्रत्ययं निमित्तं मत्वा कृत आदेशः ओकारः, औकारो वा स्यात्। नियमेनाऽनेन "वान्तो यि प्रत्यये" इति सूत्रं नियन्त्रितम्। अत एव लो + य इति स्थितौ तस्य ओकारस्य वान्तादेशः अव् जातः। किन्तु " ओयते" इत्यत्र ओकारः यनिमित्तको नास्ति , अपितु आङ्पूर्वाद् वेञ् धातोर्लटि कर्मवाच्ये यकि आत्मनेपदे त प्रत्यये कृते सम्प्रसारणे पूर्वरूपे कृते आ उ य ते इति स्थितौ "आद्गुणः" इत्यनेन गुणे कृते ओकारो निष्पद्यते तत्र "य" निमित्तं नास्ति।

"नलोपः सुप्स्वर संज्ञातुग्विधिषु कृति"(८-२-२ ) इति सूत्रमपि नियमसूत्रम्। तद् वदति यत् सुब्विधिस्वरविधिसंज्ञाविधिषु कृति प्रत्यये च परतः तुग्विधौ कर्तव्ये नलोपोऽसिद्धो भवति। "पूर्वत्रासिद्धम्" (८-२-१) इति सूत्रेण नलोपकार्यस्याऽसिद्धत्वेऽतिप्रसङ्गवारणाय नियमसूत्रमिदम् "नलोपः सुप्स्वर" नियमयति यत् सुब्विधिप्रभृतिकार्याणां कर्तव्य एव नलोपोऽसिद्धः स्यान्नाऽन्यत्रेति। अत एव "राजाश्वः"

इत्यत्र "अकः सवर्णे दीर्घः" इत्यनेन सवर्णदीर्घे कर्तव्ये नलोपोऽसिद्धो न जातः। सुब्विधिप्रभृतिष्वेव नलोपोऽसिद्धो जातः। अतः " राजभिः" इत्यत्र "रामैः" इतिवद् "ऐस्" आदेशः, "राजाभ्याम्" इत्यत्र च "रामाभ्याम्" इतिवद् दीर्घो न जातः। नियमसूत्रं द्विविधम्- विधेयात्मकं, निषेधात्मकं चेति। उपर्युक्तेषूदाहरणेषु विधेयात्मकं नियमनं दृश्यते। "आकडारादेका संज्ञा" (१-४-१) इति विधेयात्मकं नियमसूत्रम्। "कडाराः कर्मधारये" (२-२-३८) इति सूत्रं यावदेकैव संज्ञा स्यादिति कथने विधेयात्मकतैव वर्तते। "पदान्तस्य" (८-४-३६) इति निषेधसूत्रम्। इदं "पदान्तस्य नस्य णत्वं न" इत्युक्त्वा णत्वनिषेधमुखेन अर्थात् - "रषाभ्यां नो णः समानपदे" (८.४.१) इति सूत्रेण, "अट्कुप्वाङ्नुम्व्यवायेऽपि" (८-४-२) इति सूत्रेण च प्राप्तं णत्वं निषिध्य पदान्तेतरनकारे णत्वविधिं नियमयति।

## अतिदेशसूत्रम्

अन्यधर्मस्याऽन्त्राऽरोपणमतिदेशः। यथा - "स्थानिवदादेशोऽनल्विधौ " (१-१-५५) तृज्वत् क्रोष्टुः" (७-१-९५) इत्यादि। अतिदेशसूत्रम् विधिसंज्ञाप्रभृतिसूत्राणां विषयं, कार्यक्षेत्रं वा विस्तारयति। "गुरुवद् गुरुपुत्रं वर्तितव्यम्" इति दृष्टान्तमाश्रित्य अतिदेशस्य कल्पना वर्तते। वस्तुतस्तु - वद्घटितत्वम् अतिदेशत्वम्। यत्र सूत्रे वार्तिके वा 'वत्' शब्दः वदर्थो वाऽनुप्रविष्टः, तद् "अतिदेश" नाम्नोच्यते। अतिदेशस्तावद् बौद्धिक आरोपः। स द्विविधः शाब्दिकः, आर्थिकश्च। "स्थानिवदादेशोऽनल्विधौ" इति सूत्रेण अतस्मिन् यस्तद्बुद्धिरारोप्यते सः "वत्" युक्तेन पदेन विधीयते। अत्रारोपे 'वत्' शब्दः श्रुतः, अत एवाऽयं "श्रुतातिदेश" इत्युच्यते। "असंयोगा ल्लिट् कित्" इति सूत्रे 'वत्' इति पदं नाऽस्ति। अतोऽतिदेशोऽयमार्थोऽतिदेश इत्युच्यते, यतो हि अपित् लिट् तु किद् न भवितुमर्हति। अतस्तस्याऽर्थः किद्वद् कर्तव्यः स्यात्। "वत्" शब्दमन्तरेणाऽपि 'वत्' इत्यर्थस्य प्रतीतेस्तादृशोऽतिदेश " आर्थाऽतिदेश" उच्यते।

नियमसूत्रम्, प्रतिषेधसूत्रं तु विधिविषयं क्षेत्रं वा संकोचयतः, किन्तु, अतिदेशसूत्रं विधिविषयं विस्तारयति। अतिदेशाः त्रिविधाः- संज्ञातिदेशः, स्थान्यतिदेशः, युक्तातिदेशः

इति। संज्ञातिदेशो यथा - "सार्वधातुकमपित्" (१-२-४) इति सूत्रेण ङिद्वद् अतिदेशः इत्यादि। स्थान्यतिदेशो यथा - " स्थानिवदादेशोऽनल्विधौ " इति सूत्रेण स्थानिवदादेशः। युक्तातिदेशो यथा- "लुपि युक्तवद् व्यक्तिवचने" (१-२-५१) इति सूत्रम्। कार्यदृष्ट्या अतिदेशः-शास्त्रातिदेशः, कार्यातिदेशः, रूपातिदेशश्चेति भेदात् त्रिविधः। शास्त्रातिदेशे शास्त्राणामतिदेशो भवति , सूत्राण्येव कार्याणि कुर्वन्ति। किन्तु कार्यातिदेशे अतिदेश एवाऽपेक्षितं कार्यं विदधाति। अतिदेशः कार्यातिदेशपक्षीयाणां मतानुसारेण विधिमतिक्रम्य वर्तते। "प्रत्ययलोपे प्रत्ययलक्षणम्" (१-१-६१) इति कार्यातिदेशस्य उदाहरणम्। अत एव तस्य सूत्रस्याऽयमर्थः कृतो यत् - "प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्याद्" इति। "स्थानिवदादेशोऽनल्विधौ" इति शास्त्रातिदेशस्योदाहरणम्। अत एव श्रीभट्टोजिदीक्षितमहोदयेन सिद्धान्तकौमुद्यामुक्तम् यद् 'रामाय' इत्यत्र अनेन सूत्रेण स्थानिवद्भावात् यादेशे सुप्त्वं स्वीकृतम् , तथा च 'सुपि च' (७-३-१०२) इत्यनेन दीर्घो जातः। "द्विर्वचनेऽचि" (१-१-५८) इति सूत्रं पतञ्जलिजयादित्यवामनादयो वैयाकरणा रूपातिदेशत्वेन स्वीकुर्वन्ति। यथा- "चक्रतुः" इत्यत्र कृ+अतुस् इति स्थितौ यणि कृते क्र+अतुस् इति स्थितौ धातौ अचोऽभावाद् द्वित्वाभावो भवति। तस्यां स्थितौ "द्विर्वचनेऽचि" इति सूत्रेण रूपातिदेशे कृते 'कृ' आगच्छति, द्वित्वं च जायते। अत एव अभ्यासे अचः श्रवणं जायते।

## अधिकारसूत्रम्

अधिकारसूत्रस्य लक्षणं भवति - उत्तरोत्तरगमनमधिकारः। यत् सूत्रम् निश्चितावधिपर्यन्तमुत्तरसूत्रेषु गच्छति तद् अधिकारसूत्र नाम्नोच्यते। अधिकारः सम्पूर्णसूत्रस्य, सूत्रांशपदस्य, पदैकदेशस्य वा भवति। वस्तुतस्तु- स्वप्रदेशे लक्ष्यसंस्कारविषयकबोधाजनकत्वे सति उत्तरसूत्रानुवृत्त्या लक्ष्यसंस्कारविषयक-बोधजनकत्वमधिकारसूत्रत्वम्। यथा "अङ्गस्य" (६-४-१) "भस्य" (६-४-१२९ ) इत्यादि।

अधिकारसूत्राणां व्यापकतामङ्गीकृत्य भाष्यकृता पतञ्जलिना अधिकारसूत्राणि त्रिधा विभक्तानि-

१. कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति। यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति।

२. अपरोऽधिकारो यथा रज्वायसा वा बुद्धं काष्टमनुकृष्यते तद्वदनुकृष्यते।

३. अपरोऽधिकारः प्रतियोगं तस्याऽनिर्देशार्थ इति योगे योगे उपतिष्ठते।

"धातोः" "अङ्गस्य" इत्यनयोरधिकारसूत्रयोः सम्पूर्णस्याऽधिकारः उत्तरसूत्रेषु गच्छति। "धातोः" इत्यस्याधिकारः तृतीयाध्यायपर्यन्तम् "अङ्गस्य" इत्यधिकारः सप्तमाध्यायपर्यन्तमस्ति। "इको यणचि" इति सूत्रस्य "अचि" इति पदमग्रे अनुवर्तते। एतानि सूत्राणि पदाधिकारस्योदाहरणत्वेन स्वीकर्तुं शक्यन्ते। पदैकदेशस्याऽनुवृत्तेरुदाहरणमस्ति - "संख्याव्ययादेर्ङीप्" (४-१-२६) इति। अस्मात् "दामहायनान्ताच्च" (४-१-२७) इति सूत्रे संख्यादिग्रहणमनुवर्तते। "झोऽन्तः" (७-१-३) इति सूत्रे "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" (७-१-२) इति सूत्रात् प्रत्ययग्रहणमनुवर्तते। अत्रेदमेव कारणम् यत् पाणिनिना अष्टाध्याय्यां "स्वरितेनाधिकारः" इति सूत्रे अधिकारस्य कृते स्वरितत्त्वप्रतिज्ञा विहिता। इदमस्ति परिभाषासूत्रम्। स्वरितत्त्वप्रतिज्ञया न केवलमनुवृत्तिर्भवति, किन्त्वपकर्षोऽपि जायते। अतः "उत्तरोत्तरगमनमधिकारः" इति लक्षणं प्रायिकमेव मन्तव्यम्। एवं प्रकारेण भगवता पाणिनिना अष्टाध्यायां षड्विधसूत्रमुखेन लघुनोपायेन शब्दोपदेशो विहितः।

## परिभाषाशब्दस्य अर्थः

परितो भाष्यते कार्यमनया इति व्युत्पत्त्या परीत्युपसर्गपूर्वक भाष व्यक्तायां वाचीत्यस्माद्धातोः "गुरोश्च हलः" (३-३-१०३) इत्यनेन सूत्रेण अप्रत्यये ततः टापि

परिभाषा इति रूपं सिध्यति। तथाहि पदमञ्जरीकारेण हरदत्तमिश्रेन उक्तम् - "परितः सर्वत्र पूर्वत्र परत्र व्यवहिते नान्तरे च भाष्यते कार्यमनया सा परिभाषा" [५९] । महर्षिदयानन्दस्वरसतीमहाभागेन पारिभाषिक इति नामकग्रन्थे परिभाषाविषये उक्तम् -

" परितो व्यापृतां भाषां परिभाषा प्रचक्षते "[६०] इति ॥

श्रीनागेशभट्टेन उद्योत टीकायां वदति एकदेशस्थिता [६१] इति परिभाषा। काव्यप्रकाशटीकायां चण्डीदास "पदार्थविवेचकाचार्याणां युक्तियुक्ता वागेव परिभाषा" [६२] इत्युवाच। मुग्धबोधटीकायां दुर्गादासः ग्रन्थस्य "संक्षेपनिर्वाहार्थसङ्केतविशेषः परिभाषा" [६३] इत्याह। यद्यपि शब्दस्यास्य प्रयोगः अष्टाध्याय्यां न लभ्यते तथापि पाणिनिना शताधिकपरिभाषासूत्राणि प्रणीतानि। तन्त्रेऽस्मिन् "अनियमे नियमकारिणी परिभाषा" [६४] इत्युच्यते। वार्तिककारस्तु "स्वरितेनाधिकारः" इत्यस्मिन्सूत्रे "अन्यनिर्देशस्तु निवर्तक- स्तस्मात् परिभाषा इत्याह। महाभाष्यकारेण उक्तम् - कः पुनरधिकार-परिभाषयोर्विशेषः? अधिकारः प्रतियोगं तस्य निर्देशार्थ इति योगे योगे उपतिष्ठते। परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलति प्रदीपवत् इत्यस्ति [६५] । एवञ्च विध्यादिसूत्रक्षेत्रविस्तरकारिणी सङ्कोचकारिणी वा परिभाषा इति फलितम्।

## परिभाषाणां भेदाः

---

59 काशिका Vol-1- 72-73p

60 पारिभाषिक पृ. आर्य साहित्य मण्डल , अजमेर , राजस्थान , सं २०१२

61 महाभाष्य उद्योतम्-२.१.१

62 श०क vol. 3 पृ०सं ६२

63 श०क vol. 3 पृ०सं ६२

64 काशिका० १.१.३

65 महाभाष्य प्रदीपम्- १.१, सूत्र ४८, आ ८

परिभाषा द्विविधाः - पाणिनीयादिशास्त्रेषु सूत्ररूपेण पठिताः, अन्यसूत्रादितो ज्ञापिताः न्यायसिद्धप्रभृतयः। "परिभाषापाठ" शब्देन वैयाकरणनिकाये द्वितीयविधानां नियामकवचनानामेव ग्रहणं विधीयते। द्वितीयविधाः परिभाषाः सूत्रपाठाद् बहिर्भूताः सत्योऽपि सूत्रेण ज्ञापितत्वात् सूत्रकारद्वारा तन्नियमानां स्वीकृतत्वात्, न्यायसिद्धाश्च परिभाषाः लोकविदितत्वात्ताः सूत्रवत् प्रमाणत्वेन स्वीक्रियन्ते। तत्र च सूत्रवदसिद्धादीनि कार्याणि जायन्ते।

तादृश्यः परिभाषाश्चतुर्विधाः सन्ति - ज्ञापिता वा ज्ञापकसिद्धा, न्यायसिद्धा, वाचनिकी, मिश्रिता चेति भेदात्।

१. ज्ञापकसिद्धाः परिभाषाः ता उच्यन्ते याः केनचित् सूत्रेण ज्ञाप्यन्ते। यथा - "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् "[६६]।

२. न्यायसिद्धाः परिभाषाः ता उच्यन्ते या लौकिकन्यायानुकूलाः स्युः। यथा - "गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः"[६७]।

३. वाचनिक्यः परिभाषाः ता उच्यन्ते या न तु सूत्रज्ञापिताः, न वा न्यायसिद्धाः, अपितु आचार्याणां वचनरूपाः। वाचनिक्यः परिभाषाः द्विविधा विभज्यन्ते- परिभाषारूपेण स्वीकृतानि वार्तिककारवचनानि, परिभाषारूपेण स्वीकृतानि भाष्यकारवचनानि चेति। यथा -यस्मिन्विधिस्तदादावल्ग्रहणे [६८]।

४. मिश्रिताः परिभाषाः ता उच्यन्ते यासां परिभाषाणामेकदेशः सूत्रकारेण ज्ञाप्यते एकदेशश्च न्यायसिद्धः अथवा एकदेशः पूर्वाचार्यैर्वचनरूपेण पठिताः।

## परिभाषाणां मूलम्

---

[66] परिभाषा सूत्र १

[67] परिभाषा सूत्र १५

[68] परिभाषा सूत्र ३३

परिभाषाणां मूलविषये निश्चितरूपेण किमपि वक्तुं न शक्यते, किन्तु, सामान्यतयेदं ज्ञायते यत् प्राचीनवैयाकरणानां सूत्रपाठानां विशिष्टवचनानि परिभाषाणां मूलमिति। तदुक्तम् सीरदेवेन - "परिभाषा हि न साक्षात् पाणिनीयवचनानि। किं तर्हि ? नानाचार्याणाम्।"[६९] तथैव पुरुषोत्तमदेवेनाऽप्युक्तम्। एवमेव कैयट-हरदत्त-सायाणाचार्याः अपि पूर्वाचार्यवचनानां परिभाषाणां मूलं स्वीकुर्वन्ति। पाणिनीयाऽष्टाध्याय्यां यद्यपि परिभाषा शब्दस्य प्रयोगो न परिदृश्यते, तथापि वार्तिककारः कात्यायनः परिभाषा शब्दं प्रयोगं कृतम्। "अणुदित् सवर्णस्य चाप्रत्ययः" (१-१-६८) इति सूत्रं परिभाषासूत्रं सिद्धयति। कात्यायनः "स्वरितेनाधिकारः" (१-३-११) इति सूत्रमपि परिभाषासूत्रं मनुते - अन्यनिर्देशस्तु निवर्तकस्तस्मात् परिभाषा। श्रीहरदत्तेन भाष्यकारस्य वचनं समर्थयता परिभाषाविषये उक्तम् -

" परितः सर्वत्र पूर्वत्र परत्र व्यवहिते
नान्तरे च भाष्यते कार्यमनया सा परिभाषा ॥" इति ॥

## प्राचीनानि परिभाषासुत्राणि

पाणिनिना अष्टाध्याय्यां शब्दानुशासनं नियमयितुं प्रायेण पञ्चाशन्मितानि परिभाषासूत्राणि प्रणीतानि , तानि विविधेषु अध्यायेषु पादेषु च विकीर्णानि। वार्तिककारेण कात्यायनेन प्रायेण एकचत्वारिंशन्मितानि वार्तिकानि प्रणीतानि, यानि परिभाषाप्राकृतिकवचनानि स्वीकर्तुं युज्यन्ते। प्राचीनकाले परिभाषाणामनेके आचार्याः प्रवक्तार आसन्। सम्प्रति श्रीनागेशभट्टप्रणीतः परिभाषेन्दुशेखरनामकग्रन्थः परिभाषाविषये प्रमुखस्थानं भजते। तत्र त्रिषु प्रकरणेषु १३३ परिभाषाः निर्दिष्टाः। एतस्मात् प्राक् विद्यमानाः ग्रन्थाः इमे -

१. व्याडिकृतपरिभाषासूचनानुसारि परिभाषापाठः।

---

[69] सीरदेवकृत परिभाषावृत्ति पृ०१८३

२. व्याडिसंगृहीतपरिभाषापाठः।

३. शाकटायनपरिभाषासूत्राणि।

४. चान्द्रपरिभाषासूत्राणि।

५. दुर्गसिंहविरचितकातन्त्रपरिभाषावृत्त्यनुसारि परिभाषापाठः।

६. भावमिश्रविरचितकातन्त्रपरिभाषावृत्त्यनुसारि परिभाषापाठः।

७. कातन्त्रपरिभाषासूत्राणि।

८. कालापपरिभाषासूत्राणि।

९. काशिनाथकृतजैनेन्द्रपरिभाषावृत्त्यनुसारि परिभाषापाठः।

१०. भोजदेवकृतपरिभाषासूत्राणि।

११. श्रीसिद्धहेमचन्द्रव्याकरणन्यायसंग्रहः।

१२. श्रीपुरुषोत्तमदेवकृतपरिभाषावृत्त्यनुसारिण्यः परिभाषाः।

१३. श्रीपुरुषोत्तमदेवकृतपरिभाषाः।

१४. श्रीनीलकण्ठदीक्षितविरचितपरिभाषावृत्त्यनुसारिण्यः परिभाषाः।

१५. श्री अग्निहोतृभास्करकृतपरिभाषाभास्करानुसारिण्यः परिभाषाः।

१६. श्रीशेषाद्रिसुधीकृत परिभाषाभास्करानुसारिपरिभाषाः।

## परिभाषाणां कार्यम्

व्याकरणशास्त्रे दृश्यमानाऽव्यवस्थानिवारणमेव परिभाषाणां प्रमुखं कार्यम्। अनियमितताया अव्यवस्थाया वा भेददृष्ट्या परिभाषाणामपि विविधानि कार्याणि भवन्ति। अनेकाः परिभाषाः व्याकरणशास्त्रे आवश्यकपदोपस्थितिमुखेन सूत्रार्थं व्यवस्थापयन्ति। यथा -तस्मिन्निति निर्दिष्टे पूर्वस्य (१-१-६६), तस्मादित्युत्तरस्य (१-१-६७) , प्रभृतीनि

परिभाषासूत्राणि , तथा च प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् [७०], यस्मिन् विधिस्तदादावल्ग्रहणे[७१] इत्यादि।

सुधी + उपास्यः इत्यत्र शङ्का भवति यदत्र इको यणचि इति सूत्रेण कस्मिन् अचि परतः कस्य इकः यण् स्यात्? कथं न सकारोत्तरवर्तिनः उकारस्य यण् भवति, धकारोत्तरवर्तिनि ईकारेऽचि परतः? अस्यां स्थितौ "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति परिभाषासूत्रं सूत्रार्थं व्यवस्थापयति तेन अव्यवहितपूर्वस्य इकः - अत्र 'उपास्य' इत्यस्य उकारेऽचि परतः तदव्यवहितपूर्वस्य 'सुधी' इत्यस्य धकारेत्तरवर्तिनः ईकारस्य 'इकः' यण् भवति। सकारोत्तरवर्तिन उकारस्य न यण् मध्ये धकारस्य व्यवधानात्। "प्रत्ययग्रहणे यस्मात् स विहितः" [७२] इति परिभाषा "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" (८-२-४२) इति सूत्रास्याऽर्थं व्यवस्थापयति। 'तीर्णा' इत्यत्र तकारस्य नकारो विधीयते , किन्तु 'दृषत्तीर्णा' इत्यत्र धातोस्तकारस्य नकारादेशो न भवति। एवंविधाः परिभाषाः शास्त्रत्वसम्पादिक्यः परिभाषाः 'पदविशेषोपस्थापिका' पदेनाऽपि व्यवहर्तुं युज्यते। 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' [७३] इति परिभाषा 'दाधा घ्वदाप्' इति सूत्रे 'घु' शब्देन घुसंज्ञक दा धातुना सह आगमयुक्तस्य दाधातोर्ग्रहणं कारयति , तेन 'नेर्गदनदः' इत्यादिसूत्रेण 'प्रणिददाति' इतिवत् 'प्रणिदापयति' इत्यत्रापि नस्य णत्वं कारयति। किन्तु अडागमयुक्त 'पा' ग्रहणापत्तौ "निर्दिश्यमानस्याऽदेशा भवन्ति" इति परिभाषाया सूत्रे षष्ठ्या निर्दिष्टस्य प्रकृतेरेव आदेशो भवति , तदा 'पा' मात्रस्यैव 'पिब' आदेशोऽभूत् 'अपिबत्' इति प्रयोगः सिद्धः। अत्रेदमेव तात्पर्यमवगन्तव्यम् यत् किञ्चिन्निमित्तीकृत्य कस्यचन विधेर्विधाने आगमविशिष्टस्य ग्रहणं भवति, किन्तु यत्र

---

70 परिभाषा सूत्र-२३

71 परिभाषा सूत्र-३३

72 परिभाषा सूत्र-३३

73 परिभाषा सूत्र-११

कस्यचन स्थाने आदेशविधानामिष्टम्, तत्र सूत्रे निर्दिश्यमानस्यैव पदस्याऽदेशो भविष्यति।

## परिभाषाणां लक्ष्यम्

विधिसंज्ञादिसूत्राणां प्रवृत्तौ अव्याप्ति-अतिव्याप्ति-असम्भवादि दोषनिवारणं परिभाषाणां प्रमुखं लक्ष्यमस्ति। "जराया जरसन्यतरस्याम्" (७-२-१०) इति सूत्रेण "निर्जरसौ" इति प्रयोगस्य सिद्धौ काठिन्यमागतम्, असम्भवदोषत्वात्। तत्र "येन विधिस्तदन्तस्य" (१-१-७२) इति परिभाषा, तस्य च तदन्तस्य, निर्दिश्यमानस्याऽदेशा भवन्ति[७४], एकदेशविकृतनन्यवत्[७५] इत्येताः परिभाषा अव्याप्तिदोषं दूरीकृतवन्तः। परा जयति सेना इत्यत्र "विपराभ्यां जेः" (१-३-१९) इति सूत्रेण आत्मनेपदप्राप्तिरूपोऽतिव्याप्तिदोषः। तस्य वारणाय "सहचरिताऽसहचरितयोः सहचरितस्यैव ग्रहणम्"[७६] इति परिभाषया विधीयते। "शतानि" इत्यत्र षट्संज्ञायाः "षड्भ्यो लुक्" (७-१-२२) इत्यस्य चाऽतिप्रसङ्गवारणं "सन्निपातलक्षणो विधिरनिमित्तं तद्विधातस्य"[७७] इति परिभाषया विधीयते। परिभाषायाः स्वीकरणे दोषा अपि आपतन्ति। दोषस्थितौ परिभाषाया अस्वीकरणात् परिभाषाणामनित्यत्वं स्वीकुर्वन्ति वैयाकरणाः। व्याडिपुरुषोत्तमदेव सीरदेवप्रभृतय आचार्याः स्वीकुर्वन्ति यद् ज्ञापकसिद्धा परिभाषा सर्वत्र न स्वीक्रियते। अर्थात् ज्ञापकसिद्धपरिभाषायाः सार्वत्रिकाभावो युक्तिसंगत एव। ज्ञापकसाधितमात्मनेपदं सर्वत्र न प्रयोज्यम्, विशिष्टप्रयोगदर्शनात् क्वचिदेव विधेयम्।

---

[74] परिभाषा सूत्र-१२

[75] परिभाषा सूत्र-३७

[76] परिभाषा सूत्र-११२

[77] परिभाषा सूत्र-८६

यत्र साधुशब्दानामनुशासने साहाय्यमपेक्ष्यते वा, तत्रैव परिभाषाणामाश्रयणं विधीयते। यत्र परिभाषाया आश्रयणे दोषस्तत्र परिभाषा आश्रयणं न विधीयते। यथा यत्र लवणप्रयोगेण कार्यं सिध्यति तत्र लवणमेव प्रयुज्यते। यथा सूपशाकादिषु। किन्तु यत्र शर्कराया कार्यं सिध्यति तत्र शर्करैव प्रयुज्यते। अतो अनित्यत्वादपि परिभाषा व्याकरणशास्त्रे शब्दाननुशासयितुमतीवोपकारिक्यः सहायिकाश्च भवन्ति।

## परिभाषेन्दुशेखरस्य वैशिष्ट्यम्

अतः व्याकरणशास्त्रे परिभाषाः अतिमुख्यं स्थानं वहन्ति लक्ष्यनिर्वहणे। तदधिकृत्य बहुभिः व्याकरणशास्त्रे कृतभूरिपरिश्रमैः वैयाकरणार्णवैः बहवः ग्रन्थाः आरचिताः। तत्र त्रिमुनिहृदयप्रदर्शकेषु परिभाषाग्रन्थेषु अद्वितीयः भवति अयं परिभाषेन्दुशेखरः। परिभाषेन्दुशेखरद्वारा परिभाषाणां स्वरूपं सुष्ठु प्रकाशितम्। प्रक्रियाप्रदर्शनवेलायां पाणिनिसूत्राणाम् अनियतप्रसक्तौ सञ्जातायां तां निराकृत्य नियमकारीणि परिभाषावचनानि। शब्दसाधुत्वनिरूपणे सूत्रार्थनिर्णये च आसां परिभाषाणामनिवार्य-स्थानमस्ति। ताः एताः परिभाषाः काश्चित् पाणिनिना साक्षात् कण्ठरवेण प्रोक्ताः। काश्चिच्च स्वनिर्देशादिभिः लिङ्गैः ज्ञापिताः। काश्चिच्च लोकन्यायसिद्धाः सन्ति। तासु ज्ञापकन्यायसिद्धानां परिभाषाणां व्याख्यानरूपतया अयं परिभाषेन्दुशेखरग्रन्थः नागेशेन प्रणीतः। तत्र ग्रन्थादौ प्राचीनव्याकरणतन्त्रे वाचनिकानि। अत्र पाणिनीये ज्ञापकन्यायसिद्धानि। भाष्यवार्त्तिकयोः उपनिबद्धानि यानि परिभाषा रूपाणि तानि व्याख्यायन्ते इति प्रतिज्ञातम्। का परिभाषा कुत्र प्रवर्तते ? कुत्र न अत्र किं प्रमाणम्? इत्यादयः अंशाः सुष्ठु प्रतिपादिताः। शास्त्रत्वसम्पादकभ बाधबीजकथनशास्त्रशेषनामके प्रकरणत्रये १३३ परिभाषाः व्याख्याताः। प्राचीनैः लक्ष्यसाधकत्वेन अङ्गीकृतानां कासाञ्चित् परिभाषाणां भाष्याशयविरुद्धत्वं प्रतिपाद्य ताः परिभाषाः नागेशेन खण्डिताः। तत्साध्यलक्ष्याणाञ्च प्रकारान्तरेण साधनञ्च तत्रैव निरूपितम्।

## परिभाषेन्दुशेखरस्य प्रकरणत्रयम्

अस्मिन् ग्रन्थे त्रीणि प्रकरणानि सन्ति। यथा शास्त्रत्वसम्पादकं प्रथमम् , बाधबीजकथनं द्वितीयम् , शेषार्थकथनं तृतीयम्।

## शास्त्रत्वसम्पादकं प्रकरणम्

अस्मिन् प्रकरणे शास्त्रत्वसम्पादिकानां परिभाषाणां विषये प्रतिपादितमस्ति। अप्रामाण्यज्ञानानास्कन्दितबोधजनकत्वमेवन शास्त्रत्वम्। अप्रामाण्यज्ञानानास्कन्दितबोधेनैवेष्टानिष्टस्थलप्रवृत्तिनिवृत्ती क्रमेण भवतो लोकानाम्। पाणिनीयसूत्राणामपि प्रयोगसिद्धिसंसारे शाब्दिकैः शास्त्रत्वं शिरसोह्यते। परन्तु तेषु भूयसां परिभाषाभिरेव शास्त्रत्वमव्याहतं विलोक्यते। यथा "आत्महतः समानाधिकरणजातीययोः" इत्यस्य "महाचन्द्रः" इत्यत्रेष्टस्थले प्रवृत्तिः, "महद्भूतश्चन्द्रः" इत्यनिष्टस्थलान्निवृत्तिश्च "गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः" इति परिभाषासाहाय्यमन्तरा शब्दसिद्धिसाधुत्वबोधपरैः लक्षणैकचक्षुष्कैश्शाब्दिकैः सम्पादयितुं न शक्यते इति सिद्ध्यत्यस्याः शास्त्रसम्पादिकात्वम्। 'व्याख्यानतः' इत्यारभ्य 'एकदेशविकृतम्' इत्यन्तं प्रथमं प्रकरणमुच्यते।

## बाधबीजकथनं प्रकरणम्

प्रथमप्रकरणप्रतिपादिताभिस्ताभिः परिभाषाभिः सूत्राणां शास्त्रत्वे प्रतिष्ठापितेऽपि विचिकित्सा जायते यत् 'तिसृणाम्' इत्यत्र त्रयादेशतिस्रादेशविधायकयोर्द्वयोरपि शास्त्रत्वेन कस्य प्रवृत्तिः? द्वयोः प्रवृत्तौ त्वनिष्टं रूपमापद्यते ? "विप्रतिषेधे परं कार्यम्" इत्यनेन परत्वात् तिस्रादेशस्य प्रथमप्रवृत्तौ व्यवस्थापितायामपि पुनस्त्रयादेशः कथन्नेति शङ्का जागर्त्येव। तस्या निरासार्थम् "सकृद्गतौ विप्रतिषेधे" इत्यनया त्रयादेशस्य पुनर्बाधो बोध्यते। एवं पूर्वापेक्षया परस्य बलवत्त्वे व्यवस्थापितेऽपि परनित्यान्तरङ्गापवादानामुत्तरोत्तर बलवत्त्वव्यवस्था शास्त्रेण न सम्पाद्यत इति शास्त्रत्वसम्पत्तौ बाधचिन्ताया औचित्येन तदर्थम् 'परनित्यान्तरङ्ग' इत्यारभ्य 'उभयनिर्देश' इत्यन्तं बाधबीजाभिधं द्वितीयं प्रकरणम्।

## शास्त्रशेषकथनं प्रकरणम्

अस्मिन् प्रकरणे पाणिनीयसूत्राणां तात्पर्यं निर्धारितम्। प्रातिपादिकग्रहणे इति परिभाषाया अयस्कुम्भः इत्यत्र अयस्कुम्भी इत्यत्रापि सत्वं सम्पाद्यते। अन्यथा "अतः कृकमि" (८-३-४६) इति सूत्रे कुम्भशब्दस्योपादानादत्र सत्वं न स्यात्। तदर्थं अस्यां परिभाषायां प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणे सूत्रतात्पर्यमवगम्यते। प्रथमतन्त्रावशिष्टाः काश्चन परिभाषाः परिभाषाणां विषयविभागं विदधति, यथा विधौ परिभाषोपतिष्ठते नानुवादे ज्ञापकसिद्धं न सर्वत्र इत्यादयः। एवं काश्चन द्वितीयप्रकरणावशिष्टाः, यथा सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान्, निषेधाश्च बलीयांसः इत्यादयः। तथैव काश्चन परिभाषा अपि परिदृश्यन्ते याः सूत्राणि नोपकुर्वन्ति, न च परिभाषाणां विषयविभागं निर्दिशन्ति, परन्तु सूत्रघटकशब्दानामौचित्यानौचित्यचर्चा सम्पादयन्ति, यथा पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते इत्यादयः। अत एव शात्रशेषाभिधः तृतीयप्रकरणमिति उच्यते।

## विद्यमानपरिभाषाग्रन्थेषु परिभाषेन्दुशेखरस्य शेखरायमाणत्वम्[७८]

सुरसरस्वतीशब्दशास्त्रस्य तस्य तस्य सम्प्रदायस्य तैस्तैश्शाब्दिकशार्दूलैस्ते ते परिभाषाविषयका ग्रन्थाः शब्दशास्त्राकरग्रन्थान् पर्यालोच्य महताऽऽडम्बरेण महता च परिश्रमेण निरमायिषत। यद्यपि तेषां परितेऽवगहनेन, परिभाषाविषयक-तत्तद्व्याख्यानपर्यालोचनेन, लघुनि वाक्ये तावदर्थसमावेशपरिपाटीपाटवदर्शनेन च तेषां कोविदानां संस्कृतशब्दशास्त्रपरिशीलनबुद्धिवैभस्य पारकाष्ठा परिलक्ष्यते, तथापि परिभाषेन्दुशेखरस्तेषु सर्वतोभावेन शेखरायत इति मतिरुदेति तत्तत्परिभाषाग्रन्थ-परिशीलनवतां सचेतसां सुमनसाम्। ग्रन्थश्चायमात्मलाभकाल एव परां प्रतिष्ठां प्रापत्।

[78] हैम्मवतीटीका द्रष्टव्यम्।

सा च तथा बुद्धिमिता यद् नागेशनिर्णीताः परिभाषाविषयकाः सिद्धान्ता एव सर्वमान्याः समजनिषत्। परिभाषेन्दुशेखरनिर्माणकालमारभ्याद्यावधि केनापि मेधाविना विदुषा नागेशनिश्चितं परिभाषाविषयकं वस्तु मनागपीतस्ततो विधातुं साहसं कृतम्भवेदिति वक्तुं सुतरां दुश्शकम्। हेतुरत्रायं प्रतिभाति यत् ग्रन्थोऽयं समयस्य तस्य रचना लभ्यते यदा शब्दशास्त्रस्याकरग्रन्थानां सर्वतः परिशीलनेन, व्याकरणविषयमाश्रित्यानेक-मौलिकग्रन्थनिर्माणेन कोविदानामान्तेवासिनाञ्च परिषदि सततं प्रवचनेन च शब्दशास्त्रे नागेशेन परा प्रौढिः प्राप्तासीत् परिभाषेन्दुशेखरस्य पूर्णतः परिशीलनेन परितः प्रमाणयितुं पार्यते यदयं व्याकरणविषयकोऽन्तिमो ग्रन्थोऽप्रतिमप्रतिभस्य नागेशभट्टस्य। शब्दानुशासनस्य पदार्थबोधे विदुषोऽस्य महती प्रौढिरासीद् य्या स्वप्राग्वर्त्तिनां प्रायः समेषामप्याचार्याणां सिद्धान्ताः समालोचिताः प्रत्याख्याताश्च। किं बहुना सकलसम्प्रदायसुमनः सम्मानितसिद्धान्तो विश्वविश्रुतयशा महर्षिपतञ्जलिरप्यात्मनं व्याकरणसिद्धान्तस्थापने नागेशभट्टस्य एकदेशोक्ति प्रभृतिप्रहारात् रक्षितुं नाशकत्। अहो विधेर्विडम्बना? यदेतदन्तरं भरतभूस्तादृशेन सौभाग्येन नाश्चिता, येन शब्दशास्त्रविषयकमौलिकग्रन्थनिर्माता कश्चिदिमां भूषयेत् । तदाप्रभृत्यद्यावधि विबुधैरस्य ग्रन्थस्य यथायथमवगमाय व्याख्यानिर्माणप्रयत्न एवात्मनः परं गौरवमन्वभावि। यद्यपि परिभाषेन्दुशेखरस्य कतिपये व्याख्यातारो नागेशभट्टप्रस्थापितान् कतिपयसिद्धान्तान् प्रत्याख्यातुं भृशं प्रायतिषत, तथापि तेषां संख्याऽतीवाल्पीयसी। अथ च मेधाविनस्तेऽपि कियदशं यावत् सफलाः स्वचेष्टायामिति विद्वांस एव विदाङ्कुर्वन्तु। सूक्ष्मेक्षिकया निरीक्षणे प्रतीयते यत्ते मनाग् कमप्यपराधं विदधातो भीता इव तत्प्रयत्ने परिलक्ष्यन्ते। अत एव स्वाशय सम्भावितनागेशाशयमेवोपवर्षयन्ति। यथार्थता यत्र कुत्रापि तिष्ठतु, किन्त्वतिशयितनागेशविमर्शो न कोऽपि ततः परमद्यः यावज्जात इत्यत्र तु न केऽपि विप्रतिपत्तुमपि साहसं कुर्वन्ति। अत्र वस्त्वेकमुपेक्षणीयतां नार्हति यदस्य विदुषः स्वसिद्धान्तसमर्थने तथाऽऽग्रहिलताऽवलोक्यते, यतो बहोः कालादक्षुण्णतया प्रवहमाणा


अपि शब्दानुशासनसिद्धान्तास्तत्साधिका आकरयुक्तीरप्यन्यथा संयोज्यान्यथैव व्यवस्थाप्यन्ते। अत एव शाब्दिकानां पदार्थविमर्शविषय एष एव सिद्धान्त इति प्रतिपादयितुं महीयांसोऽपि विद्वांसो व्यामुह्यन्त इदं प्राचीनमतम्, इदञ्च नवीनमतमिति व्यवहरन्तो विलोक्यन्ते। परिपाटीयं न केवलं परिभाषेन्दुशेखर एव पर्यवलोक्यते, अपि तु नागेशस्य कोऽपि ग्रन्थोऽस्या अपवादो नास्ति। नागेशभट्टेन ग्रन्थनिर्माणे सूत्रशैली समाद्रियते। अथ च व्याख्यालेखनेऽपि काममभ्यस्ता सा क्वचनापि न परित्यज्यते, सैव परिभाषेन्दुशेखर उपयोजिता। अत एव पाणिनीयव्याकरणग्रन्थेषु परिभाषेन्दुशेखरस्य यावत्यो व्याख्याः सन्ति। न तावत्योऽन्येषाम्। यतो हि ग्रन्थस्यास्याध्ययने पदे पदे काठिन्यमनुभवन्तो दयालवो विद्वांसोऽन्तेवासिनामुपकारायाऽनेका व्याख्याः निर्मितवन्तः। परिभाषेन्दुशेखरप्रणयनप्रणालीपर्यवेक्षणेन पदे पदे प्रतीयते यत् प्रयोगसिद्धिसमये अन्तेवासिसमुद्भावितसमस्यासमाधानाय प्रयुक्तानां परिभाषाणां सक्षिप्तं विवरणमेव कालेन परिभाषेन्दुशेखरग्रन्थत्वेन प्रसिद्धि प्राप्तम्। यतो हि मञ्जूषादाविवात्र विषयविवरचनविस्तरो न विलोक्यते। यद्यपि काश्चन परिभाषा अस्यापवादभूताः सन्ति, तथापि भूयस्यः परिभाषास्तथाविधा उपलभ्यन्ते यासां व्याख्यानं ज्ञापकफलप्रदर्शनेनैव कृतकृत्यतामगात्। यत्र तत्र परिदृश्यमानं विशदविवेचनमपि ग्रन्थममुं परिभाषाटीकाग्रन्थयशसा समलङ्कर्तुं नालमिति प्रतिपादने मनागपि मनो न संकुति सुमेधसां विदुषाम्।

अत्रेदमाकूतम् परिभाषेन्दुशेखरस्य टीकासु तासु तासु निर्दिश्यमानान्तरङ्गादि-पदार्थानाम्, अपवादपदार्थस्वरुपतद्भेदानाम् , अनेकान्ता अनुबन्धाः एकान्ता अनुबन्धाः इत्यत्रानुमानस्वरुपस्य, तत्र तत्रावतरणासंगतितत्परिहारोपायस्य च विस्तरेण निरुपणं दर्शं दर्शं मनसीयं शङ्का समुदेति यत् समये समये प्रतिपादितं पश्चात् संकलितं संक्षिप्तं विवरणमेव परिभाषेन्दुशेखरेत्यभिधां धत्ते। अन्यथा नागेशभट्टेनापि समस्या एतास्तर्किताः समाहिताश्च स्युः। इदमप्यनुमातुं शक्यते यच्चरमे वयसि

वर्तमानेनासादितशब्दानुशासनप्रौढिता ग्रन्थममुं विरचयता नागेशेन भूयसो भावान् स्वल्पैः शब्दैः प्रकाशयितुं पारितम्, अथवा वार्द्धक्याद् विस्तरेण व्याख्यातुमुदासितम्, अथवा परिभाषाणां प्राक्तनेषु व्याख्यानेषु विस्तरेण व्याख्यायमानानां तासामधिकव्याख्यानापेक्षणं नानुमतम्। सम्भवन्तु नामात्र ते ते विकल्पाः, परन्त्वत्र कश्चनापि विकल्पो नोदेति यद् ग्रन्थस्यास्य व्याख्याप्रौढिः परां काष्ठामधितिष्ठति।

# परिभाषेन्दुशेखरव्याख्यानपरम्परा विमर्शः[७९]

[परिभाषेन्दुशेखरव्याख्यानपरम्परा]




नागेशप्रणीतेषु ग्रन्थेषु गूढतत्त्वं, संक्षिप्तशैली, रहस्यात्मकता इत्यादयविषयाः सर्वमान्याः। अतः नागेशस्य मौलिकग्रन्थः न तु महत्त्वपूर्णम् अपितु सर्वोच्चस्थानं नास्ति किमपि युक्तिः। अनेन ग्रन्थस्योपरि परम्परानुसारं नागेशस्य शिष्यसम्प्रदायः बहुनि व्याख्यानानि विरचितानि। प्रायतः परिभाषेन्दुशेखरस्य पञ्चचत्वारिंशत् संस्कृतव्याख्याः

---

[79] परिभाषेन्दुशेखर। डा०पूर्णदत्त सिंह। इन्दु प्रकाशन । वाराणासी। १६८७ द्रष्टव्यम्।

सन्ति। चत्वारः हिन्दीव्याख्याः अपि वर्तन्ते। पाश्चात्यविद्वांसः फे० किलहार्नमहोदयेन परिभाषेन्दुशेखरस्योपरि आङ्गलभाषायां एकं पुस्तकं प्रणीतम्।

<u>संस्कृतव्याख्याः</u>

१. गदा - वैद्यनाथपायगुण्डे।

२.भैरवी - भैरवमिश्र ।

३.त्रिपथगा - राघवेन्द्राचार्य (गजेन्द्र-गडकर)।

४.दोषोद्धारः - मन्नुदेव ।

५. तरंगिणी - माधवाचार्यः वेकर।

६. भास्करी- भास्कर शास्त्री अभ्यंकर।

७. भावार्थदीपिका - गोविन्द शास्त्री अष्टपुत्रः।

८. विष्णुभट्टी - विष्णुशास्त्री भट्टः।

९. दूष्करोद्धेदः - गोपालाचार्यकरहडकर्।

१०.चन्द्रिका - विष्णुशास्त्री भट्टः

११. नागेशाशेयनिर्णयः- नारायणशास्त्री गलः।

१२. परिभाषेन्दुशेखरटीका- ग्रन्थकर्तुः नाम न प्राप्तम्।

१३.वाक्यार्थचन्द्रिका- हरिशास्त्री भागवत।

१४.परिभाषेन्दुशेखरव्याख्या - बालशास्त्रीरानडे।

१५.परिभाषेन्दुशेखरटीका - पं०शिवकुमार शास्त्री।

१६. हैमवती- पं०यागेश्वर शास्त्री।

१७.भूतिः - तात्या शास्त्री।

१८.विजया- पं०जयदेव मिश्र।

१९.तत्व प्रकाशिका - गणपति शास्त्री मोकाटे।

२०.अम्बाकर्त्री - गोविन्द शास्त्री भारद्वाज्।

२१. परिभाषेन्दुचन्द्रिका- विश्वनाथ दण्डिभट्टः।

२२.बृहच्छास्त्रार्थकला- पं०बेणी माधव शास्त्री।

२३. तत्वादर्श- वासुदेव शास्त्री अभ्यंकरः।

२४. चित्प्रभा- ब्रह्मानन्द सरस्वती।

२५. सर्व मंगला- मनीषी शेष शर्मा।

२६. शंकरी- शंकर भट्टः।

२७.लघु जटाजुटः- कृष्णशास्त्री भारद्वाज्।

२८.लध्वी टीका - रघुनाथ शास्त्री।

२९. नागेश गूढार्थदीपिका- पेरु वेंकटेश्वर शास्त्री।

३०.परिभाषेन्दुप्रभा- ग्रन्थकर्तुः नाम न प्राप्तम्।

३१.परिभाषापाठ - कृष्णदास आचार्यः।

३२.विषमी-  चिद्रुप शर्मा।

३३. परिभाषार्थमञ्जरी -  भौमभट्टः।

३४.भैमी -   भीमाचार्यः।

३५. वैष्णवी-   कढेडकर।

३६. पाठकी -  उदयंकर पाठक।

३७.अकाण्डताण्डवम्-   ग्रन्थकर्तुः नाम न प्राप्तम्।

३८. त्रिशिखा-  लक्ष्मीनृसिंहः।

३९. वृहती परिभाषाविवृत्ति-  ग्रन्थकर्तुः नाम न प्राप्तम्।

४०.परिभाषेन्दुशेखरटीका-   नीलकण्ठशास्त्री थेटे।

४१. परिभाषेन्दु-शेखर-टीका- लीला विहारी।

४२. परिभाषेन्दु-शेखर-टीका - हरीरामः।

४३. परिभाषेन्दुशेखरटीका - दुर्बल आचार्य।

४४. परिभाषेन्दुशेखरटिप्पण- राजाराम दीक्षित।

४५. परिभाषेन्दुशेखरव्याख्या - गदाधरः।

<u>हिन्दीव्याख्याः</u>

१. दुर्गा - हर्षनाथ मिश्रः।

२. परिभाषाप्रकाश- श्रीनारायणमिश्रः।

३. सुबोधिनी - आचार्य विश्वनाथमिश्रः।

४. प्रकृतहिन्दीव्याख्या- ग्रन्थकर्तुः नाम न प्राप्तम्।

<u>आङ्गलव्याख्या</u>

१. परिभाषेन्दुशेखरः - एफ् ० किलहर्न

## मन्नुदेवप्रणीतदोषोद्धारव्याख्यानस्य वैशिष्ट्यम्

यथा मानवस्य शरीरं आधिव्याधिदोषरहितम् आरोग्यकरं सुन्दरं शरीरं सर्वैः आद्रियते ,स्वयं च आरोग्यवत् भवति, सन्तुष्टः भवति तद्वत् नागेशभट्टेन महता प्रयत्नेन लिखितः वैयाकरणसंप्रदायस्य आदर्शभूतः, परमप्रामाणिकः परिभाषेन्दुशेखरनामकः ग्रन्थः। नागेशभट्टकाले एव तेषां पाण्डित्यमसहमानाः तदात्वे किमपि कर्तुमशक्नुवानाः तदनन्तरस्मिन् काले परिभाषेन्दुशेखरग्रन्थस्य खण्डनपूर्वकं व्याख्यां कृतवन्तः। वैयाकरणानां स ग्रन्थः प्रमाणभूतः यथा न भवति तथा करणमेव तेषाम् उद्देश्यम्। परं नागेशभट्टस्य साक्षात् शिष्यः मन्नुदेवः तानि व्याख्यानानि सम्यक् पर्यालोच्य, ग्रन्थे व्याख्याकारैः प्रदर्शितान् दोषान् सर्वान् अप्रमाणभूतान् ज्ञात्वा, तान् दोषान् उद्धर्तुं दोषोद्धार इति नाम्ना एकां व्याख्यां कृतवान्। अत्र व्याख्याकर्तृभिः नागेशस्य उपरि ये ये दोषाः प्रदर्शिताः, तान् सर्वान् उद्धृत्य शुद्धं ग्रन्थं स्थापितवान्। इदानीं दोषोद्धरणपूर्वकं परिभाषेन्दुशेखरस्य स्वच्छता शुद्धता प्रदर्शिता इति अस्य व्याख्यानस्य वैशिष्ट्यं वर्तते।

## मन्नुदेवस्य परिचयः[८०]

मन्युदेवः, मन्नुदेवः, गोपालदेवः इत्यादिनि अस्य इतर नामानि। अयं महाराष्ट्रियब्राह्मणः। क्रिस्तोः १८१५ तमे काले सम्भूतस्यास्य पिता शम्भुः, माता दुर्गा

[80] See Encyclopedia of Philosophy, Vol-5 (Philosophy of Grammar)

इति। अस्य ज्येष्ठभ्रातुर्नाम कृष्णदेव इति पायगुण्डे बालंभट्टस्य प्रधानशिष्येष्वयमन्यतम इति बलदेवोपाध्यायानामभिप्रायः[८१]। श्रीनागेशभट्टस्य प्रधानशिष्यः श्रीवैद्यनाथपायगुण्डे आसीत्। नागेशग्रन्थहृदयग्रन्थीनयं सम्यग् जानाति स्मा। १७५० तमवैक्रमाब्दात् १८२५ तमवैक्रमाब्दं यावदस्य कालः स्वीक्रियते। श्रीवैद्यनाथपायगुण्डेऽविदुषो मनुदेवः प्रधानशिष्यो बभुव। वैद्यनाथपुत्रेण बालशर्माणा १८४० तमः १८७० वैक्रमाब्दमध्ये केलम्ब्रकाझपा मन्नुदेवमहादेवयोः सहयोगेन धर्मशास्त्रसङ्ग्रहः सङ्कल्पितः। मन्नुदेवेन चत्वारः ग्रन्थाः प्रणीताः[८२]। एते ग्रन्थाः कुत्रापि न प्रकाशिताः। १. गणसूत्रविचारे नव्यमतपरिष्कारः। २. लघुभूषणकान्तिः। ३. लघुशब्देन्दुशेखरदोषोद्धारः। ४. परिभाषेन्दुशेखरदोषोद्धारः।


अयं नागेशभट्टस्य वंशज भवति। NCC MADRAS Vol-xix एवं NCC MADRAS Vol-xviii मध्ये मन्नुदेवस्य नाम सूचितम्। पूर्णदत्तेन रचितः परिभाषेन्दुशेखरस्य हिन्दी व्याख्यायां मन्नुदेवः विषये किञ्चत् विवरणं वर्तते। अपितु दूर्गाव्याख्यायां मध्येऽपि अस्य नाम सूचितमस्ति। सर्वदर्शनसंग्रहनामकग्रन्थेऽपि मन्नुदेवस्य कालविषये विवरणं दत्तम्।

---

[81] का०पां०प०पृ०सं-१५६

[82] See NCC MADRAS-Vol-VI

## मन्नुदेवस्य वंशवृक्षः




## प्रकृतव्याख्यायाः मातृकाविवरणम्

मद्रास्विश्वविद्यालयेन प्रकाशितान् New Catalogus and Catalogorum-Vol-XI ग्रन्थान् दृष्ट्वा परिभाषेन्दुशेखरदोषोद्धारस्य मातृकाणाम् उपलब्धिस्थानं ज्ञातम्। मया शोधप्रबन्धार्थं तिस्रः मातृकाः लब्धाः। तासु एका मातृका पाण्डिचेरीनगरस्थ फ्रेन्च् इन्स्टिटयुट् मध्ये देवनागरीलिप्यां वर्तते। सर्वकारीयपाण्डुलिपिसङ्ग्रहालये मद्रास् नगरे स्तः। तयोः एका तालपत्ररूपा। अन्या कर्गजपत्ररूपा । तदिदं मातृकाविवरणम्।

**प्रथमं पांडिच्चेरीनगरस्थ प्रथममातृका –**

१. मातृका उपलब्धिस्थानम् – पांडिच्चेरीनगरस्थ फ्रेन्च् इन्स्टिटट्युट्, पांडिच्चेरी

२. मातृकायाः सङ्ख्या – R.E.63527

३. लिपिः – देवनागरी

४. लेखनसामग्री – कर्गजपत्रम्

५.. पृष्टानि – १४६

६. प्रतिपृष्टे पङ्क्तयः – २२

७. प्रतिपङ्क्त्याम् अक्षराणि – ५३

८. परिमाणम् – २५ × ९.५

९. ग्रन्थकर्ता – मन्नुदेवः

Beginning- श्री गणेशाय नमः ।

नत्वा गणपतिं देवं नृसिहं कमलायुतम् ।
तातं शंभु प्रसूं दुर्गा कृष्णदेवं तथाग्रजम् ॥

Ending- अत एव ॐ आदेशः स्थानिवत्त्वान्मय उञ् इति प्रकृतिभावापवादभूते आन्तरतम्यादननुासिके वकारे किम्वितीति रूपं मनोरमायां प्रतिपादिनत स्पष्टश्चेदं एतत्सूत्रे भाष्यकैयटयोः ।

Colophon- इति श्रीमन्मन्नुदेवविरचितापरिभाषेन्दुशेखरटीका समाप्ता ॥

**द्वितीयं मद्रास् – नगरस्थ मातृका –**

१. मातृका उपलब्धिस्थानम् - मद्रास्-नगरस्थ सर्वकारीयपाण्डुलिपि सङ्ग्रहालयः, मद्रास्

२. मातृकायाः सङ्ख्या - D.1466

३. लिपिः - ग्रन्थः

४. लेखनसामग्री - कर्गजपत्रम्

५.. पृष्टानि - १०३

६. प्रतिपृष्टे पङ्क्तयः - २८

७. प्रतिपङ्क्त्याम् अक्षराणि - २५

८. परिमाणम् - १७ १/८ × १ १/२

९. ग्रन्थकर्ता - मन्नुदेवः

Beginning- हरिः ओम्।

श्रीमते हयग्रीवाय नमः।

परिभाषेन्दुशेखरकण्टकोद्धारः॥

नत्वा गणपतिं देवं नृसिहं कमलायुतम्।

तातं शम्भु प्रसूं दुर्गां कृष्णदेवं तथाग्रजम्॥

Ending- अत एव ऊँ आदेशः स्थानिवत्त्वान्मय उञ् इति प्रकृतिभावापवादभूते आन्तरतम्यादननुासिके वकारे किम्वितीति रूपं मनोरमायां प्रतिपादिनत स्पष्टञ्चेदं एतत्सूत्रे भाष्यकैयटयोः ।

Colophon- इति श्रीमन्मन्नुदेवप्रणिता परिभाषेन्दुशेखरदोषोद्धारव्याख्या समाप्ता।

**तृतीयं मद्रास् – नगरस्थ मातृका –**

१. मातृका उपलब्धिस्थानम् - मद्रास्–नगरस्थ् सर्वकारीयपाण्डुलिपि सङ्ग्रहालयः, मद्रास्

२. मातृकायाः सङ्ख्या - D.1467

३. लिपिः - ग्रन्थः ( प्राचीना)

४. लेखनसामग्री - तालपत्रम्

५.. पृष्टानि - ९६

६. प्रतिपृष्टे पङ्क्तयः - ९

७. प्रतिपङ्क्त्याम् अक्षराणि - ६०

८. परिमाणम् - १४ १/८ × १३/८

९. ग्रन्थकर्ता - मन्नुदेवः

Beginning- हरिः ओम्।

श्रीमते हयग्रीवाय नमः।

नत्वा गणपतिं देवं नृसिहं कमलायुतम्।

तातं शंभु प्रसूं दुर्गां कृष्णदेवं तथाग्रजम्॥

Ending- अत एव ऊँ आदेशः स्थानिवत्त्वान्मय उञ् इति प्रकृतिभावापवादभूते आन्तरतम्यादननुासिके वकारे किम्वितीति रूपं मनोरमायां प्रतिपादिनत स्पष्टञ्चेदं एतत्सूत्रे भाष्यकैयटयोः ।

Colophon- इति श्रीमन्मन्नुदेवप्रणितापरिभाषेन्दुशेखरदोषोद्धारव्याख्या समाप्ता।

## प्रकृतव्याख्यायाः सम्पादने समादृता रीतिः

परिभाषेन्दुशेखरदोषोद्धारव्याख्यायाः मातृकात्रयम् उपलब्धम्। तासु मातृकासु का वा प्राचीना? का वा अर्वाचीना ? कामाधारीकृत्य काः काः मातृकाः समागताः इति प्रश्नः मातृका संशोधनावसरे उदेति।

१. मातृकासु निर्दिष्टानि कालनिर्णयपरवाक्यानि सङ्केताश्च आधारीकृत्य तासां पूर्वोत्तरत्वं ज्ञातुं शक्यते। अयमेकः पक्षः।

२. ग्रन्थालये दत्तं विवरणमाधारीकृत्य कालनिर्णयः इति द्वितीयपक्षः।

३. मातृकायाः कीटदग्धतां कालशिथिलतां वा परिशील्य मातृकायाः प्राचीनत्वं निर्णेतुं शक्यते। अयं तृतीयपक्षः।

एवं मातृकाणां गुणदोषपरिशीलनविषयदृष्ट्या तासां वैशिष्ट्यं च परिशील्य प्राचीनत्वं सविमर्शं वर्णयितुं शक्यते। क्वचित् मातृकासु कीटदग्धासु सत्सु तद् विहाय इतरस्थलेष्वेव विचारः करणीयः। एतत्तु आन्तरिकमध्ययनं भवति। इदानीं बाह्याध्ययनं आश्रित्य मातृकापरिशीलनं क्रियते। ग्रन्थाध्ययने सम्पादनसारणिः मुख्यस्थानमावहति। ग्रन्थसम्पादनं हि मतिमतां प्रयत्नवतामपि कष्टसाध्यं कार्यं भवति। तथापि यथाबुद्धि प्रबन्धोऽयं सम्पादितः।

पाण्डिच्चेरीनगरस्थात् फ्रेन्च् इन्स्टिटट्युट् ग्रन्थालयात् प्रथम मातृका प्राप्तम्। तत्र प्रथमा F1 इत्यनेन चिह्नेन सूच्यते। अस्याः फ्रेन्च् इन्स्टिटट्युट् ग्रन्थालयस्था क्रमसंख्या R.E. 63527 । मातृकेयं सम्पूर्णा वर्तते। देवनागरि लिप्यां कर्गजपत्रे विलिखिता अस्ति। अस्यां मातृकायां १४६ पृष्टानि सन्ति। प्रत्येकस्मिन् पृष्टे २२ पङ्क्त्य वर्तन्ते। एषा मातृका समीचिना स्पष्टा च वर्तते। अनया मातृकया बहवः युक्ता पाठाः लब्धाः। क्वचित् पङ्क्तीनां भ्रंशः, क्वचित् पङ्क्तीनां अधिकतया निवेशश्च अस्ति। एषा मातृका स्पष्टरूपेण दृश्यन्ते।

वाक्यानि स्पष्टतया सन्ति। अतः पाठसम्पादनार्थं एषा समीचिना प्रतिभाति। एषा मातृका सम्पूर्णतया कर्गजपत्रे स्थिता प्रामणिकता आवहति तदर्थं प्रधानमातृका रुपेण स्वीकृता मया। अस्य हस्तलेखस्य समय सम्वत् १७३४।

तमिलनाडुप्रदेशे चेन्नैनगरस्थ G.O.M.L शोधकार्यग्रन्थालयात् मातूका द्वयम् उपयुक्तम्। तत्र प्रथमा G1 इत्यनेन चिह्नेन सूच्यते। अस्याः ग्रन्थालयस्था कर्मसंख्या D.1466। इयं मातृका ग्रन्थालिप्यामस्ति। इयं कर्गजपत्रात्मिका सम्पूर्णा च भवति। अत्र १०६ पृष्टानि सन्ति। लेखनं प्रायतः प्रायशः स्पष्टतयैव अस्ति। क्वचित् अक्षराणां चित्रगतिः दृश्यन्ते। एषा समीचिना मातृका । प्रत्येकस्मिन् पृष्टे २८ पङ्क्त्य वर्तन्ते। अक्षराणि स्पष्टतया दृश्यन्ते। अस्यां मातृकायां समयः सम्वत् १८६७ इति सूचितम्।

द्वितीया G2 इत्यनेन चिह्नेन सूच्यते। इयं मातृका तमिलनाडुप्रदेशे चेन्नैनगरस्थ G.O.M.L शोधकार्यग्रन्थालयात् उपलब्धम्। अस्याः कर्मसंख्या D.1467। इयं मातृका ग्रन्थालिप्यामस्ति। इयं तालपत्रात्मिका अतिप्राचिना वर्तन्ते। एषा सम्पूर्णा स्पष्टा च भवति। अत्र १६ तालपत्राणि सन्ति। लेखनमपि स्पष्टतया पठितुम् शक्यते। क्वचित् अक्षराणां कीटदग्धावशात् लोपः दृश्यन्ते। अस्यां मातृकायां कालनिर्णयं स्पष्टं नास्ति। अस्यां मातृकायां समयः सम्वत् १८६७ इति सूचितम्। पाठसमीक्षात्मकशोधप्रबन्धेऽस्मिन् पाण्डिच्चेरी मातृका मूलत्वेन स्वीकृता। इयं पाण्डिच्चेरी प्रदेशस्थ FRENCH INSTITUTE OF PONDICHERRY द्वारा प्राप्ता। अस्यां क्रमसंख्या R.E. 63527। कर्गजपत्ररूपा शिलाक्षरवत् दृश्यन्ते। अत्रे १४६ पृष्टानि सन्ति। पृष्टेषु पुटद्वयेऽपि लेखनं वर्तते। अक्षराणां शुद्धि उत्तमेव। क्वचित् स्थलेषु प्राचीनाक्षरवत् अक्षराणि सन्ति। सर्वत्रापि वकारस्य स्थाने वकारः एव प्रयुक्तः। उदाहरणतया वाध्यते इत्यादयाः। उदाहरणतया वदंति शब्देन्दुशेखरे स्पष्टमेव। F1 मातृका मूलमातृकयोः प्रायशः पाठभेदाः उपयुक्ताः सन्ति। सर्वमातृकापेक्षया अस्यां मूलमातृकायामेव सर्वे विषयाः दृश्यन्ते इति आधारत्वेन मूलत्वेन च इयं मातृका स्वकिृता। प्रायः पूर्वपक्षस्य भ्रंशः, एवं सिद्धान्तः , एवं पङ्क्तीनां भ्रंशः इत्यादिकं सर्वे विषया उल्लिखिता सन्ति। ग्रन्थस्यास्य परिभाषेन्दुशेखरकण्टकोद्धारः एवं

परिभाषेन्दुशेखरदोषोद्धारः  इत्युभयथापि  व्यवहारो दृश्यन्ते। मङ्गलश्लोके ग्रन्थकर्त्रा ‘दोषा ये पण्डितंमन्यैः’ इत्युक्तम्। एवञ्च परिभाषेन्दुशेखरे पण्डितमन्येरुक्तानां दोषाणामुद्धरणार्थमयं ग्रन्थः रचित इति  प्रतिज्ञात्वात् ग्रन्थस्य नाम दोषोद्धारः इति युज्यते। पाण्डिच्चेरी मातृकायां दोषोद्धारः नाम परिलक्ष्यते। परन्तु चैनैनगरस्थ मातृके श्रीहयग्रीवाय नमः इत्यनन्तरं परिभाषेन्दुशेखरकण्टकोद्धारः इति शीर्षकमस्ति। NCC मध्येऽपि  उभयनामो व्यवहारो दृश्यन्ते। प्रामाणिकतया दोषोद्धारः नाम  इति नाम्ना सम्पादितम्।


**पाठसमीक्षणे उपयुक्तचिह्नानि**

1. मूले स्वीकृतः पाठः पाण्डिच्चेरी पाठः इत्युक्तम्। तत् F1 इत्यनेन सूच्यते इत्यपि। तत्स्थाने तत्समानपाठः एते इति प्रतिपादनाय : इतीदं चिह्नं स्वीकृतम्। सर्वत्र मूलपाठं संस्थाप्य पाठभेदाः समीक्षिताः।
2. F1 G1  G2 इति क्रमानुसारेण मातृका त्रयं पाठभेदे निर्णये नाम प्रयुक्तम्।
3. पाठभेदानां मध्ये मातृका भग्नाः अथवा कीटजग्धा इति सूचनाय *** इति नक्षत्रत्रय चिह्नेन सूच्यते। तत्र अक्षराणि न सन्ति कथनाय च।
4. पाठाः लोपः निमित्तं omit (o) इति चिह्नेन सूचितम्।
5. अपूर्णवाक्यं स्थले प्रश्नचिह्नं ? मया प्रयोग कृतम्।
6. यत्र यत्र अधिकपाठः वर्तते तत्र तत्र Edit (e) इति चिह्नेन सूचितम्।
7. सन्दिग्धपाठस्थले------- इति चिह्नेन सूच्यते।
8. [  ] इति  चिह्नं  मया सम्पादनसन्दर्भे योजनपाठः निमित्तं प्रायेग कृतम्।
9. <> इति  चिह्नं  मया अशुद्धत्वात् शोधितपाठः निमित्तं प्रयोग कृतम्।


10. सर्वेषु मातृकासु शुद्धः अशुद्धः पाठाः प्रदर्शिताः। प्रथमे शुद्धपाठाः तत्पश्चात् अशुद्धः पाठाः दीयन्ते। तत्र तत्र युक्तायुक्तपाठविचारः कृत्वा प्रथमे शुद्धः पाठाः प्रतिष्ठाप्यन्ते।


**मातृकापरस्परसम्बन्धसूचकं रेखाचित्रम् (STEMMA CODICUM)**

पाठानुसन्धानशोधकार्ये विभिन्नाः पद्धत्याः स्वीक्रियन्ते। तेषु मातृकापरस्पर-सम्बन्धसूचकं रेखाचित्रस्य महत्वं वर्तते। मातृकाणां सम्पादने **(STEMMA CODICUM)** इति पद्धतीरीत्या मातृकाणां परस्परसम्बन्धः निर्णयते। कस्या अपि रचनायाः मातृकाः मूलमातृकायाः एवं अन्याः मातृकायाः परस्परसम्बद्धाः तेषां परिज्ञानमन्वेषणं च पाठानुसन्धानस्य सर्वप्रमुखं कार्यं भवति। अनेन रचनायाः पाठपरम्पराया इतिहासं प्राचीनरुपं च ज्ञातुं शक्यते। परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य समीक्षात्मकं पाठसंशोधने मातृकाणां सम्बन्धः निम्नरेखाचित्रेण प्रदश्यते।


STEMMA CODICUM
MAIN
DEVANAGIRI SCRIPT
F1
PAPER
FRENCH INSTITUTE, PONDICHERRY
GRANTHA
G1
GRANTHA
G2
PAPER
PALM-LEAF
GOVT. ORIENTAL MANUSCRIPT LIBRARY
MADRAS

'F1' इति संज्ञितायाः परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य प्रथमं पत्रम्





‘G2’ इति संज्ञितायाः परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य प्रथमं, द्वितीयं एवं तृतीयं पत्रम्



# तृतीयोऽध्यायः

## मन्नुदेवेन समर्थितानां परिभाषाणां विवरणम्

नागेशभट्टेन विरचितस्य परिभाषेन्दुशेखरस्य शेखरायमाणत्वम्, मुनित्रयमतानुसारेण वैयाकरणसिद्धान्तानां सर्वतोमुखपाण्डित्येन आविष्करणं दृष्ट्वा तस्य पाण्डित्यमसहमानाः तदनन्तरकालीनाः केचन व्याख्यतारः परिभाषेन्दुशेखरे नागेशेन प्रदर्शितेषु सिद्धान्तेषु दोषान् प्रदर्शितवन्तः। ततः नागेशस्य साक्षात् शिष्यः मन्नुदेवः परिभाषेन्दुशेखरे व्याख्यातृभिः प्रदर्शितान् दोषान् उद्धर्तुं दोषोद्धारनामकं व्याख्यानं कृतवान्। परिभाषेन्दुशेखरे कैश्चित् प्रदर्शितानां दोषाणां वारणं, नागेशाभिप्रायप्रदर्शनमित्यादि बहवः सूक्ष्मांशाः मन्नुदेवकृतपरिभाषेन्दुशेखरव्याख्याने वर्तन्ते। तेषु स्थालीपुलाकन्यायेन केचन अंशाः प्रदर्श्यन्ते।

**कार्यकालं संज्ञापरिभाषम्।**

शेखरे कार्यकालपक्षे "ङमो ह्रस्वादचि ङमुँण् नित्यम्" (८-३-३२) इत्यादौ, "तस्मादित्युत्तरस्य" (१-१-६६), "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१-१-६५) इति परिभाषासूत्रद्वयस्य युगपदुपस्थितौ परत्वात् तस्मादित्युत्तरस्य इति शास्त्रस्य प्रवृत्तिः उभयनिर्देशे पञ्चमी निर्देशो बलीयान् परत्व इति "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१-१-६५) सूत्रस्थं भाष्ये न सङ्गच्छते यतो हि कार्यकालपक्षे कार्येण काल्यते स्वसन्निधिं प्राप्यते इत्युक्तत्वात् "तस्मादित्युत्तरस्य" "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति परिभाषाद्वयस्य स्थाने पौर्वापर्यं न स्यात् तदा परत्वात् "तस्मादित्युत्तरस्य" इति भाष्यं न सङ्गच्छेत इति

आक्षेपे तत्र मूले एव एवं समाधानं दत्तं "विप्रतिषेधे परं कार्यम्" (१-४-२) इति सूत्रे अष्टाध्यायीपाठकृतपरत्वमेव आश्रीयते। अर्थात् कार्यकालपक्षेण समानस्थलेनापि अष्टाध्यायीपाठकृतपरत्वं वर्तते इत्युक्त्वा समाधानं दत्तम्।

तत्र विषये कैश्चित् दोषः प्रकटितः। सः व्याख्यानेऽस्मिन् अनूदितः यथा- "ङमो ह्रस्वादचि ङमुँण् नित्यम्" (८-३-३२) इत्यारभ्य यथोद्देशपक्षेणेव इदं भाष्यं योजयामासुः इत्यन्तेन ग्रन्थेन विषयममुं खण्डयति तच्चिन्त्यमित्यादिना। यतोऽहि पूर्वैः न मु ने (८-२-३) इति सूत्रविषये योगविभागेन दोषः आपादितः। तदसत् भाष्ये तस्य सूत्रस्य योगविभागाभावात्। वार्त्तिककारेण पाठितसिद्धकाण्डवैयर्थ्येन च प्रमाणाभावात्। अपि च "न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" (१-१-४७) इति सूत्रे द्विर्वचनादि ग्रहणस्य प्रत्याख्यानत्वात् इत्यादि बहूनि कारणानि संप्रदर्श्य नागेशोक्तविषयः एव सम्यक् इति संप्रमाणं सोदाहरणं च निरूपितम्। तद्विषये प्राचीनोत्तदोषाणाम् उद्धारश्च कृतः ।

**यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते।**

अस्याः परिभाषायाः अर्थः एवं वर्णितः यमुद्दिश्य आगमः विहितः स तद्गुणीभूतः शास्त्रेण तदवयत्वेन बोधितोऽतस्तद्ग्रहणेन तद्ग्राहकेन तद्बोधकेन शब्देन गृह्यते बोध्यते इत्यर्थः इति। तत्र तद्गुणीभूताः इति पदस्य विवरणं शास्त्रेण इत्युक्तम्। अस्यैव विवरणम् अन्यैः अन्यथा कृतम्। प्रयोगसम्पादने उपकारकः इति व्याख्यानं कृतं कैयटानुरोधेन। अर्थात् प्रयोगसम्पादनकरणे यः उपकरोति सैवेति। तस्य खण्डनं कृत्वा मूलोक्तं समर्थयति तच्चिन्त्यमित्यादिना। तथाहि प्रत्ययादीनामपित्वदुक्तरीत्या उपकारकत्वं सम्भवति। यतोहि राम इति प्रकृतेः विसर्गसिद्धिः ङसु इति प्रत्ययेनैव। अतः रामः

इति प्रयोगसम्पादनोपकारकत्वं सु इति प्रत्ययस्य सम्भवति इति हेतोः तद्ग्रहणेन तद्विशिष्टस्यापि ग्रहणं भवेत् इति हेतोः व्याख्यानमिदम् अशुद्धमिति स्पष्टम्। अत्र नागेशेन शास्त्रेणेत्यादि यत् व्याख्यानं कृतं तदेव युक्तमिति मन्नुदेवः समर्थितवान्।

**निर्दिश्यमानस्यादेशा भवन्ति।**

परिभाषेयम् अकज्विषये न प्रवर्तते इत्युक्तं "त्यदादीनामः" (७-२-१०२) इति सूत्रे भाष्यप्रदीपद्योतेषु। अत्र च प्रमाणं किमः कः इत्यत्र एकदेशविधानमेव। कैश्चिद्भिः- "किमः कः" (७-२-१०३) इति सूत्रविषये निर्दिश्यमानपरिभाषायाः अप्रवृत्तौ किमः अ इत्येव वक्तव्ये किमः कादेशविधानमिति प्रतिपादितम्। तदसङ्गतमेव यतो हि "त्यदादीनामः" (७-२-१०२) इति सूत्रे भाष्ये कैयटे च "किमः कः" इति सूत्रस्य रचनानन्तरं "कु तिहोः" (७-२-१०४), "क्वाति" (७-२-१०५) इति सूत्रद्वयं रचितं भगवता । एतत्सूत्रद्वयविषये किम इति पदस्य अनुवृत्तिः प्रदर्शिता। अतः आकरग्रन्थः विरुध्यते। इत्येवंरीत्या बहुविचारपुरस्रं व्याख्या प्रवृत्ता। अपि च इयं कुत्र प्रवर्तते कुत्र न प्रवर्तते इति विषयः सुष्टुः निरूपितः। अपि च पूर्वपक्षीणां मतम् आद्यन्तं सुबहुविचार्य दूषितम्। सर्वेषां पूर्वपक्षिणां वादस्य दत्तं च समाधानम्। नागेशमतं च स्थापितम् वर्तते। अत्र परिभाषेन्दुशेखरे तत्र निरूपितम् । स्पष्टं च इदमिति यत्र यत्र उक्तं वर्तते तत्र सर्वत्रापि विवरणं दत्तं वर्तते। अर्थात् तं विषयं सम्यक् अनूद्य प्रतिपादनं कृतं वर्तते।

**अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्**

अर्थवतः शब्दस्य ग्रहणे सम्भवति अनर्थकस्य शब्दस्य ग्रहणं न इति परिभाषार्थः। अत्र परिभाषेन्दुशेखरे अनर्थकेन तदन्तविधिरिति ग्रन्थेन भाष्यरीत्या

परिभाषासिद्धिप्रकारं प्रदर्शितः। ततः किं च इत्यारभ्य संज्ञीति कलितमित्यन्तेन ग्रन्थेन सूत्ररीत्यापि प्रदर्शितम्। एतेन "व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः "(८-२-३६) इति सूत्रे राजेः पृथक् भ्राजिग्रहणमस्यां ज्ञापकम्। अन्यथा राजिग्रहणेनैव भ्राजन्तर्गत-स्यापि तस्य षत्वविधानसंभवात् तद्ग्रहणं व्यर्थं सत् इमां परिभाषां ज्ञापयति इत्यर्थः सिध्यति। अत्र विषये प्राचीनैः भ्राजिग्रहणस्य आवश्यकत्वं स्थापयन्ति तथाहि- व्रश्च इत्यादिनां धातुनां साहचर्यात् राजेः एव ग्रहणमपि धातुसंज्ञिकराजेः एव ग्रहणं स्यात्। न तु भ्राजेः ग्रहणम्। अतः भ्राजिग्रहणस्य आवश्यकता वर्तते एव इति। अभिप्रायममुं खण्डयति तन्मन्दमित्यादिना। यतो हि राजग्रहणे राजृदीप्तौ इति धातोः ग्रहणं क्रियते। भवदुक्तरीत्या स्वीक्रियते चेत् तद्धातो ग्रहणमेव न स्यात्। अतः अयुक्तमिदम्। अपि च किम्बुना इत्यादिना बहूत् अवान्तर उपक्षेपान् उत्थाप्य सर्वेषां समाधानं दत्तम्। प्राचीनैः कृताः भाष्यकारस्य आशयम् अज्ञात्वा प्रकटिताः बहवः सिद्धान्ताः खण्डिताः।

**सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव।**

अन्यत्र चरितार्थद्वयोः द्वयोः शास्त्रयोः एकत्र सम्बन्धः विप्रतिषेधः। तादृश विप्रतिषेधे प्राप्ते परशास्त्रस्यैव प्रवृत्तिः भवति इति बोध्यते "विप्रतिषेधे परं कार्यम्" (१-४-२) इति सूत्रेण। तादृश विप्रतिषेधे एकवारं यत् शास्त्रं येन शास्त्रेण बाधितं भवति तस्य पुन प्रवृत्तिः न भवति इति बोध्यते अनया। अत्र कैयटः एवमाह व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणोपप्लावादत् उभयोरपि शास्त्रयोः तल्लक्ष्यविषययोः चातार्थ्याभावेन पर्यायेण द्वयोरपि प्राप्तौ परं शास्त्रमेव प्रवर्तते इति इयं नियमति। अत्र प्रतिलक्ष्य-संस्काराय शास्त्रस्य आवृत्तिः भवति इत्यादिकम् उक्त्वा व्यक्तिपक्षस्य आश्रयणम् अकोरत्। किन्तु नागेशेन तत्पक्षः खण्डितः । भाष्ये जातिपक्षस्यैव आश्रयणदर्शनात्।

अत्र अवान्तरशङ्का कृत्वा मूलोक्तं समर्थयति मन्नुदेवः- ननु जातिपक्षे जातौ इत्यादिना। जातिपक्षे शास्त्राणां प्रवृत्तिः असङ्गता। अतः व्यक्तिद्वारैव। व्यक्तिपक्षे प्रतिशास्त्रस्य आवृत्तिः भवति। तदा शास्त्रन्तरप्राप्तिविषयत्वेन यत्र युगपत् शास्त्रस्य प्रवृत्तिः भवति तत्र असम्भवरूपबाधः जायते। तत्र विनिगमकसत्त्वात् एकदा पूर्वं शास्त्रं ततः परं शास्त्रमिति अव्यवस्थायां परविध्यर्थं "विप्रतिषेध परं कार्यम्" (१-४-२) सूत्रम्। कैयटोक्तं युक्तमेव इति चेत् न।

व्यक्तिपक्षे व्यक्तीनामनेकत्वात् तत्र शक्तेः ग्रहीतुमशक्त्वेन जात्युपलिक्षतव्यक्तौ एव शक्तेः ग्रहीतुं युक्तत्वात्। तत्र शास्त्रद्वयस्य उद्दश्यतया युगपदसम्भवरूपबाधं तत्र परविध्यर्थमिदमिति विप्रतिषेधशास्त्रं सकृद्गतौवि न्यायसिद्धिः। एवं एकार्थस्तु विकल्पेरन्निति न्यायेन इत्यादिना समाधानन्तरमपि दत्वा उपर्यपि बहून् विचारान् कृत्वा, तच्चिन्त्यम् इत्यादिना प्राचीनमतमनूद्य खण्डितम्। नागेक्तविषयेषु जातान् बहून् सन्देहान् निवार्य नागेशोक्तपक्षः सुष्ठुः स्थापितः।

**येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति।**

परिभाषेयं परिभाषेन्दुशेखरे बाधबीजप्रकरणे अपवादपदार्थस्य प्रतिपादनपरतया पठिता। अर्थस्तु विशेषशास्त्रे उद्देश्यभूतं यद्विशेषधर्मावच्छिन्नं तद्वृत्तिः यः सामान्यधर्मः तदवच्छिन्नोद्देश्यकशास्त्रस्य प्रत्यासत्त्या तेन विशेषशास्त्रेण बाधः इति। यतो हि उत्सर्गप्राप्तियोग्यता विरहविशिष्टे लक्ष्ये विशेषशास्त्रस्य चारितार्थ्याभावः बाधकत्वे बीजम् यथा वृद्धिरेचीति शास्त्रीयैजव्यवहितपूर्वत्वविशिष्टात्वरूपोद्देश्यतावच्छेदक-व्यापकत्वस्य आद्गुणः इत्येतत् शास्त्रीय अजव्यवहितपूर्वत्वरूपोद्देश्यतावच्छेदके सत्त्वेन आद्गुणः इत्यस्य वृद्धिरेचि इत्यनेन बाधः।

किञ्च अनया परिभाषया उत्सर्गशास्त्रप्रवृत्त्युत्तरमपि विशेषशास्त्रस्य अवकाशः अस्ति चेदपि विशेषशास्त्रेणः उत्सर्गशास्त्रं बाध्यते इति बोध्यते। अन्यथा अनवकाशत्वेन बाधो भवति इत्येव वक्तव्ये तक्रं कौण्डिन्य न्याय प्रदर्शनं व्यर्थं स्यात्। अस्य अयमर्थः ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय इति न्यायः। ब्राह्मणेभ्यो दधि दीयतामित्यनेन वाक्येन सर्वेषां द्विजानां दधिदानं प्राप्तम्। तत्र तक्रं कौण्डन्याय इत्यनेन कौण्डन्यऽतत्रे जातानां विप्राणां तक्र दानं प्राप्तम्। अत्र दधिदानस्य तक्रदानेन बाधः ऊतः। अत्रापि तक्रदानात् पूर्वम् अथवा तक्रदानानन्तरं वा दधि दानस्य अवकाशः वर्तते तथापि तथापि तक्रदानेन दधिदानं बाध्यते। अपि च मिद्‌चोन्त्यात्परः इति सूत्रे भाष्ये सत्यपि सम्भवे बाधनं भवति इति भाष्ये उक्तत्वात् अवकाशे सत्यपि बाधः भवत्येव। अत्र बाधविषये वार्तिककारैः असम्भवः एव बाधकत्वस्य बीजम् इत्युक्तम्। तद्विषये भाष्यकाराणाम् अभिप्रायभेदः वर्तते इति हेतोः लक्ष्यसिद्धिविषये तस्य उपयोगः नास्ति। सत्यपि सम्भवे बाधनं भवति इति भाष्यकाराणां मतमेव आश्रीयते। अत्र विषये न्यायस्य उदाहरणं, प्रत्युदाहरणं प्राचीनैः उक्तानां आक्षेपाणां वारणं च विशदतया दोषोद्धारणे कृतम्।

**विभक्तौ लिङ्गविशिष्टाग्रहणम्।**

परिभाषेयं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषायाः अपवादभूता तथा हि प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषा। अर्थस्तु सामान्यरूपेण विशेषरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे सति लिङ्गबोधकप्रत्यय-विशिष्टस्यापि तेन ग्रहणं भवति इति। अपिशब्देन केवलस्यापि ग्रहणं क्रियते। अनया परिभाषया अयस्कुम्भी इत्यत्र “अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ” (८-३-४६) इति सूत्रेण सत्त्वं साधितम्। एवमेव सर्वत्र यदि अस्याः प्रवृत्तिः स्यात्

यूनः पश्य इत्यत्र यथा युवन् शब्दस्य "श्वयुवमघोनामतद्धिते" (६-४-१३३) इत्यनेन सम्प्रसारणं कृतं तद्वत् युवतीः पश्य इत्यत्रापि सम्प्रसारणं स्यात्। यतो हि प्रातिपदिकग्रहणे सूत्रे युव इति ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति स्त्रीलिङ्गविशिष्टस्यापि ग्रहणमिति अर्थबोधनात् तदर्थं परिभाषान्तरं अपवादत्वेन अङ्गीकृतमविभक्तौ लिङ्गविशिष्टाग्रहणमिति। अस्याः अयमर्थः विभक्तिसम्बन्धी कार्यविषये प्रातिपदिकग्रहणेन लिङ्गविशिष्टस्य ग्रहणं न भवति इति प्रकृते "श्वयुवमघोनमतद्धिते" (६-४-१३३) इति सूत्रविहितं सम्प्रसारणरूपं कार्यं विभक्तिसम्बन्धी अतः तद्विषये प्रातिपदिकस्य ग्रहणे लिङ्गविशिष्टस्य ग्रहणं न भवति इति अनया निषेधः क्रियते तस्याः दोषः वारितो भवति। अत्र आक्षेपं कृत्वा मूलोक्तं समर्थयति मन्नुदेवः। "श्वयुवमघोनमतद्धिते" (६-४-१३३) इति सूत्रे विभक्तित्वेन विभक्तिनिमित्तका-भावात् युवतीः पश्य इत्यत्र कथमनया निषेधमुक्त्वा दोषः वार्यते इति। अस्य अयमाशयः सूत्रे अतद्धिते इत्युक्तम्। अर्थात् तद्धितभिन्ने प्रत्यये परे इति। अतः विभक्तित्वेन प्रकृते शसः ग्रहणं नास्ति हेतोः अयमाक्षेपः जातः।

समाधानं तु तत्र यद्यपि विभक्तित्वेन ग्रहणं नास्ति। तथापि वस्तुतः शस् इति तृतीया बहुवचनविभक्तौ परतः सम्प्रसारणं प्राप्नोति युवतीः इत्यत्र । अतः विभक्तिनिमित्तकत्वं वर्तते एव। ततः विभक्तौ लिङ्गविशिष्टाग्रहणमिति प्रवर्तते दोषः वार्यते च। एवमेव विद्वत्सु जातानां सन्देहानां आक्षेपसामाधानद्वारा वारणं कृतम्। प्राचीनोक्तपूर्वपक्षाः तिरस्कृताः। एवं युवतीः पश्य राजकीयम् इत्यादिप्रत्युदाहरण-प्रदर्शनेन च भाष्योक्तं शेखरोक्तं च द्रढयति व्याख्याकारः।

**सूत्रे लिङ्गवचनमतन्त्रम्।**

एषा "तस्यापत्यम्" (४-१-९२) इति सूत्रे एकवचननपुंसकाभ्यां निर्देशात् गर्गस्य अपत्यं पुमान् गार्ग्यः एवं द्विवचनविवक्षायां गार्ग्यौ इत्यादि रूपाणि न स्युः इति आक्षेपे प्राप्ते तद्वारणाय प्रवृत्ता सूत्रे लिङ्गवचनमतन्त्रम् सूत्रे लिङ्गम् एवं वचनञ्च अविवक्षितम्। अर्थात् तयोः निर्देशानुसारं लक्ष्ये कार्यं न क्रियते इति। प्रकृते उभयोः अविवक्षितत्वात् गार्ग्यः, गार्ग्यौ इत्यादि रूपाणि सिद्ध्यन्ति। इयं शास्त्रे अङ्गविकृता इत्यत्र प्रमाणं तु अर्द्धं नपुंसकमिति सूत्रे नपुंसकग्रहणं भगवता कृतम्। तद्व्यर्थं सत् इमां ज्ञापयति। यतो अर्द्धमित्यनेनैव नपुंसकत्वे इति पुनः नपुंसकग्रहणं परिभाषेयं वर्तते। अतः लिङ्गस्यविवक्षा न भवेत् ततः अनिष्टं स्यात् तद्वारणाय नपुंसकग्रहणमावश्यकमिति भावः।

अत्र मूलोक्तविषये आक्षेपकृत्वा तद्विषयं द्रढयति न च षड्भ्यो इत्यादिना व्याख्याकारः। अनया परिभाषया लिङ्गवचनयोः अविवक्षायां "षड्भ्यो लुक्" (७-१-२२) इति सूत्रे षड्भ्यः इत्यत्र बहुवचनस्य अनङ्गविकारे गौणः इत्यत्र लुक् स्यात् खलु इत्याक्षेपे प्रकृते विहित विशेषणस्य आश्रयणं क्रियते। अस्य अयमर्थः "षड्भ्यो लुक्" (७-१-२२) इति सूत्रेण लुक् विधीयते। कस्मात् परत्र विद्यमानस्य प्रत्ययस्य विधीयते इति आकाङ्क्षायां षड्संज्ञकेभ्यः परत्र विद्यमानस्य इति बोधः जायते। तादृशं षट्संज्ञकेभ्यः (षडभ्यः) इति पदं विहितस्य लुकः विशेषणं भवति । एतस्य आश्रयणेन बहुवचना-भावात् गौणः इत्यत्र दोषः वार्यते। लक्ष्यानुरोधात् इयं व्यवस्था। एवमेव अत्र परिभाषाविषये जातान् सन्देहान् निरस्य, प्राचीनोक्तदोषान् च वारयति। अपि च प्राचीनोक्तविषये एव दोषाः उक्ताः। मूलोक्तविषये प्रतिपादनं च सुष्ठु अकरोत् मन्नुदेवाचार्यः।

## नागेशेन प्रतिपादिताः व्यवहारे विद्यमानाः परिभाषाः

**[शास्त्रत्त्वसम्पादनोद्देश्यं नाम प्रथमं प्रकरणम्      ]**

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्॥ १॥

यथोद्देशं संज्ञापरिभाषम् ॥ २॥

कार्यकालं संज्ञापरिभाषम्॥ ३॥

अनेकान्ताः अनुबन्धाः॥ ४॥

एकान्ताः॥ ५॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ७॥

नानुबन्धकृतमसारूप्यम्॥ ८॥

उभयगतिरिह भवति॥ ९॥

कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते॥ १०॥

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते॥ ११॥

निर्दिश्यमानस्यादेशा भवन्ति॥ १२॥

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः॥ १३॥

अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्॥ १४॥

गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ॥ १५ ॥

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १६ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १७ ॥

क्वचिदेकदेशोप्यनुवर्तते ॥ १८ ॥

भाव्यमानेन सवर्णानां ग्रहणं न  ॥ १९ ॥

भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति ॥ २० ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ २१  ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २२ ॥

प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २३ ॥

प्रत्ययग्रहणे चापञ्चम्याः ॥ २४ ॥

उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ॥ २५ ॥

स्त्रीप्रत्यये चानुपसर्जने न ॥ २६ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ २७ ॥

कृदग्रहणो गतिकारकपूर्वस्यापि ग्रहणम् ॥ २८ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ २९ ॥

व्यपदेशिवदेकस्मिन् ॥ ३० ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ३१ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ३२ ॥

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ ३३ ॥

सर्वो द्वन्द्वो विभाषैकवद् भवति ॥ ३४ ॥

सर्वे विधयश्छन्दसि विकल्पन्ते ॥३५॥

प्रकृतिवदनुकरणं भवति ॥३६ ॥

एकदेश विकृतमन्यवत् ॥३७ ॥

**[बाधबीजं नाम द्वितीयं प्रकरणम्]**

पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥ ३८ ॥

पुनः प्रसङ्गविज्ञानात् सिद्धम् ॥ ३९ ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ ४० ॥

विकरणेभ्यो नियमो बलीयान् ॥ ४१ ॥

परान्नित्यं बलवत् ॥ ४२ ॥

शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति ॥ ४३ ॥

शब्दान्तरात् प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम्॥ ४४॥

लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः भवति॥ ४५॥

क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता॥ ४६॥

यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्॥ ४७ ॥

यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्॥ ४८॥

स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति॥ ४९ ॥

असिद्धं बहिरङ्गमन्तरङ्गे॥ ५० ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः॥ ५१ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते॥ ५२॥

पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न॥ ५३॥

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते॥ ५४ ॥

वार्णादाङ्ग बलीयो भवति॥ ५५ ॥

अकृतव्यूहाः पाणिनीयाः॥ ५६ ॥

अन्तरङ्गादप्यपवादो बलवान्॥ ५७ ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ५८ ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति ॥ ५९ ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते, नोत्तरान् ॥ ६० ॥

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते, नोत्तरान् ॥ ६१ ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ६२ ॥

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ॥ ६३ ॥

प्रकल्प चापवादविषयं तत उत्सर्गोऽभिनिविशते ॥ ६४ ॥

उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधत इति ॥ ६५ ॥

अपवादो यद्यन्यत्र चरितार्थः, तर्ह्यन्तरङ्गेण बाधते ॥ ६६ ॥

अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ॥ ६७ ॥

ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ६८ ॥

क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ ६९ ॥

लादेशेषु वासरूपविधिनास्ति ॥ ७० ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ७१ ॥

[शास्त्रशेषं नाम तृतीयं प्रकरणम्]

प्रातिपदिकग्रहणे लिङ्गविशिष्टास्यापि ग्रहणम् ॥ ७२ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ ७३ ॥

सूत्रे लिङ्गवचनमतन्त्रम् ॥ ७४ ॥

नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ७५ ॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥ ७६ ॥

साम्प्रतिकाभावे भूतपूर्वगतिः ॥ ७७ ॥

बहुब्रीहौ तद्गुणसंविज्ञानमपि ॥ ७८ ॥

चानुकृष्टं नोत्तरत्र ॥ ७९ ॥

स्वरोविधौ व्यञ्जनमविद्यमानवत् ॥ ८० ॥

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥ ८१ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ८२ ॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ८३ ॥

क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ८४ ॥

समासान्तविधिरनित्यः ॥ ८५ ॥

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ८६ ॥

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः ॥ ८७ ॥

ताच्छीलिकेणेऽण्कृतानि भवन्ति ॥ ८८ ॥

धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ ८९ ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ९० ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ॥ ९१ ॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ॥ ९२ ॥

अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ९३ ॥

संज्ञापूर्वकविधेरनित्यत्वम् ॥ ९४ ॥

आगमशास्त्रमनित्यम् ॥ ९५ ॥

गणकार्यमनित्यम् ॥९६ ॥

अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ॥ ९७ ॥

नञ्घटितमनित्यम् ॥ ९८ ॥

आतिदेशिकमनित्यम् ॥ ९९ ॥

सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ॥ १०० ॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ १०१ ॥

विधौ परिभाषोपतिष्ठते नानुवादे ॥ १०२ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ १०३ ॥

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ १०४ ॥

नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ॥ १०५ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः ॥ १०६ ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ १०७ ॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ १०८ ॥

विधिनियमसम्भवे विधिरेव ज्यायान् ॥ १०९ ॥

सामान्यातिदेशे विशेषानतिदेशः ॥ ११० ॥

प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् ॥ १११ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ११२ ॥

श्रुतानुमितयोः श्रुतसम्बन्धोः बलवान् ॥ ११३ ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ ११४ ॥

गामादाग्रहणेष्वविशेषः ॥ ११५ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ ११६ ॥

क्वचित् समुदायेऽपि ॥ ११७ ॥

अभेदका गुणाः ॥ ११८ ॥

बाधकान्येव निपातनानि ॥ ११९ ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १२० ॥

निषेधाश्च बलीयांसः ॥ १२१ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ १२२ ॥

योगविभागादिष्टसिद्धिः ॥ १२३ ॥

पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते ॥ १२४ ॥

ज्ञापकसिद्धं न सर्वत्र ॥ १२५ ॥

पूर्वत्रासिद्धीयमद्वित्वे ॥ १२६ ॥

एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतियस्याश्च न भविष्यति ॥ १२७ ॥

सम्प्रसारणं तदाश्रयं च कार्यं बलवत् ॥ १२८ ॥

क्वचिद् विकृतिः प्रकृतिं गृह्णाति ॥ १२९ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकयैव ग्रहणम् ॥ १३० ॥

शितापा शपानुबन्धेन निर्दिष्टं यद् गणेन च

यत्रैकाज्ग्रहणं चैव पञ्चैतानि व यङ्लुकि ॥ १३१ ॥

पदगौरवाद् योगविभागो गरीयान् ॥ १३२ ॥

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ॥ १३३ ॥

**व्याख्यानरहिताः परिभाषाः**

**[शास्त्रत्त्वसम्पादनोद्देश्यं नाम प्रथमं प्रकरणम्        ]**

परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य प्रथमप्रकरणे सप्तत्रयोविंशति परिभाषाणां व्याख्यानं सन्ति। प्रायशः सर्वाणां परिभाषणां विषये प्रतिपादितमस्ति।

**[बाधबीजं नाम द्वितीयं प्रकरणम्]**

परान्नित्यं बलवत् ॥४२ ॥

यस्य च लक्षाणन्तरेण निमित्त विहन्यते न तदनित्यम् ॥४७ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥५२ ॥

पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न ॥ ५३ ॥

अन्तरङ्गनापि विधीन् बहिरङ्गो ल्यब्बाधते ॥ ५४ ॥

वार्णादाङ्ग बलीयो भवति ॥ ५५ ॥

अकुतव्यूहाः पाणिनीयाः ॥ ५६ ॥

अन्तरङ्गादप्यपवादो बलवान् ॥ ५७ ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ५८ ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ५९ ॥

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते , नोत्तरान् ॥ ६० ॥

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते , नोत्तरान् ॥ ६१ ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ६२ ॥

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ॥ ६३ ॥

प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते ॥ ६४ ॥

उपसञ्जनिष्यमाणनिमित्तोऽप्यवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते इति ॥ ६५ ॥

अपवादो यद्यन्यत्र चरितार्थः तर्हि अन्तरङ्गेण बाध्यते ॥६६ ॥

अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ॥ ६७ ॥

ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ६८ ॥

लादेशेषु वासरूपविधिनास्ति ॥ ६९ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ७० ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टास्यापि ग्रहणम् ॥ ७१ ॥

**[शास्त्रशेषं नाम तृतीयं प्रकरणम्]**

बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ७८ ॥

चानुकृष्टं नोत्तरत्र ॥ ७९ ॥

स्वरोविधौ व्यञ्जनमविद्यमानवत् ॥ ८० ॥

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥ ८१ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ८२ ॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ८३ ॥

क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ८४ ॥

समासान्तविधिरनित्यः ॥ ८५ ॥

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ८६ ॥

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः ॥ ८७ ॥

ताच्छीलिके णेऽण्कृतानि भवन्ति ॥ ८८ ॥

धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ ८९ ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ९० ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ॥ ९१ ॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्॥ ९२॥

अङ्गवृत्ते पुनर्वृत्तावविधिः॥ ९३॥

संज्ञापूर्वकविधेरनित्यत्वम्॥ ९४॥

आगमशास्त्रमनित्यम्॥ ९५॥

गणकार्यमनित्यम्॥९६॥

अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम्॥ ९७॥

नञ्घटितमनित्यम्॥ ९८॥

आतिदेशिकमनित्यम्॥ ९९॥

सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान्॥ १००॥

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्॥ १०१॥

विधौ परिभाषोपतिष्ठते नानुवादे॥ १०२॥

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः॥ १०६॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते॥ १०८॥

विधिनियमसम्भवे विधिरेव ज्यायान्॥ १०९॥

सामान्यातिदेशे विशेषानतिदेशः॥ ११०॥

प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् ॥ १११ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ११२ ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ ११४ ॥

गामादाग्रहणेष्वविशेषः ॥ ११५ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ ११६ ॥

क्वचित् स्मुदायेऽपि ॥ ११७ ॥

बाधकान्येव निपातनानि ॥ ११९ ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १२० ॥

निषेधाश्च बलीयांसः ॥ १२१ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ १२२ ॥

योगविभागादिष्टसिद्धिः ॥ १२३ ॥

पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते ॥ १२४ ॥

ज्ञापकसिद्धं न सर्वत्र ॥ १२५ ॥

पूर्वत्रासिद्धीयमद्वित्वे ॥ १२६ ॥

एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतियस्याश्च न भविष्यति ॥ १२७ ॥

सम्प्रसारणं तदाश्रयं च कार्यं बलवत् ॥ १२८ ॥

क्वचिद् विकृतिः प्रकृति गृह्णाति ॥ १२९ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकयैव ग्रहणम् ॥ १३० ॥

श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च

यत्रैकाज्ग्रहणं चैव पञ्चैतानि व यङ्लुकि ॥ १३१ ॥

पदगौरवाद् योगविभागो गरीयान् ॥ १३२ ॥

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ॥ १३३ ॥

## विमर्शनविषयरहिताः परिभाषाः

**[शास्त्रत्वसम्पादनोद्देश्यं नाम प्रथमं प्रकरणम्  ]**

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ २८ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ २९ ॥

व्यपदेशिवदेकस्मिन् ॥ ३० ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिनास्ति ॥ ३१ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ३२ ॥

एकदेश विकृतमन्यवत् ॥३७ ॥

**[बाधबीजं नाम द्वितीयं प्रकरणम्]**

पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥ ३८ ॥

पुनः प्रसङ्गविज्ञानात् सिद्धम् ॥ ३९ ॥

क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता ॥ ४६ ॥

स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति ॥ ४९ ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ५१ ॥

**[शास्त्रशेषं नाम तृतीयं प्रकरणम्]**

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ १०४ ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ १०७ ॥

श्रुतानुमितयोः श्रुतसम्बन्धो बलवान् ॥ ११३ ॥

# चतुर्थोऽध्यायः

# दोषोद्धारः

## हरिः ओम्

## श्रीमते हयग्रीवाय नमः[८३]

नत्वा गणपतिं देवं नृसिंहं कमलायुतम् ।

तातं शम्भुं प्रसूं दुर्गाकृष्णदेवं तथाग्रजम् ॥१

शास्त्रप्रवर्तकाचार्यान्पाणिनिप्रभृतीन्मुनीन् ।

बालं भट्टाभिधं[८४] पायगुणोपाख्यं परं[८५] गुरुम् ॥

दोषा ये पण्डितम्मन्यैः परिभाषेन्दुशेखरे ।

दत्तास्तान्सम्यगुद्धर्तुं मन्नुदेवेन चिन्त्यते[८६] ॥

[83] हरिः ओम् । श्रीमते हयग्रीवाय नमः G1, G2 : श्रीगणेशाय नमः F1

[84] भट्टाभिधम् F1 : बट्टाभिधम् G1, G2

[85] पायगुणोपाख्यं परम् ः पायगुणोपाख्यापरम् F1 : वायुगुण्डोपाख्यापरम् G1, G2

[86] चिन्त्यते F1, G2 : तन्यते G1

शिष्यशिक्षायै[८७] प्रसङ्गतो[८८]ऽन्येषां मङ्गलाय चोपास्यदेवतानतिंमुपनिबन्धन् चिकीर्षितं प्रतिजानीते। **नत्वा साम्बशिवमिति।** अम्बशब्देन प्रकृतिः माया, तया सहितः शेते यस्मिन् जगदिति व्युत्पत्त्या जगल्लयाधिकरणम्। बृंहते वर्द्धयति[८९]। प्रजामिमामित्यन्तः[९०] बर्द्धभावितण्यर्थात् प्रजावर्द्धकमिति पदत्रयेण सृष्ट्यादिकर्तृत्वं तस्य बोधितम्। यद्वा निराकरणस्य ब्रह्मणो नत्याद्यसंभवात्[९१] साम्बशिवमिति। तथा च तेन सृष्ट्याद्यर्थ-साक्षात्साम्बशिवाकारत्वमेव स्वस्य कल्पितेन च शिवाकारेण[९२] स्वापयोगाय शिष्याद्या-कारकल्पनमिति[९३] शिवस्यस्वरूपकेन[९४] प्राधान्यं बोधितम्। **नागेश इति** । यद्यपि आत्मनामगुरोर्नामित्यभियुक्तोक्तेः[९५] स्वनामग्रहणं स्वस्य निषिद्धम्, तथापि "प्रत्यभिवादेऽशूद्रे" (८-२-८३) इति सूत्रस्थभाष्यकैयटप्रामाण्येन नामग्रहणमभिवादयेदिति धर्मशास्त्र-प्रामाण्येन[९६] च सामान्यनिषेधस्य वैधनामग्रहणातिरिक्तविषयकत्वकल्पनात्। यागीय-

---

[87] शिष्यशिक्षायै F1, G1 : शिष्यशि G2

[88] प्रसङ्गतो F1, G1 : अंशगतो G2

[89] बृंहते F1 : बृंहति G1 : बृह्मते : G2

[90] प्रजामिमामित्यन्तः F1 : प्रशामिमामित्यन्तः G1, G2

[91] नत्याद्यसंभवात् F1 : नत्याद्यसम्भवेन G1, G2

[92] शिवाकारेण F1 : शिवाकारेणन G1, G2

[93] शिष्याद्याकारकल्पनमिति F1 : विष्ण्वाद्यकारणकल्पनमिति G1, G2

[94] शिवस्यस्वरूपकेन F1 : शिवस्वरूपेण G1, G2

[95] आत्मनामगुरोर्नामित्यभियुक्तोक्तेः F1 : आत्मनोमेत्युक्तेः G1, G2

[96] धर्मशास्त्रप्रामाण्येन F1 : G1, G2(o)

हिंसा विधिना "न हिंस्यात्" (अ०सं० १-१-२-२) इति सामान्यनिषेधस्य वैधहिंसातिरिक्तविषयकत्वकल्पनवत्[९७]। स्वकीर्त्यनुवृत्तये स्वनामग्रहणस्य शिष्टाचारानुगृहीतस्य तद्बोधकस्मृत्यनुमितिद्वारा[९८] वैधत्वं प्रकृतेऽप्यस्त्येवेति न दोषः। यद्वोक्तनिषेधस्य पारिभाषिकनामविषयत्वं न यौगिकनामविषयकत्वं रूढेर्बलवत्त्वात्। अत एव "गौर्नदीय आह" इति भाष्यकारस्य यौगिकनामग्रहणं[९९] संगच्छते। प्रकृते च नागेशः प्रवर्तको यस्येति यौगिकत्वान्ननिषेधप्रवृत्तिः। तेन च भाष्यस्थितसिद्धानामेवात्र[१००] विषयता तज्जिज्ञासूनामेव अत्र अधिकारः इति सूचितम्। यद्वा मया क्रियते इत्यनुक्त्या[१०१] नागेशः कुरुते इति तटस्थेनोक्त्यातिनिरासः[१०२]। एवं च प्रयोजननामग्रहणमिति निषेधाप्रवृत्तिः। अहंकृतिनिरासरूपफलस्य स्वात्मगामित्वात् कुरुते इत्यात्मनेपदोपपत्तिरिति तु न सम्यक्। तस्य प्रत्ययाभावस्येव पुरुषार्थत्वेनानुद्देश्यत्वेन अफलत्वात् प्रथमपुरुषफलतायाः तस्मिन् वक्तुं शक्यत्वेऽपि आत्मनेपदफलतायाः तस्मिन् सम्भवाच्च। **कुरुते इति**। ननु ग्रन्थकरणफलस्य सुखबोधरूपस्य[१०३] बालानामित्यनेन न परनिष्ठत्वबोधनात् आत्मनिष्ठत्वाभावात् आत्मनेपदाप्राप्तिरिति चेन्न। "काव्यं यशसेऽर्थकृते" (का०प्र० १-२)

---

[97] वैधहिंसातिरिक्तविषयकत्वकल्पनवत् F1,G2 : यागातिरिक्तविषयकल्पनावत् : G1

[98] स्मृत्यनुमितिद्वारा F1,G2 : स्मृत्यनुभवद्वारा G1

[99] यौगिकनामग्रहणम् F1 : यौगिकस्वनामग्रहणम् G1, G2

[100] भाष्यस्थितसिद्धान्तानां F1,G2 : भाष्यस्थितसिद्धानामेवात्र G1

[101] इत्यनुक्त्या F1, G2 : इति अनुवृत्त्या G1

[102] तटस्थेनोक्त्यातिनिरासः : G1 : ताटस्थेनोक्त्या अतिनिरासः : F1, G2

[103] सुखबोधरूपस्य F1 : सुबोधरुपस्य G1, G2

इति काव्यप्रकाशबोधितयशः प्राप्त्यादिरूपफलस्य काव्यकर्तरीव ग्रन्थकर्तर्यपि यशः प्राप्त्यादिरूपफलस्य स्वगतस्यैव अर्थप्रकाशनरूपस्य वा लौकिकफलस्योद्देश्यत्वादात्मनेपदसिद्धेः। **घटायोन्मीलितमिति** न्यायेन सुखबोधस्य परनिष्ठत्वमपीत्याह [१०४] । **बालानामिति**, परिभाषेन्दुशेखरमिति। पदव्याख्यानन्तु गदातोऽवधेयम्।

[104] परनिष्ठत्वमपीत्याह F1 : परनिष्ठत्वमाशङ्क्याह G1, G2

# { शास्त्रत्वसम्पादनोद्देशं नाम प्रथमं प्रकरणम् }

**व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्॥ १ ॥**

तेन अणुदिदिति व्याख्यानेनेत्यर्थः। परन्तु व्याख्यानस्य दुर्ज्ञेयत्वादगतिकत्वाच्च तत्र तत्र ज्ञापकोपन्यासोऽपि यथा "अणुदित् सवर्णस्य चाप्रत्ययः" (१-१-६८) सूत्रे परेण प्रत्याहारे "उदृत्" (७-४-७) इति तपरकरणं ज्ञापकमुक्तं शब्दरत्ने[105]। तथाहि। पूर्वेण प्रत्याहारे ऋकारस्य अण्त्वाभावात्सवर्णग्रहणाप्रसक्तेस्तन्निष्फलम्। न च "तपरस्तत्कालस्य" (१-१-६९) इति सूत्रेण लृकारग्रहणार्थं तत् "स्थानेऽन्तरतमः" (१-१-४९) सूत्रे ऋकारस्य स्थाने तस्य वारणेन तद्ग्रहणे फलाभावादिति व्यर्थं सत् परेण प्रत्याहारज्ञापकमधिकन्तत्रैव स्पष्टम्। यत्तु नचेत्यादिशङ्कैव तावन्नसंगच्छते। सूत्रकृन्मते ऋकारलृकारयोस्सावर्ण्याभावेन तद्ग्रहणस्य दूरापास्तत्वात्। तपरसूत्रे समानकालासवर्णनिवृत्तये सवर्णपदानुवृत्तेरावश्यकत्वात् वार्तिककृन्मते[106] तत्सम्भवेऽपि "अणुदित् सवर्णस्य चाप्रत्ययः" (१-१-६८) सूत्रे अण्ग्रहणस्य तेन प्रत्याख्यातत्वात् पूर्वेण परेण वेति सन्देहाभावात्। एतेन "उपसर्गादृति धातौ" (६-१-८८) सूत्र तपरकरणात् "अणुदित् सवर्णस्य चाप्रत्ययः" (१-१-६८) सूत्रे अण्ग्रहणं परेणेति न युक्तम्। लकारग्रहणेन चारितार्थ्यादिति शेखरोक्तमपि निरस्तमिति तच्चिन्त्यम्। "उरण् रपरः" (१-१-५०) इति सूत्रे 'र' प्रत्याहारस्य तव मते सत्त्वेन तस्य च तयोः

---

[105] शब्दरत्ने F1,G1 : शब्दरत्नम् G2

[106] वार्तिककृन्मते F1,G1 : वार्तिकमते G2

सावर्ण्यसत्त्वे एव सफलत्वेन[१०७] सूत्रमतेऽपि तयोः सावर्ण्यानुमानात्। सिद्धान्ते 'र' प्रत्यहाराभावेन तस्यानुमापकत्वासंभवेऽपि "अकोऽकि दीर्घः" इत्येव वाच्ये "होतृ-लृकार" इत्येतदर्थकृतेन "अकः सवर्णे दीर्घः" (६-१-९७) इति सर्वणग्रहणेन "प्रथमयोः पूर्वसवर्णः" इत्येव वक्तव्ये गमृ इत्येतदर्थं कृतेन सवर्णग्रहणेन च सूत्रमते तयोः सावर्ण्यानुमानाच्च। केचित्तु "लपरत्वं वक्ष्यमिति" भाष्येण लपर इति न्यासतात्पर्यकेण सूत्रमते तयोः सावर्ण्यानुमानम् अन्यथोरिति[१०८] ऋकारेण लृकारग्रहणस्यैवाभावात्[१०९] लपरत्वविधानवैयर्थ्यापत्तेः। न हि लृकारग्रहणमपि चोदितं भाष्ये। ननु "सवर्णेऽण् ग्रहणमपरिभाष्यम्" आकृतिग्रहणादिति[११०] वार्तिकमते प्राल्लकारीयतीत्यादौ[१११] सवर्णसंज्ञा-मात्रेण न निस्तारः। लृकारस्य ऋत्त्वजात्यनाक्रान्तत्वात्। अतः सावर्ण्यवचनस्थाने लृवर्णस्य ऋवद्भावोवाच्यः[११२]। न चैवं "होतृ ऋकार" इत्यत्र सावर्ण्यनिमित्तकदीर्घानापत्तिरिति वाच्यम्। "लृति लृवेति" वाग्रहणेन दीर्घस्यापि समुच्चयेन विधानात्[११३]। तथा च सावर्ण्यानङ्गीकारेऽपि ऋवद्भावेनोरिति ऋकारेण लृकारस्यापि

---

107 सफलत्वेन F1,G2 : सफलत्वेऽपि G1

108 सावर्ण्यानुमानाच्च। केचित्तु लपरत्वं वक्ष्यमिति भाष्येण लपर इति न्यासतात्पर्यकेण सूत्रमते तयोः सावर्ण्यानुमानम् G1 : सावर्ण्यानुमानम् अन्यथोरिति F1, G2

109 लृकारग्रहणस्यैवाभावात् F1, G1 : लृकारग्रहणस्यैवालाभात् G2

110 आकृतिग्रहणादिति F1 : इति G1, G2

111 प्राल्लकारीयतीत्यादौ F1,G1 : प्राल्लकारियतीत्यादौ G2

112 ऋवद्भावोवाच्यः F1,G2 : लृकारस्त्रद्भावो वक्तव्यः G1

113 समुच्चयेन विधानात् F1 : समुच्चयात् G1, G2

ग्रहणेन तत्स्थानिकाणो लपरत्वविधानेन भाष्योपपत्तेः कथं सावर्ण्यानुमानमिति चेत् सत्यम्। जातिपक्षे तथा सिद्धान्तस्य शब्दरत्नादौ प्रतिपादनेऽपि व्यक्तिपक्षे एव अणुग्रहणसत्त्वेन तत्रैव ज्ञापकोपन्यासात्। व्यक्तिपक्षाभिप्रायेणैव "ऋ-लृ" वर्णयोस्सावर्ण्यवचनम् अवलम्ब्य षाष्ठवचनद्वयप्रत्याख्यानपर "तुल्यास्यप्रयत्नं सवर्णम्" (१-१-९) सूत्रस्थभाष्यसंगतिरपीति[114] न भाष्ययोर्विरोधः इति तत्र। "किं पुनरत्र ज्यायः सवर्णसंज्ञावचनमेव ज्याय" इत्युपक्रम्य "यदि तर्हि ऋकारग्रहणे लृकारग्रहणं सन्निहितं भवति" "उरण् रपरः" (१-१-५०) लृकारस्यापि रपरत्वं प्राप्नोति लृकारस्य लपरत्वं वक्ष्यामि तच्चाप्यवश्यं वक्तव्यम्, सत्यां सवर्णसंज्ञायां विध्यर्थं [असत्यां] तदेव सत्यां रेफबाधनार्थमिति तुल्यास्यसूत्रस्थ[115] भाष्ये[116] सवर्णसंज्ञावचनानारम्भे लृकारघटितस्यैव लपरत्ववचनस्य कर्तव्यतायाः प्रतीतेः तदारम्भे तु तद्घटितस्य अपीत्यन्यत्। एतेन वार्तिकमते स्थित्वैव एतद्भाष्यं प्रवृत्तिरित्यपास्तमिति दिक्[117]।

किञ्च वार्तिककृदुक्तजातिपक्षे उक्तरीत्या ऋलृवर्णयोः साजात्यातिदेशसत्त्वेऽपि सावर्ण्यासत्त्वेन वार्तिककृन्मते तत्सम्भवेऽपीत्यस्याज्ञान[118] विजृम्भितत्वमिव। प्रत्युत-वार्तिककृन्मते तत्सम्भवेऽपीत्युक्त्या व्यक्तिपक्षाभिप्रायेणैव सावर्ण्यसम्भवस्य त्वया बोधनात्। अत एव "तुल्यास्यप्रयत्नं सवर्णम्" (१-१-९) इति सूत्रे भाष्ये तयोः

---

[114] सूत्रस्थभाष्यसंगतिरपीति F1(e) : G1, G2(o)

[115] तुल्यास्यसूत्रस्थ F1 : तुल्यासूत्रस्थ G1,G2

[116] भाष्ये G1,G2 : भाष्येण F1

[117] इति दिक् F1(e) : G1,G2(o)

[118] ज्ञान F1 : सावज्ञान G1,G2

स्थानभेदात् सावर्ण्यमाशंक्य [११९] व्यक्तिपक्षाभिप्रायेणैव ॠऌवर्णयोः सावर्ण्यवचनमवतारितम्। एतस्य जातिपक्षाभिप्रायकत्वे सावर्ण्यमात्रेण निस्तरात् समानजातित्वमेव विधीयते। तस्माज्जातिपक्षे अणुग्रहणाभावस्तयोः समानजातित्वातिदेशश्च व्यक्तिपक्ष इव अणुग्रहणं तयोः सावर्ण्यंचेति सर्वं सुस्थम्। ननु सिद्धान्ते जातिपक्षे तुल्यास्यमिति सवर्णसंज्ञाविधिप्रदेशे एव समाने जातित्वविधानमनुचितं प्रकरणविरोधादिति चेन्न। "कालाध्वनोरत्यन्तसंयोगे" (२-३-५) इति "अत्यन्तसंयोगे" इत्यस्य स्थाने कालाध्वनोरत्यन्तं संयोग कर्मवल्लाद्यर्थमिति [१२०]। द्वितीयप्रकरणे कर्मवद्भावविधानस्य "अधीगर्थदयेशां कर्मणि" (२-३-५२) इति षष्ठीप्रकरणे कर्मादिष्वकर्मवद्भावविरुद्धस्यान्यत्र दर्शनाददोषात्। तच्च आद्ये धात्वर्थभेदं स्वीकृत्य द्वितीये शेषे इत्यनुवर्त्य [१२१] च प्रत्याख्यातमित्यन्यत्। उक्तं वैरूप्यवारणाय तुल्यास्यसूत्रेणापि समानजातित्वमेव विधीयते इति तु बहुसमाधेयत्वात् दुरूहमक्षरस्वरसाननुगुण्यं चेत्युपेक्षितमित्यलम्।

**यथोद्देशं संज्ञापरिभाषम् ॥ २॥**

**कार्यं कालसंज्ञापरिभाषम्॥ ३॥**

**न च कार्यकालपक्षे ङमो ह्रस्वादित्यादाविति।** यत्तु यत्रापि यथोद्देशत्वेन परत्वात् त्रिपाद्यां प्रवृत्तिः प्रधानसंस्कारायेष्यते। यथा ङमो ह्रस्वादित्यादौ सप्तमी-पञ्चम्युभयनिर्देशे परत्वात् पञ्चमीनिर्देशस्य तदर्थन्तु "न मु ने" [१२२] (८-२-३) इति

---

[119] सावर्ण्यमाशंक्य F1 : भेदादावर्णसवर्णमाशङ्क्य G1 : भेदादसाववर्णमाशङ्क्य G2

[120] कर्मवल्लाद्यर्थमिति G1 , G2 : कर्मवध्वाद्यर्थमिति F1

[121] इत्यनुवर्त्य F1, G2 : इत्यावर्त्य G1

[122] नमुने F1,G2 : त्वमुना G1

सूत्रे अधुनेतिवदमुनेति वक्तव्ये नेत्युक्तेर्योगविभागो न[१२३] पूर्वत्रासिद्धत्वाभावः कैयटादिभिर्वर्णितः। तत्राऽश्रयणीयोऽथवा “न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु” (१-१-५७) इति सूत्रे त्रैपादिकानां द्विर्वचनादीनां[१२४] केषाञ्चित् ग्रहणेन “इदुदुपधस्य चाप्रत्ययस्य”(८-३-४१) इति सूत्रे प्रत्ययस्येत्युक्तिर्वा प्रधानीयसंस्काराणां[१२५] क्वचित् त्रिपाद्यां प्रवृत्तिरङ्गीकरणीयेति यथोद्देशपक्षेणैव इदं भाष्यं योजयामासुः तच्चिन्त्यम्। योगविभागस्य भाष्येऽदर्शनेन वार्तिककृत्पठितसिद्धकाण्डवैयर्थ्येन च अप्रामाणिकत्वात्। द्विर्वचनादिग्रहणस्य भाष्ये प्रत्याख्यानाच्च। वृत्तिघटितानामतिदेशानां[१२६] त्रिपाद्यां प्रवृत्तिज्ञापनार्थत्वाद्वा। अत एव अग्निरित्यादौ विसर्गसिद्धिः। अप्रत्ययश्चेति[१२७] निषेधश्च सार्थकः। वस्तुतः[१२८] प्रत्ययपदस्य तत्सम्बन्धिपरत्वेन प्रत्ययसम्बन्धिभिन्नस्येत्यर्थस्य शब्दरत्नादौ व्यवस्थापितत्वादिति बोध्यम्। तस्माद्यथोद्देशपक्षेणैतद्भाष्ययोजनमसंगतमेव त्रिपाद्या असिद्धत्वेन परिभाषायाः तत्राप्रवृत्यापत्तेः[१२९]। अतः कार्यकालपक्षः एवाशंक्य समाध्यते[१३०] “विप्रतिषेधे परं कार्यम्” (१-४-२) इति सूत्रे यत्तु

---

[123] विभागो न G1,G2 : विभागेन F1

[124] द्विर्वचनादीनाम् F1(e) : G1,G2(o)

[125] प्रधानोपकारकाणाम् F1 : प्रधानीयसंस्काराणाम् G1,G2

[126] वृत्तिघटितानामतिदेशानाम् F1 : वतिघठितानामतिदेशानाम् G1,G2

[127] अप्रत्ययश्चेति G1,G2 : अप्रत्ययस्येति F1

[128] वस्तुतः F1 : वस्तुतस्तु G1,G2

[129] तत्राप्रवृत्यापत्तेः F1,G2 : प्रवृत्तेः G1

[130] समाध्यते F1,G2 : समाधत्ते G1

ए तदादित्यारभ्यगो भवतीत्यन्तं मूलमनूद्य तद्भाष्यवार्तिकविरुद्धं, तथाहि अमी अत्रामू अत्र इत्यादौ मीत्वादेरसिद्धत्वादयादयः प्राप्नुवन्ति। "अदसो मात्" (१-१-१२) इति प्रगृह्यसंज्ञायास्तु न सामर्थ्यकार्यकालपक्षेऽणोऽप्रगृह्यस्येत्येतदेकवाक्यतापन्नान्तां प्रति मीत्वादेरसिद्धत्वेन सामर्थ्यस्य उपक्षीणत्वादतोऽयादीनां प्रतिषेधो वक्तव्यो विप्रतिषेधाद्वा। कार्यकालपक्षे "अदसो मात्" (१-१-१२) इति सूत्रं प्लुतप्रगृह्या इत्येतद्देशस्थं परत्वादया-दीन् बाधते इति "अदसो मात्" (१-१-१२) इति सूत्रे भाष्यवार्तिकयोः उक्तम्। तच्च समाधानद्वयं स्वदेशत्यागकल्पनं विना कथं संगच्छतामित्याहुः तच्चिन्त्यम्। उक्तभाष्यात् कार्यकालसंज्ञैव स्वदेशत्यागमवलम्बते इत्यर्थस्य संज्ञाशास्त्रस्य तु इत्यादिना भाष्ये उक्तमित्यन्तेन ग्रन्थेन मूलकृतैवावेदितत्वात् कार्यकालायाः परिभाषायाः स्वेदशत्यागान-ङ्गीकारेऽपि क्षत्यभावात्। यदपि संज्ञायाः स्वतो विरोधात् कार्यविशेषणबोधोत्तरमेव विरोधप्रतिसन्धानं चेति तत्रत्यपरत्वमेव विप्रतिषेधसूत्रप्रवृत्तौ बीजम्[१३१] । परिभाषाविषये तु "आदेः परस्य" (१-१-५३), "अनेकाल्शित् सर्वस्य" (१-१-५५) इत्यादेः कार्यविशेष-प्रतिसन्धानं विनापि विरोधसम्भवात्पाठकृतमेव परत्वं विप्रतिषेधसूत्रप्रवृत्तौ बीजमिति हित्वदभिमतम्। तन्न युक्तम्। "तस्मिन्निति निर्दिष्टे पूर्वस्य"(१-१-६५), "तस्मादि-त्युत्तरस्य" (१-१-६६) इत्येभ्यां पूर्वपरयोः एकसम्बन्धित्वबोधने स्वतो विरोधात्तु ङमुडादिरूपकार्यविशेषप्रतिसन्धाने तु तस्य सत्त्वात् संज्ञाया इव परिभाषाया अपि कार्यकालपक्षे पाठकृतपरत्वानापत्त्या परत्वात्पञ्चमीनिर्देशो बलीयानिति भाष्यासंगत्यापत्तेरिति [१३२] तदपि न। कार्यविशेषप्रतिसन्धानं विनापि विधेयत्वेन यत्किञ्चिद्विधेयसम्बन्धित्वं आदौ यत्किञ्चिद्विधेयसम्बन्धित्वं सर्वस्मिन्निति स्वतो विरोधित्वं

---

[131] बीजम् F1(e) : G1, G2(o)

[132] भाष्यासंगत्यापत्तेरिति F1,G2 : भाष्यासाङ्गत्यापत्तिः G1

न स्यात्। अपि तु "एकः पूर्वपरयोः"(६-१-८१) इत्युपादानात्। ङ्म इत्यादौ युगपद्वयोः परिभाषयोः न प्रकल्पकत्वमिति न विरोध इत्युच्यते, तदा कार्यविशेष-प्रतिसन्धानेऽपि युगपत्प्रकल्पकत्वाभावेन विरोधाभावात्तदुक्तिः व्याहतैवेति बोध्यम्। वस्तुतः परत्वादित्येकदेश्युक्तिः। ङ्म इति पञ्चम्या अचारितार्थ्येन निरवकाशत्वादित्येव भाष्ये सिद्धान्त्यभिमतो[१३३] हेतुः इति दिक्।

**अनेकान्ताः अनुबन्धाः ॥ ४ ॥**

अनुबन्धात्पक्षीकृत्यानवयवत्वे साध्ये व्यतिरेकिणं हेतुं प्रतिपादयितुं व्यतिरेक-व्याप्तिमाह। तथा च णकाराद्यनुबन्धस्तदनवयवः तत्र अनुपलभ्यमानत्वस्य व्याप्या-धिकरणकोपलब्धिविषयत्वाभावात्। "यन्नैवं तन्नैवम्" इत्यनुमानप्रयोगः। एतेन हेतोः वैयधिकरण्याशंका निरस्ता।

**एकान्ताः ॥ ५ ॥**

सिद्धान्तमाह वस्तुतः एकान्ता इति। अत्रापि अणादिघटकणकाराद्यनुबन्धेषु तदवयवत्वं साध्यते। तत्रैवोपलभ्यमानत्वात् । तदन्याधिकरणकोपलब्धिविषयत्वाभावे सति तत्प्रत्यायकाधिकरणकोपलब्धिविषयत्वात् "यन्नैवं तन्नैवम्" इताद्यनुमानप्रयोगइत्याह [१३४] **अनवयवो हीति।** मूले [१३५] उभलंभपदं

---

[133] सिद्धान्त्यभिमतो F1,G1 : सिद्धायभिमतः G2

[134] इताद्यनुमानप्रयोग इत्याह F1 : इताद्यनुमानप्रयोग माह G1, G2

[135] मूले G1 : फले F1,G2

कर्मप्रत्ययान्तकर्मसाधनम्[१३६] भावप्रधानम्। यद्वा भावप्रत्ययान्तमुलब्ध्यर्थकविषयतया हेतुः इति[१३७] पूर्वोक्तानुमानफलितम्। **व्यर्थतापत्तेश्चेति**[१३८]। न च दघ्नचश्चकारेण स्वपूर्ववर्तिन्येव कार्यं ज्ञाप्यते नोत्तरत्र। अत एव "काश्यादिभ्यष्ठञ्ञिठौ" (४-२-११५) इति ञित्त्वं[१३९] चारितार्थमिति "वुञ्छण्..." (४-२-७९) इत्यादावनेकान्तत्वेऽपि न दोष इति वाच्यम्। एवमपि गौरवं भाष्यविरोधश्च मुख्यं दूषणमस्त्येवेत्याशयात्तदाह **इदंचेति**।

**नानुबन्धकृतमनेकाल्त्वम्** ॥ ६ ॥

ननु अनुबन्धत्वयोग्यकृतमनेकाल्वत्वं नेति परिभाषार्थस्य अन्यत्र उक्ततया कथमानुपूर्व्यात्सिद्धिः कथितेति चेन्न। दीक्षितानुरोधेन एतत् ग्रन्थस्य सत्त्वात् सर्वादिशस्तु प्रश्लेषेण बोध्यः। स्पष्टश्चायमर्थो "लुँटः प्रथमस्य डारौरसः"[१४०] (२-४-८५) इति सूत्रे अनित्यत्वात्सिद्धमेकदेश्युक्तभाष्यव्याख्यानावसरे उद्योते कैयटस्याप्यत्रैव स्वरस इति तत्रैव स्पष्टम्। यत्तु एकान्तत्वपक्षे अनुबन्धकार्ये अनल्विधाविति निषेधादिति[१४१] निषेधाप्रवृत्तये अनुबन्धानाम् अल्व्यवहारा भावज्ञापकं शिद्ग्रहणमित्युक्तं शेखरे

---

[136] कर्मप्रत्ययान्तकर्मसाधनम् F1 : कर्मसाधनम् G1, G2

[137] हेतुः इति F1,G2 : G1 (o)

[138] व्यर्थतापतेश्चेति F1,G2 : व्यर्थत्वापतेश्चेति G1

[139] ञित्त्वम् F1: इत्वम् G1, G2

[140] लुटः प्रथमस्य डारौरसः F1: टुटश्चेत्यत्र G1, G2

[141] निषेधादिति F1: G1, G2(o)

तन्मुधैवानुबन्धविनिर्मुक्तिपदार्थोपस्थितेः। सर्वसंमतत्त्वेन स्वयमपि तथैवानूदितत्वेन दोषानवकाशत्वादिति तन्मुधैव "अणुदित् सवर्णस्य चाप्रत्ययः" (१-१-६८) भाष्य-प्रामाण्यादुद्देश्यत्वविधेयत्वं विषयतया बोधविषयतायाः अनुबन्धविनिर्मुक्ते सत्त्वेऽपि[१४२] सानुबन्धकनिर्देशस्थानित्वादेशत्वयोः अनुबन्धविशिष्टसूत्रपात्ते एव सत्त्वस्य "क्ङिति च" (१-१-५), "गाङ्लिटि" (२-४-४९) ,"हलः श्न" (३-३-१२१) इत्यादिसूत्रस्थ-भाष्याध्यानेन तद्विरोधात्। स्पष्टश्चायमर्थः "स्थानिवदादेशोऽनल्विधौ" (१-१-५५) सूत्रे शेखरे। अत एव ङेयदिशस्य "ग्रहोऽलिँटि दीर्घः" (७-२-३७) न इति इटो दीर्घादेशस्य (ग्रहोलिटिदीर्घः इत्यनेन दीर्घः) शब्दतः स्थानिभूतालोऽभावेन अनल्विधाविति निषेधः विषयत्वेन स्थानिवत्वात् "सुँपि च" (७-३-१०२), "इट ईटि" (८-२-२८) इति दीर्घसलोपयोः रामाया ग्रहीदित्यादौसिद्धिः। एतत्सिद्धये निमित्तता-वच्छेदके दीक्षितोक्तसाधारण्यनिर्देशो विकल्प एव[१४३] एतेन[१४४] उपस्थाप्योपस्थाका-भयवृत्तित्वेनेट्त्वादेः स्थान्यल्साधारणधर्मत्वाद्यो हि स्थान्यल्साधारणोऽल्वादिः तद्व्याप्यो यो हल्वादिः स एवानलनल्विधाविति निषेधेन निवर्त्यत इत्पास्तम्। न चैवम्[१४५] अपि स्थानिसम्बन्धी योऽलिति द्वितीयार्थमादाय रामायाग्रहीदित्यादेरसिद्धिरेव सुप्त्वेट्त्वादेरल्मात्रवृत्तिर्यः स्थानिसम्बन्धीतावच्छेदको धर्मः एत्वेत्वादिस्तदवच्छिन्ने स्थानिसम्बन्ध्येकाररूपाल्वृत्तित्वात् अनल्विधाविति निषेधादिति चेत् सत्यम्। आदेश विधावुपात्तस्थानिसम्बन्धितावच्छेदकधर्मस्य कार्यविधानानुपादानेन निमित्ततावच्छेदक-

---

[142] सत्त्वेऽपि F1: सत्त्वे G1, G2

[143] विकल्प एव G1 : विफल F1,G2

[144] एतेन F1,G2 : वातेन G1

[145] न चैवम् F1: नन्वेवं G1 : नवम् G2

धर्मेण सह सरूपेण अल्मात्रवृत्तित्वरुपसाधारणधर्मेण वाऽभेदे एव द्वितीयार्थमादाय निषेधप्रवृत्तेः अङ्गीकारादत्त एव शेखरे द्वितीयार्थव्याख्यावसरे बभूविवेत्यत्र दोषवारणायन्निमित्तवैकल्पेत्यादि पंक्तौ निमित्ततावच्छेदके फलितम् साधारण्यमुक्तम्, प्रथमा विषये तु न सर्वत्र तयोरभेदः इति न तत्र[146] तथोक्तमित्युपरिष्टाद्विवेचयिष्यामः[147]। एतेन शब्दत इदुपस्थान्यवयवइकारवृत्ति इट्त्वस्य अल्विधित्वेन न द्वितीयार्थमादाय निषेधापत्तिः। बभूविवेत्यादावादेशसाधारणवल्वादीनिमित्तकस्येटः स्थान्यलाश्रिततत्वात् प्राप्तप्रतिषेधनिवृत्तये स्थान्यलसाधारण्येन आश्रणामङ्गीकृतं त्वयापीति पूर्वापरविरोधश्चेत्य-पास्तमिति दिक्।

**नानुबन्धकृतमनेजन्तत्वम्** ॥ ७ ॥

**निर्देशोऽस्या इति**। यद्यपि तु माङः इति कृतात्वानिर्देशऽनुबन्धानामनेकान्तत्वे ज्ञापकः। तथापि सति "अवर्णस्त्रसावनञः" (६-४-१२७) इत्यादावनेकाल्त्वाभावात् सर्वादिशत्तायाप्राप्तेरन्त्यादेशत्वसिद्धिः । अवदातं मुखमित्यत्र पकारसत्त्वेऽपि एजन्त-त्वानपायात् आत्वे अदाविति प्रतिषेधसिद्धिः[148] । "गोद" इत्यादौ काणोस्वारूप्यात् "वाऽसरूपोऽस्त्रियाम्" (३-१-९४) न्यायप्रवृत्या केनाणोनित्यबाधसिद्धिश्चेति परिभाषात्रयं व्यर्थम्। "तस्य लोपः" (१-३-९) इति सूत्रस्थ कैयटस्याप्यत्रैव स्वरस इत्युच्यते तथाहि शित्किदादिषु बहुषु शब्देषु समीपे अवयवत्वारोपेण बहुव्रीहिः स्वीकार्यः।

---

[146] तत्र F1 : तेत्र G1, G2

[147] विवेचयिष्यामः F1 : विचारयिष्यामः G1, G2

[148] प्रतिषेधसिद्धिः F1 : प्रतिषेधस्सिद्धः G1, G2

अन्त्यादिपदयोस्तत्र तत्र लक्षणाश्रयणं, वुच्छणादावगतिकगति व्याख्यानादि स्वीकारः "तस्य लोपः" (१-३-९) इति सूत्रस्थभाष्य विरोधश्चापद्येतेति माङ्रूपादिना तत्परिभाषार्थं ज्ञापकतैव साध्वीति बोध्यम्। एतेनोक्तगौरवं भाष्यविरोधं च सहन् परिभाषात्रयं स्वीकारप्रयुक्त[149] गौरवमसहन् विपरीतवादिनानु मन्तव्यः। अनुबन्धस्य अनेकान्तत्वात्सिद्धमिति तत्र भाष्योक्तिस्त्वेकदेशिन इति प्रदीपोद्योते स्पष्टम्।

**नानुबन्धकृतमसारूप्यम्॥ ८॥**

**विकल्पविधायकमिति।** विकल्पार्थकः विभाषापदघटितं ज्ञापकमित्यर्थः। विभाषा-ग्रहणं ज्ञापकमिति यावत् ।

**उभयगतिरिहभवति॥ ९॥**

**त्यन्ताशदन्तावेति**[150] । ननु कतीतित्यन्तासंख्याकृत्रिमाऽस्तीतित्यन्तप्रतिषेधो-ज्ञापकएवेति वाच्यम्। अर्थवदनर्थकयोः कृत्रिमयोस्त्रिशब्दयोः सम्भवे एवैत्परिभाषा

---

[149] प्रयुक्त F1,G1 : युक्त G2

[150] त्यन्ताशदन्तावेति F1 : त्यन्ताशदन्तति G1, G2

संचारात् विशंतिशब्दे [१५१] विशंतिप्रत्ययसत्त्वेन 'ति' शब्दस्यानर्थकत्वाद्विंशादेशापक्षे 'ति' प्रत्ययस्य अर्थवत्वेऽप्यकृतिमत्वादत आह **शदन्तावेति** गुरुचरणाः [१५२] । अत एव कथं कृत्वा ज्ञापकं नहि कृत्रिम उक्तिः संगच्छते। यद्यपि तद्ग्निमात् पञ्चापित्यन्तायाः प्रतिषेधं शास्ति इत्यादि भाष्यादार्थवद्ग्रहणम् इति परिभाषासंचारेण त्यन्तप्रतिषेध-स्यापि [१५३] ज्ञापकत्वं [१५४] लभ्यते। तथाप्युक्तरीत्या अर्थवद्ग्रहणपरिभाषाया असंचारात् प्रदीपोद्योतयोः[१५५] रूपपादितस्यापि तत्संचारस्य क्लिष्टत्वाच्च तदनादर इति तात्पर्यम्।

**न बोधोपयोगीति**। यथा घटशब्दो घटार्थवाचक इति सामान्यज्ञानं नीलघट इत्यादि विशेषबोधोपयोगि न तथा "सर्वे [१५६] सर्वार्थवाचकाः" इति सामान्यज्ञानं वृद्धिशब्द आदौ च वाचक इति विशेषबोधोपयोगिन इत्यर्थः। तादृशसामान्यज्ञानस्यार्थः इत्येवं सामान्योपस्थितिद्वारा तादृशसामान्याकार [१५७] बोधजनकत्वन्त्वस्त्येव। "सर्वं विष्णुमयं जगत्" इत्यादितो "घटो विष्णुमयः", "पटो विष्णुमयः" इत्यादि बोधविशेष-धर्मावच्छिन्नोपस्थितेः भावेन सार्वजनीनानुभवविरुद्धमेव[१५८] । सर्वशब्दाद्वस्तुत्वव्यापकताया

---

[151] विशंतिशब्दे G1, G2 : F1(o)

[152] गुरुचरणाः F1 : G1, G2(o)

[153] त्यन्तप्रतिषेधस्यापि F1 : म्यन्तप्रतिषेधस्यापि G1,G2

[154] ज्ञापकत्वम् F1,G2 : ज्ञापकम् G1

[155] प्रदीपोद्योतयोः F1 : प्रतिपाद्योतयोः G1 : प्रतीपोद्योतयोः G2

[156] सर्वे F1, G2 : सर्वे सर्वे G1

[157] तादृशसामान्याकार F1 : तादृशसामान्य G1,G2

[158] सार्वजनीनानुभवविरुद्धमेव F1, G2 : सार्वजनानुभवविरुद्ध एव G1

एव विष्णौ प्रतीतेः। चैत्रो दधि भुङ्क्ते, मैत्रः क्षीरं, देवदत्त ओदनम्, यज्ञदत्तस्तु सर्वमित्यादौ तु समभिव्याहृतपदार्थतावच्छेदकावच्छिन्नस्यैव बोधो न तु व्यापकताया विशेषधर्मानुपस्थितावेव व्यापकतायाः[१५९] तदर्थत्वादित्यन्यत्र स्पष्टम्। एतेनेदं चिन्त्यम्। घट इति सामान्यज्ञानस्य[१६०] बोधोपयोगित्वदर्शनात् नीलपीतादि व्यक्तिविशेषबोधः प्रकरणादि सहकारेण शक्तेः अवच्छेदात् इति चेत् सत्यम्। प्रकृतेऽपि "सर्वं विष्णुमयं जगत्" इत्यादौ सर्वादिशब्दोपस्थितेः अर्थोगत्यन्तराभावाच्च इत्यपास्तम्। अनेकशक्यतावच्छेदकत्वे सति एकशक्यतावच्छेदकत्वरूपनानार्थकत्वस्य घटादिशब्दे अभावेन प्रकरणादेः अभिधानियामकत्वाभावाच्च। अत एव विरोधिताया उदाहरणप्रसङ्गे रामार्जुनाविति प्राचोक्तमुदाहरणम् अन्योन्याश्रयेण संखण्ड्य तस्मात् अन्यतरस्य पदस्य व्यवस्थितार्थत्वे एव स्मृतेन विरोध प्रतिसमाधानान्नानार्थ[१६१] पदस्य अभिधानियमनमिति रामरावणयोः इत्युदाहरणं भवितुमर्हतीति रसगङ्गाधरकृतः(द्वि०आ०)। व्यक्त्यभिप्रायेण नानार्थकत्वस्वीकारे व्यवस्थितार्थशब्दाप्रसिद्धिः। काव्यप्रदीपकारा[१६२] अपि पञ्चमोल्लासे व्यञ्जनाव्यवस्थापनप्रस्तावे वाच्यव्यंग्ययोः नियतत्वानियतत्वरूप-वैधर्म्यकथनप्रसङ्गे घटादि शब्दवाच्यस्य व्यवस्थितत्वं, नानार्थकम्[१६३] सैन्धवादिशब्द-वाच्यार्थस्या व्यवस्थितत्वं स्वीचक्रुः। किञ्च अनेकधर्मावच्छिन्नानां शब्दादुपस्थितौ क्व तात्पर्यमिति सन्देहे प्रकरणादि तात्पर्यनिर्णायकम्। नानार्थशब्दस्थले घटः

---

[159] विशेषधर्मानुपस्थितावेव व्यापकतायाः F1(e) : G1,G2(o)

[160] सामान्यज्ञानस्य G1,G2 : सामान्याकारस्य तस्य F1

[161] प्रतिसमाधानान्नानार्थम् F1 : प्रतिसन्धानार्थम् G1 : प्रतिबन्धनार्थम् G2

[162] काव्यप्रदीपकारा F1 : अस्य प्रदीपकारा G1, G2

[163] नानार्थकम् G1, G2 : नार्थकम् F1

इत्यादौ घटत्वेनैव सर्वेषामुपस्थितौ नीलघटत्वारेरुपस्थापकत्वाभावेन तात्पर्यसन्देहा-दनिर्णायकं प्रकरणादिः। नीलघटत्वादि विशेषरुपेण[१६४] गृहितशक्तिकं प्रति प्रकरणादि सहकारेण घट इति ज्ञानस्य विशेषविषयकत्वमस्त्येवेति[१६५] संक्षेपः।

**कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते॥ १०॥**

**अतिशायकार्थेनेति।** नातिशयितकार्यवान्निमित्तत्वेन[१६६] नाश्रीयते इत्याह। **कार्यमनुभवन्निति** "ननु ऊर्णुनविषति" इत्यत्र[१६७] इसुशब्दस्येव शयितरि इत्यत्र ङितश्शीशब्दस्य सार्वधातुकार्द्धधातुकयोः इगन्ताङ्गस्य गुणविधानात् कार्यानुभावः। इकारे कार्यानुभवसत्त्वेऽपि ङित्वाभावः तस्य समुदायानुबन्धत्वादिति कथं विशिष्ट-परिभाषाज्ञापकत्वमिति चेन्न। (कार्यानुभववदवयवकत्वरुपकार्यित्वस्य परिभाषायाम-विवक्षितत्वान्निर्देशस्य ज्ञापकत्वनिर्वाहात्) ऊर्णुनविषतीत्यादौ[१६८] च तादृशकार्यत्वस्य सन्नन्ते[१६९] सत्त्वेन तस्य निमित्तत्वानाश्रयणेऽपि सोद्वित्वनिमित्तत्वे[१७०] आश्रिते बोधका-भावात्। अरिरिषतीत्यादौ च स्त्रिशब्दस्य द्वित्वभावकत्त्वेन इसो द्वित्वकार्यानुभावात्तस्य

---

164 विशेषरुपेण F1, G1 : विशेष G2

165 विशेषविषयकत्वमस्त्येवेति F1, G1 : विशेषविषयकत्वमस्यैवेति G2

166 नातिशयितकार्यवान्निमित्तत्वेन F1 : नादिशयितकार्यवान्नित्तत्वेन G1, G2

167 ऊर्णुनविषति इत्यत्र F1 : ऊर्णुनविषति तत्र G1, G2

168 ऊर्णुनविषतीत्यादौ G1 : ऊर्णुतविपरीतीत्यादौ F1,G2

169 सन्नन्ते : सनन्ते F1, G1, G2

170 सोद्वित्वनिमित्तत्वे F1 ः मसोद्वित्वनिमित्तत्वे G1, G2

निमित्तत्त्वेन आश्रयणम्। यद्वा 'सर्वे सर्वोपदादेशाः' इति न्यायेन 'शी' इत्यस्य 'शे' इत्यादेशेन दोषाभावात्। ऊर्णुनविषतीत्यादौ तु उक्तरीत्या समुदायादेशेन समुदायेतत्त्वेऽपि इसो निमित्तत्वमसत्येवेति संक्षेपः। केचित्तु सार्वधातुकार्धधातुक-योरित्यादौ इक् परिभाषाप्रवृतौ प्रथमान्तगुणपदश्रवणमात्रस्य प्रयोजकतया तज्ज्ञाने सर्वपेक्षया अन्तरङ्गत्वात् तदुपस्थितौ एकार्थबोधे जाते स्थानषष्ठीत्वानिर्णये पश्चात् प्रसक्तौ अलोऽन्त्यपरिभाषाया **निषेधाश्च बलीयांसः** इति न्यायेन कित् इत्यस्योपस्थित्या निषेध पर्युदासार्थकनञोऽभावेन वाक्यैकवाक्यतया [१७१] अन्वयबोधे तदवस्थायामेङो ङित्वस्य प्रशक्तकार्यित्वस्य च सत्त्वेन परिभाषोत्पतौ पश्चादप्रतिबद्धप्रसराऽलोऽन्त्य परिभाषाप्रवृत्तावपि तस्याः पूर्वोक्तरीत्या अप्रयोजनकत्त्वेन ज्ञापकत्वस्य मेरुशिखरा-रूढत्वादिति समादधुः। तन्न युक्तिमत्। विधिनिषेधयोः युगपत्प्रवृत्तौ निषेधस्य विध्यपवादत्वेन बाधकत्वादन्तरङ्गोपजीव्यनिषेधविध्यपेक्षयैव "**बलीयस्त्वस्य निषेधाश्च बलीयांसः**" न्यायेन [१७२] प्रतिपादनात्। अन्यथा शास्त्रद्वयप्रमाण्यात् विकल्पापत्तिः । स्पष्टश्चेदं "कमेर्णिङ्" (३-१-३०), "न लुमताऽङ्गस्य" (१-१-६२) इतीत्यनयोः योगयो-र्भाष्यप्रदीपोद्योते ततश्च "शयिता" इत्यादौ अलोऽन्त्यपरिभाषया इगन्तस्य [१७३] इति प्रसज्यमानो गुणो "निषेधाश्च बलीयसां" इति न्यायेन "क्ङिति च" [१७४] (१-१-५) इति निषेधेन बोध्यते। सत्यामप्येतस्यां परिभाषायां प्रसश्तकार्यित्ववदिकारस्य

---

[171] वाक्यैकवाक्यतया F1, G2 : वाक्येकवाक्यतया G1

[172] न्यायेन G1 : इत्यनेन F1, G2

[173] इगन्तस्य G1 : इगन्ताङ्गान्त्यस्य F1, G2

[174] क्ङिति च : किति च F1, G1, G2

अनया निमित्तत्वे निषेधेऽपि शीङस्तन्निषेधाभावात्। तस्मादुक्तरीतिरेव ज्यायसीति[१७५]। निषेधश्चेत्यस्य अपवादन्यायमूलकतया[१७६] तद्विषये अपवादप्रवृत्युत्तरमुत्सर्गप्रवृत्तेः[१७७] पश्चादप्रतिबद्धेत्यादेः निर्बीजत्वाच्च[१७८]। किञ्चान्तरङ्गोपजीव्यविधिमात्रापेक्षया निषेधस्यानेन प्राबल्यबोधने इक् परिभाषाप्रवृत्तेः प्रागप्यनेन न्यायेन "क्ङिति च"[१७९] (१-१-५) इति निषेधापत्तिः। निषेध इग्लक्षणगुणस्योपजीव्यत्वेन इकोऽप्युपजीव्यत्वात्। अपि च यादृशविधिनिषेधयोः प्रवृत्तौ शास्त्रद्वयप्रामाण्यात् विकल्पापत्तिः तादृशविध्यपेक्षयैव तादृशः निषेधस्य बलवत्त्वम्। "विभाषा जसि" (१-१-३१) इति ज्ञापकादाश्रीयते इति अलोऽन्त्यपरिभाषा प्रतिनिषेधस्य बलवत्त्वम् असम्भवः इति उपरिष्टान्निरूपयिष्यामः।

**यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते॥ ११॥**

तद्गुणीभूता इत्यस्य विवरणं **शास्त्रेणेति**। यत्तु "प्रयोगसंपादने उपकारकः[१८०]" इति कैयटानुरोधेन व्याख्यातम् तच्चिन्त्यम्। प्रत्ययादेरपि प्रकृत्युपकारकत्वात् तद्ग्रहणेन तद्विशिष्टस्यापि ग्रहणापत्तेः स्पष्टमभिधानात्।

---

[175] ज्यायसीति G1, G2 : जायसी F1

[176] निषेधश्चेत्यस्यापवादन्यायमूलकतया F1 : निषेधातस्यापवादन्यायमूलकतया G1, G2

[177] अपवादप्रवृत्युत्तरमुत्सर्गप्रवृत्तेः F1 : अपवादप्रवृत्युत्तरमुपसर्गप्रवृत्तेः G1, G2

[178] निर्बीजत्वाच्च F1 : र्निजत्वाच्च G1, G2

[179] क्ङिति च F1 : किति च G1, G2

[180] उपकारकः F1 : उपकारः G1, G2

**मुग्विधानसामर्थ्यादिति।** ननु 'पच आन' इत्यवस्थायां सवर्णदीर्घयादेश र्मुकश्च प्राप्तौ कथं बाध्यबाधकभाव इति चेदित्थं सवर्णदीर्घस्य अनवकाशत्वेन[१८१] द्वाभ्यां बाधः। न च सवर्णदीर्घात्तरम् "अचः परस्मिन्पूर्वविधौ" (१-१-५६) इति पञ्चमीसमासेन स्थानिवद्भावेनेयादेशप्राप्तेः षष्ठीसमासेन "आने मुँक्" (७-२-८२) प्राप्तेन्निरवकाशत्वा-भावः[१८२] इति वाच्यम्। स्थानिभूतादचः पूर्वस्य स्थानिभूतादचः पूर्वस्मात्परस्य अचः स्थानित्वानाक्रान्तस्यैव ग्रहणात् "कृदतिङ" (३-१-९३) इति सूत्रस्थ उद्योतप्रामाण्यात्, स्थानित्वाक्रान्तस्यापि तस्य ग्रहणे तु प्रत्ययलक्षणसूत्रस्थ शेखरोक्तरीत्या प्रसङ्गोचरितत्वरूपषष्ठ्यार्थाभावेन पञ्चमीसमासानित्यत्वज्ञानेन च स्थानिवद्भावाप्राप्ति-र्बोध्या। अथवा निरवकाशत्वाभावेऽपि प्रतिपादोक्तत्वस्य पूर्वप्रवृत्तिनियामकत्वात-त्ताभ्यामादौ विभाव्यमेव। तयोस्तु द्वयोर्मध्ये इयादेशोत्तरं "सर्वपदादेशा" इति न्यायेन स्थानिवत्त्वेन मुग्विधेः चरितार्थ्येऽपि यादेशस्य सत्यपि संभवे इति भाष्योक्तरीत्या "येन न" इति[१८३] न्यायात् मुग्विधिनाबाधः। अत एव मुगुत्तरमियादेशेन या प्राप्तोऽपि न "येन न" इति न्यायात् बाधस्थले अपवादप्रवृत्युत्तरमुत्सर्गस्याप्रवृत्तेः। यत्तु मुगागमोत्तरमियादेशो न भवति तपरकरणादिति कैयटः । तन्न तपरसूत्रस्य विधायकत्वेन तत्कालसवर्णग्रहणविधानेऽपि अन्यनिवृत्तेरविधानान्नियामकत्वेस्य तत्काल-सवर्णस्यैव वर्तानि न्नत्वे तत्परिभाषा लभ्यमानस्यापि, अत एव अदुपदेशप्रयुक्त-स्वरसिद्धिरिति विवरणे स्पष्टम्। मृगागमोत्तरं सवर्णदीर्घस्तु प्राप्नोत्येव। प्रतिपदोक्तत्वेन बाधस्थले अपवादप्रवृत्युत्तरमुत्सर्गस्य प्रवृत्तेः। अत एव अनया सवर्णदीर्घमात्र-

---

181 अनवकाशत्वेन G1 : प्रतिपादोक्तत्वेन F1, G2

182 प्राप्तेन्निरवकाशत्वाभावः F1 : मुक्याप्तेन्निरवकाशत्वाभावः G1, G2

183 येन न इति G1 : येन न F1, G2

प्राप्तिमाशंकितेति ध्येयम्। न चैवमपि[१८४] मुगागमविशिष्टस्यानया अवर्णत्त्वेन ग्रहणादाने परत आद्गुण प्रवृत्त्यौकाररूपगुणसम्पादनेन मुकश्चारितार्थ्यात् ज्ञापकत्वासंभव-मिति वाच्यम्। गुणस्य सवर्णदीर्घबाधेनादोषात्[१८५]। केचित्तु आगमविशिष्टस्यासवर्णवत् कण्ठत्वस्यातिदेशेन इकाररूपगुणस्य[१८६] प्रतिबन्धः। न च ''लृति लृवे''[१८७] इत्यत्र शेखरोक्तरीत्या एकदेशमकारसादृश्यमादाय एकाररूपगुणापत्तिरिति वाच्यम्। ''मल्लग्रामादिवदत्र''[१८८] पूर्वभागस्य बाहुल्येन तत्कृतसादृस्यैव अंगीकारेण हकारप्राप्तेः। ननु कण्ठोष्ठस्थानक अकारमकारयोर्जायमानः दीर्घ ओकारः प्राप्नोति। नच "एच्" इति सूत्रभाष्यरीत्या कण्ठभागस्याधिक्यादाकार एवेति वाच्यम्। तत्रोभयस्थानि-कादेशाभावादन्यतरस्थानिकादेशे कर्तव्ये यस्य भागस्य भूयत्वं तमादायादेशः। प्रकृते उभयस्थानिकस्य ओकारस्य सम्भवात् स एव भविष्यति। न च मुग्विधेनेकारस्य[१८९] सिद्धत्वान्मुग्विधानं ज्ञापकमेवेति वाच्यम्। गुणे अवादेशे पच आन इति रूपापत्तेः। एतेन सवर्णदीर्घेणानुनासिकाकारसम्पादनार्थं मुग्विधानमिति इत्यपास्तम्। ''आने अ'' इति न्यासेन सिद्धे[१९०] मुग्विधानसामर्थ्याच्चेत्याहुः न च लाघवाभावः। अयादेशे

---

[184] न चैवमपि अनया F1 : न चैवमपनया G1, G2

[185] सवर्णदीर्घबाधेनादोषात् F1 : सवर्णदीर्घत्वेनादोषात् G1, G2

[186] इकाररूपगुणस्य F1, G2 : इकाररूपगुण G1

[187] लृति लृवे F1, G2 : रेतिल्वेत्यत्र G1

[188] मल्लग्रामादिवदत्र F1, G1 : मल्लग्रामादित्यत्र G2

[189] मुग्विधेनेकारस्य F1 : मुग्निैकारस्य G1, G2

[190] आने अ इति न्यासेन सिद्धे F1 : आने अ इत्याने सिद्धे G1 : आने मुक् इत्याने सिद्धे G2

यलोपे अर्धमात्रालाघवात् न च सप्तम्यन्तस्याचारितार्थ्यात् तस्मिन्निति परिभाषाबाधो न स्यादिति वाच्यम्। आने परतः अत एवाकारादेशेन तत्सिद्धेः। न चाकारादेशे "तास्यनुदात्तेत्" इति स्वरो न स्यात्। मुगागमे तु "यदागमा"[१९१] (परि-११) इति न्यायेन तत्सिद्धिरिति वाच्यम्। ह्रस्वानुनासिकाकारादेशेन तत्सिद्धेः। न चैवं यथा इयादेशस्य बाधः एवं सवर्णदीर्घस्यापि बाधापत्तिरिति[१९२] वाच्यम्। "अकः सवर्णे दीर्घः" (६-१-९७) इत्यस्य प्रवृत्त्युत्तरमस्याप्राप्तिप्रकारस्य पूर्वमुक्तत्वेन "येन नाप्राप्ति" न्यायस्याप्राप्तया निरवकाशत्वेन बाधः। इयोदेशस्य तु **"येन नाप्राप्ति"** न्यायेन बाधः। न च सर्वस्यापि बाधापत्तिः। मम तु आगमादेशयोः बाध्यबाधकभावः क्वाचित्क इति वाच्यम्। क्वचित्कत्वे मानाभावात्। न चेदमेव भाष्यं मानम्। एतत्प्रामाण्यात् " येन नाप्राप्ति" न्यायधर्मावच्छिन्नोद्देश्यकागमविधानं तद्धर्मसमानाधिकरणधर्मावच्छिन्नस्य ग्राहकेन [१९३] तद्बोधकेन शब्देन अतिदेशस्य कार्यार्थतया कार्यविधावुपात्तेन नामविशिष्टो गृह्यते इत्यर्थक यदागमापरिभाषया कार्यविधेरेकवाक्यत्वादिति कण्ठ्यत्वादेरतिदेश एव न भवति। अन्यथा कण्ठ्यत्वस्येव सवर्णत्वस्याप्यतिदेशे "अतत्कालस्य [१९४] अवर्णस्यैव व्यावर्तनात्" इति निरुक्तोद्द्योतग्रन्थासाङ्गत्यापत्तेरिति दिक्।

---

[191] यदागमा F1, G2 : अदागमा G1

[192] बाधापत्तिरिति F1 : बाधापत्तेरिति G1, G2

[193] ग्राहकेन : ग्राहकेण F1, G1, G2

[194] अतत्कालस्य : तत्कार्यस्य F1, G1, G2

वस्तुतस्तु मुग्विधानसामर्थ्यादिनित्यत्वपुरस्कारेण क्वचिद्वर्णग्रहणेऽप्रवृत्तिरेव बोध्यते न तु वर्णग्रहणेनेति परिभाषान्तरं ज्ञाप्यते। येन मूलोक्तभाष्याणां विरोध आपद्येत। अत एव "आने मुक" (७-२-८२) इति सूत्रे उद्योते आदावन्ते नित्यत्वेन च क्वचिद्वर्णग्रहणे "यदागमा" (परि-११) इत्यस्याप्रवृत्तिरेवत्यभिहितम्। एतेन परिभाषाया अनित्यत्वेऽपि मुग्विषये कुतो न प्रवर्तते मृग्विधानसामर्थ्यादिति चेत् तर्हि तेन मुग्विषये परिभाषाया अप्रवृत्तिकल्पनेयैव निर्वाहे सामान्यतो अनित्यत्वज्ञापनस्य निःप्रयोजनत्वात् दिदीय इत्यादावपि वुग्युटविति युटसिद्धत्वविधानसामर्थ्यात् परिभाषाया अप्रवृत्तेः सिद्धत्वादिति शंका समाहिता। 'जहार' इत्यादेः अनित्यत्वज्ञापनफलस्य सत्त्वात्। न च 'प्रनिदारयति' इत्यादौ घुत्वस्यागमविध्युद्देश्यतावच्छेदकाणुत्वा-सामाना धिकरण्येनातिदेशात् दोषाभावात् "जहार" इत्यादावाकारान्तधातुत्वस्य तादृशाणुत्वसमानाधिकरण्याभावेनवानतिदेशादौ भावप्राप्तेः फलाभावः इति वाच्यम्। "आत औ णलः" (७-१-३४) इत्यत्र धातोनधिकाराभावात् अनुपत्यभावेन अण्-लाक्षेपाभावाच्च। अङ्गस्येति षष्ठ्यन्तानुरोधेनाक्षिप्तङ्गस्यापि षष्ठ्यन्तत्वेन दोषाभावाच्चेति गदायां विस्तरः।

केचित्तु लक्ष्यानुरोधेन व्यवस्थितमिति बोध्यम्। न च "आने मुँक्" (७-२-८२) इति सूत्रे 'पचमानः' इत्यादौ मुगागमोत्तरमनया प्राप्तस्य इयादेशस्य तपरकरणेन वारणपरप्रदीपोक्तरीत्या सन्दुष्य स्वयमनित्यत्वेन परिभाषायाः समाहितमुद्योते । तत् **"येन नाप्राप्ति"** न्यायेन मुक् इत्यपवादत्वमिति प्रतिपादनपरेण लटः शतृशानचाविति सूत्रस्थ शेखरेण विरुध्यते इति चेदत्राहुपायस्योपायान्तरादूषकत्वादिति।

**अनया परिभाषया आगमानामिति**। यत्त्विदं 'द्विषन्तपः' इति "मिदचोऽन्त्यात्परः" (१-१-४६) सूत्रभाष्योदाहरणाचिन्त्यमिति तदेव चिन्त्यम्। नुमोऽभक्तत्वपक्षे तन्मध्य-

पतित न्यायेन मुग्विशिष्टस्य द्विषत् ग्रहणेन ग्रहणे तस्य पदत्वात्संयोगान्तलोप **'एकदेशविकृत'** न्यायेन द्विषमित्यस्य शन्नपदत्वात् सिद्धोऽनुस्वार इति प्रसङ्गोच्चारितमिदं भाष्ये इति प्रदीपोद्द्योतयोः स्पष्टमभिधानात्। परादि पक्षे तु तकारस्य मकारोऽभक्तः, तकारश्च सिद्धोऽनुस्वार इति भवदीयकैयटेनाभिधानात् । मूलोक्तार्थे कैयटाभिमतत्वं भाष्यस्यैकदेश्युक्तित्वञ्च स्पष्टमेव। यत्तु कैयटेन "अन्ये तु परादित्वपक्षे तद्भक्तत्वात्तकार-ग्रहणेनास्य ग्रहणं भवतु न तु पदान्तत्वम्[195]। न हि द्वयोर्मकारयोः पदान्तत्वमुपपद्यते इत्याहुरिति स्वानभिमतं मतान्तरमुपन्यस्तम्। तदुक्तरीत्या संयोगान्तलोपे अस्त्येवमस्य पदान्तत्वमिति अनुस्वारसिद्धेश्चिन्त्येति तत्रैव उद्योते स्पष्टम्। यद्यपि यत्तु "न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्" (७-३-३) इति सूत्रे 'पूर्वा' इत्यस्य पूर्वावयवावित्यर्थं परिकल्प्य "इञश्च" (४-२-१११) यजनस्थापत्यमैयज इत्यणन्तस्य "यदागमा" (परि०११) इति न्यायेन वृद्धत्वाच्छै "ऐयजीयः" इति पदमञ्जरीशेखर-योरुक्तम् । तन्न। "अचः परस्मिन्पूर्वौविधौ" (१-१-५६) इत्यत्र आदेशात् पूर्वत्वे गृह्यमाणे 'वैयाकरणः' इत्यत्रायादेशापादक[196] भाष्यादिग्रन्थविरोधात्। आदेशोऽवयवस्यैकार स्यादेशग्रहणेन ग्रहणात् ततः पूर्वस्य विधेरसंभवेन दोषस्यैवाभावात्। "ऐयजीय"इति प्रयोगाभिधाने मानाभावादभक्तत्वमैवोचोः सत्यभिधाने पूर्वाङ्गावयवा-वित्यर्थान्न दोष इति तन्न। "स्थानिवदादेशोऽनल्विधौ" (१-१-४५) सूत्रे आदेशग्रहण-सामर्थ्यात् आदेशस्थानीयानुमानिकस्थान्योदेशस्यादेशेस्यादेशग्रहणे न ग्रहणेऽपि आगमस्थलीयानुमितिक स्थान्यादेशभावघटकस्यादेशग्रहणेन ग्रहणस्य मूले एव प्रतिपादनात् "अचः परस्मिन्पूवोविधौ" (१-१-५६) सूत्रेऽपि तथैव स्वीकारात्

---

[195] पदान्ततत्वम् F1, G2 : परात्तत्वम् G1

[196] इत्यत्रायादेशापादक F1 : इत्यत्र यादेशोपादक G1 : इत्यत्रायादेशोपादक G2

श्रोतस्थान्यादेशेभावमादाय[१९७] श्रोतादेशे यकारात्पूर्वस्यैकारेसत्त्वेन 'वैयाकरणः' इत्यादौ भाष्योक्तदोषादानस्योपपत्तेः। "अचः पूर्वत्वविज्ञानादिति" सिद्धान्तमते दोषाभावाच्च। अङ्गावयवत्वकल्पना व्यर्था गुरुभूता चेति[१९८] दिक्।

**पूर्वसवर्णापत्तिरिति**। यमुद्देश्येत्यर्थस्य पूर्वं व्यवस्थापितत्वातदडागमविधायके आगमस्योद्देश्यत्वेन तत्त्वस्यानयाऽतिदेशेऽपि स्थानित्वस्यानतिदेशात् कथं तदापत्तिरि- इति शंका तु दत्तोतरा। आगमविध्युद्देश्यतावच्छेदकधर्मस्यैवातिदेशेन तकारथकारयो- र्विधीयमान सुटि तकारत्वादेरतिदेशेऽपि आर्द्धधातुकस्यानतिदेशे इडागमानापत्तेः। आगमविध्युद्देश्यतावच्छेदकधर्मसामानाधिकरणयावद्धर्मातिदेश इति तु न सम्यक्। सवर्णत्वादे रतिदेशापत्तौ उद्द्योतस्य पूर्वोक्तस्य विरोधापत्तेः। आर्द्धधातुकत्वस्य तकारत्वसमानाधिकरणर्थाभावाच्चास्याः कार्यविध्येकवाक्यतया[१९९] यावद्धर्मातिदेशासंभवा- च्चेत्यलम्।

**निर्दिश्यमानस्यादेशा भवन्ति ॥ १२ ॥**

व्यक्तिपक्षेप्याहा। **न भू सूधियोरिति**। ननु "अस्य च्वौ" (७-४-३२) इत्यादौ ग्रहणकशास्त्रप्रवृत्त्या सवर्णग्रहणात् अवर्णमवर्णान्तस्येत्यर्थेनानवकाशत्वेन निर्दिश्यमानपरिभाषाबाधक[२००] अलोऽन्त्यपरिभाषया सर्वेष्वपि सिद्धौ ज्ञापकानुपयोग

---

[197] श्रोतस्थान्यादेशेभावमादाय F1 , G2 : श्रौतस्थान्यादेशेभावमादाय G1

[198] गुरुभूता चेति F1, G1 : गुरुभूताचेति G2

[199] कार्यविध्येकवाक्यतया F1 , G2 : कार्यविध्यैकवत्यतया G1

[200] निर्दिश्यमानपरिभाषायाबाधक F1 : निर्दिश्यमानपरिभाषाबाधक G1, G2

इति चेन्न। तथा सति स्वबाधकबाधकस्यापि स्वबाधकत्वापत्तौ "उदः स्थास्तम्भोः पूर्वस्य"(८-४-६०) इत्यादौ पूर्वसवर्णापत्त्यैव तत्परिभाषया समाधानपरभाष्यविरोधापत्तिश्च[201]। न हि युज्यते वक्तुमलोऽन्त्यपरिभाषयैवेयं बाध्यते। न तत् बाधिकया "आदेः परस्य" (१-१-५३) इत्यनया "ति विंशतेर्डित्" (६-४-१४२) इति सूत्रे अधिक्रियामाणेऽप्यलोन्त्यस्येत्यन्त्यस्य स्यात्। निर्दिश्यमानपरिभाषाविषये निर्दिश्यमान परिभाषायास्संचारात्। स्वबाध्यसुतरां स्वबाध्यत्वाच्च। यत्तु साक्षातुच्चारितस्थानिविषये निर्दिश्यमानपरिभाषोपत्थानमित्यादौ[202] "आदेः परस्य" (१-१-५३) इत्यनेन बाधिता। नैतावता एतत् बाध्य "यदागमा" (परि०११) इति न्यायलब्धस्य निमित्तभावं[203] "आदेः परस्य" (१-१-५३) इत्यनया उदस्थादित्यादावपि सावाधनीयेति युक्तमास्थातुमिति तच्चिन्त्यम्[204]। निर्दिश्यमानस्थास्तभुशद्बादेः सकारस्य पूर्वस्य पूर्वसवर्ण इत्यर्थात् "आदेः परस्य"(१-१-५३) इति एतद्यवस्थापकत्वेन समावेशात् बाधकत्वस्यैवाभावात्। नचैवं "ति विंशतेर्डित्" (६-४-१४२) इति सूत्रस्य निर्दिश्यमान 'ति' शब्दान्तस्येत्यर्थः अलोन्त्यपरिभाषया एतद्यवस्थापक्त्वं स्यात् तथा उक्तभाष्यविरोधो लक्ष्यासिद्धिश्चेति वाच्यम्। विनादेशः शति प्रत्ययः इति पक्षे व्युत्पत्तिपक्षेऽपि च धातोरनर्थकत्वेन अलोऽन्त्यपरिभाषया अप्रवृत्तेः। विंशादेशस्तिप्रत्ययः[205] इति पक्षे अव्युत्पत्तिपक्षेण

---

[201] विरोधापत्तिश्च G1 : विरोधापत्तेश्च F1, G2 :

[202] निर्दिश्यमानपरिभाषोत्थानमित्यादौ F1, G2 : निर्दिश्यमानपरिभाषोपत्थापनमित्यादौ G1

[203] निमित्तभावम् F1 , G2 : निमित्ताभावम् G1

[204] युक्तमास्थातुमिति तच्चिन्त्यम् F1 , G2 : युक्तमास्थातुमित्यपास्तम् G1

[205] विंशादेशस्तिप्रत्ययः F1 , G1 : विरादेशश्शति प्रत्ययः G2

योज्यम्। नन्वेवमपि उक्तभाष्यान्निर्दिश्यमानपरिभाषाया अलोऽन्त्यपरिभाषाबाधकत्वा-पत्तिरिष्टापत्तौ। नात्र परिभाषाप्रवृत्तिरिष्टा। न हि सा तयोर्बाधिका। तयोर्निर्विषयत्वप्रसङ्गात् तस्मात्तिग्रहणासामर्थ्यादलोऽन्त्यपरिभाषायाऽप्रवृत्तौ अर्थात् 'ति' सर्वस्य लोपः इति "ति विंशतेर्डित्"[२०६] (६-४-१४२) इति सूत्रस्थप्रदीपविरोधो न। नाप्येतयोरिति मूलाविरोधश्चेति चेदत्र गुरवः इयं परिभाषा "येन विधिः", "यदागमा" इत्यनयोः विषये यथा विशिष्टस्थानिवत्व बाधिका। तथा सामर्थ्यादिना बाधिता। अलोऽन्त्य-परिभाषा याविषयेऽप्यन्त्यस्य[२०७] स्थानित्वस्यबाधिका[२०८] एतादृशविषये निर्विषयत्व हेतोरसंभवादिनीदृशे विषये तु समावेश एवेति भाष्याशयमाहुः। "त्यदादीनामः" (७-२-१०२) इत्यादावपि निर्दिश्यमानत्यदद्यन्तर्थादलोऽन्त्यपरिभाषाया एतत् परिभ ाषाव्यवस्थापिकैवेति[२०९] बोध्यम्। तस्मात् "अस्य च्वौ" (७-४-३२) इत्यादौ निर्दिश्यमानस्यैव इत्वविधानं स्यात् इति ज्ञापको योगः। एतेन यद्यपि "अस्य च्वौ" (७-४-३२) इत्यादौ व्यक्तिपक्षे दीर्धादयो न निर्दिश्यन्ते। तथापि अलोऽन्त्यपरिभाषाया तत्र इष्टं निवर्ततेदित्यदोषः। किं बहुना जातिपक्षे जात्याश्रयाणां सर्वेषां निर्दिश्यमानत्वेऽपि अलोऽन्त्यपरिभाषाया अनवकाशत्वादस्या बाधो व्यक्तिपक्षे निर्दिश्यमानव्यक्तिषु परत्वादिति स्पष्टं "षष्ठी स्थानयोगो" (१-१-४८) इति सूत्रे प्रदीपे इत्यपास्तम्। अबाधकत्वेनोपपतौ बाधकत्वकल्पनाया अन्याय्यत्वात् "अलोऽन्त्यस्य" (१-१-५१), "आदेः परस्य" (१-१-५३) इत्येतद्ववचनसामर्थ्यात् बाध्यते इत्येव "षष्ठी स्थाने" (१-१-४९) इति

---

[206] ति विंशतेर्डित् F1 , G1 : ति विंशतीति G2

[207] अलोऽन्त्यपरिभाषायाविषयेऽप्यन्त्यस्य F1 : अलोऽन्त्यपरिभाषाविषयेऽन्त्यस्य G1, G2

[208] स्थानित्वस्य F1 , G2 : स्थनिवत्त्वस्य G1

[209] परिभाषाव्यवस्थापिकैवेति F1 , G2 : परिभाषाव्यवस्थापिकेति G1

सूत्रे प्रदीपोक्तेश्च । **स्पष्टार्थमिति।** ननु "तदोः सः साविनन्त्ययोः" (७-२-१०६) इत्यादौ अनुवृत्तत्यदादीनामिव "रीङृतः" (७-४-२७) इत्यादावनुवृत्तस्याङ्गस्येत्यस्यापि निर्दिश्यमानत्वात् तत्स्थानितयाऽनया वारणात् अन्त्यादेशार्थं ङित्वं सफलमिति चेन्न। तदन्तविधिना स्वातन्त्रेणाङ्गस्य अतिप्रसङ्गात् स्थानित्वासंभवेन अवश्यवाच्यतदन्तविधावनया विशिष्टस्य स्थानित्वा-भाव बोधनेऽचकारस्यैव तत्त्वसापात्त्या ङित्वस्य व्यर्थत्वात्। "तदोः सः साविनन्त्ययोः" (७-२-१०६) सूत्रे तदन्तविधिनाप्राप्तविशिष्टस्थानिवत्वस्यानया वारणेऽप्य-कृतत्यदादिरित्यंशमादाय निर्दिश्यमानत्यदाद्यवयवतकारस्येत्यर्थेन ङतिस्य इत्यादावपि तकारे भाष्योक्तंसत्त्ववारणं मूले वक्ष्यमाणं नासङ्गतम्। एवञ्च निर्दिश्यमानत्वं [२१०] साक्षादनुवृत्त्या [२११] चोपात्तसाधारणमेव [२१२] न चैवम् "अचि श्नुधातुभ्रुवां य्वोरियँङुवँङौ" (६-४-७७) इति सूत्रे इवर्णान्तधातुश्नुवामित्यर्थः, "येन विधिस्तदन्तस्य" (१-१-७१) इत्यिप्राप्ततदन्तस्थानित्वस्यऽनया वारणात् इकारोकारयोरेव स्थानित्वापत्त्या ङित्वं व्यर्थमिति वाच्यम्। तदन्तविधिसूत्रोपात्तत्वेन धातोर्निर्दिश्यमानत्वस्वीकारात्। अत एव "अमिपूर्वः" (६-१-१०३), "एत्येधत्यूठ्सु" (६-१-८६), "प्रथमयोः पूर्वसवर्णः" (६-१-९८) इत्यादौ अजादावमि एजादावेधतावजाद्योः प्रथमयोरित्यर्थो नाश्रितः। आमादेर्विशेषस्य सूत्रोपात्तत्वेन अनया परिभाषया वारणेन सर्वादेशप्रसङ्गात्। सूत्रोपात्तस्यापि तदादेर्विशेष्यस्य निर्दिश्यमानत्वाभाव एवेति वितण्डतयाऽभिमाने

---

[210] निर्दिश्यमानत्वम् F1, G1 : निर्दिमानत्वम् G2

[211] साक्षादनुवृत्त्या F1, G1 : साक्षासादनु G2

[212] साधारणमेव F1, G1 : साधारण G2

तु "हुझलभ्यो हेर्द्धिः[213]" (६-४-१०१) इति सूत्रे "रुदिहि" इत्यादौ[214] ध्यादेशवारणाय हलीत्यनुवृत्त्यां हलादेर्हेरिति भाष्योक्तः हल् एव निर्दिश्यमानत्वापत्तौ शाधीत्यादेर-सिध्यापत्तेः। एतेन अजादावमित्यर्थे प्रत्ययलक्षणेन प्राप्तातिप्रसङ्गस्य वारणाया अमोऽवयवेऽचीत्यर्थस्या उक्तसूत्रस्थभाष्यप्रामाण्यात् कल्पने एत्येधत्यूठ्स्वित्यादावेजादा-वित्यर्थे "निर्दिश्यमान... " (परि०१२) परिभाषाया दोषाभाव इत्यपास्तम्। हलित्यस्या-नुवृत्तावपि निर्दिश्यमानपरिभाषाया दोषाभाव इति भाष्योक्तः पक्षान्तरमप्युक्तमिति अन्यदेतत् । तस्मात्फलितमेतत् सूत्रादनुच्चारितविशेष्यकविशेषणोद्देश्यक तदन्त-संज्ञाविधि 'यदागमा' (परि०११) इत्यन्यन्तराबोधितस्थानिताकत्वे समुच्चार्यमाणत्वमत्र निर्दिश्यमानत्वम्। "अचि श्नुधातु...." (६-४-७७) इति संग्रहाय सूत्रानुच्चा- रितविशेष्यक इति विशेषणम्। एतेन "रिङ्ङो ङित्वं स्पष्टार्थमितिदिक्" इत्पास्तमिति । **विरोधाभावादिति**। यद्यपि "अलोऽन्त्यस्य" (१-१-५१), "आदेः परस्य" (१-१-५३), "अनेकालशित् सर्वस्य" (१-१-५४) इत्यतैरन्त्यादिनां कार्यबोधः न धातु विरोधः। तथापि "मिदेर्गुणः[215]" (७-३-८२) इत्यादौ तच्छेषपक्षे परिभाषाद्वयस्यैकवाक्यतयऽन्वये[216] विरोधवदत्रं तदभाव इति तात्पर्यम्। एतेन "अनया स्वस्वनिमित्तेत्यादि संचारितत्वादित्यन्तमग्रन्थमनूद्य [217] इति "नव्यतराणां प्रदीपनिर्वापकः फूत्कारः

---

213 हु झलभ्यः F1 : हुजलभ्यः G1, G2

214 रुदिहि इत्यादौ G1 : रुदीहि इत्यादौ F1, G2

215 मिदेर्गुणः F1 : मदेर्गुणः G1, G2

216 एकवाक्यतयऽन्वये F1 : परिभावस्येकवाक्यतयान्वये G1, G2

217 ग्रन्थमनूद्य F1, G2 : ग्रन्थमनुदव्य G1

प्रशमितो[२१८] वेदितव्यः" इति हेतुशून्यः प्रलापो निरसितो वेदितव्यत्यर्थः। अबाधत्वेनोपपत्तौ बाधकल्पनाया[२१९] अन्यायत्वात्। **अकज्विषये तु नायमिति**[२२०]। अत्र च प्रमाणम्- किमः कादेशविधानम् अन्यथा "किं सर्वनामबहुभ्योऽद्व्यादिभ्यः" (५-३-२) इत्यत्र किं शब्दकरणलाघवाद्यनुरोधेन द्विशब्दात्पूर्वं किंशब्दपाठेन मकारस्य अत्वेन कृते **'किमः अ'** इति न्यासेन सामर्थ्यादनन्त्यविकार इति परिभाषया च इकारस्य अत्वे पररूपे[२२१] क इति रूपसिद्धेः तदनर्थकमेवेति स्यात् क्रियमाणं तत् साकच्कार्थमिति[२२२] "त्यदादीनामः" (७-२-१०२) इति सूत्रे भाष्यप्रदीपद्योतेषु स्पष्टम्। यत्तु अत्र प्रमाणं "किमः कः" (७-२-१०३) इति आवृत्त्या एकादेशविधानमेवेति। तत्तु कैयटरीत्या न तु मूलकृद्रीत्या। अत एव शेखरे "अस्वरसूचकः कैयटः" इत्युक्तम्। यत्तु "किमः कः" (७-२-१०३) इत्यत्र निर्दिश्यमानपरिभाषाया अप्रवृत्तौ प्रमाणं "किमः अ" इत्येव सिद्धेः किमः कादेशविधानमिति, तत्तु "कु तिहोः" (७-२-१०४), "क्वाति" (७-२-१०५) इत्युत्तरसूत्रयोः किमः इत्यस्यावश्यकत्वप्रतिपादक "त्यदादीनामः" (७-२-१०२) इति सूत्रस्थभाष्यकैयटविरोधातच्चिन्त्यम्। यदपि भाष्यं 'कादः' इति न्यासे दोषाभिधानपरमिति तदपि चिन्त्यम्। 'कादः' इति न्यासोत्तरमेव तद्दोषाभिधानेऽपि "इम अ" इति न्यासेऽपि तद्दोषस्य जागरुकत्वात्,

---

[218] प्रशमितो F1 : प्रशामितो G1, G2

[219] अबाधत्वेनोपपत्तौ बाधकल्पनाया F1 : अयाधत्वेनोपपत्तौ G1 , G2

[220] अकज्विषये तु नायमिति F1 , G2 : अकजिविषयेऽन्वायमिति G1

[221] पररूपे F1 : पररूफे G1, G2

[222] साकच्कार्थमिति F1 , G2 : तथाकिच्कार्यम् G1

“इमः अ” इति न्यास इति भाष्ये अकरणाच्च। यदपि “इम अ” इति न्यासेऽप्युत्तरसूत्रयोः न दोषः। उ श्तिहोर्वातीति न्यासकरणात् क्व ,कुत्र इत्यनर्योसिद्धरिति तदपि चिन्त्यम्। अर्धमात्रिककककारस्य शकारेणनिमातव्यत्वात् ‘किमः’ इति न्यासादविशेषात्। न चैवमपि कादेशे ककारस्याकरणात् अर्द्धमात्रा-लाघवमिति वाच्यम्। एवमपि पदलाघवासम्भावात्। “अनचि च” (८-४-४६) इति द्वित्वस्य वैकल्पिकत्वेऽपि भावकर्मस्य धर्माधिक्यफलतयाद्धित्वेऽर्द्धमात्रलाघवस्य अभावाच्च पाक्षिकदोषत्वाच्च। सौत्रत्वाद्याश्रयणे तु स एव दोषः। वातीति न्यासेऽपि अत्येदेशस्यापि विकल्पसंभावना स्यात्। एतदर्थं व्याख्यानाद्याश्रयणे तु स एवं दोषः तस्माद्यथोक्तमेव रमणीयम्। साकच्कात् किं शब्दात् त्रतसोः परतः कुत्रैत्याद्यसिद्धेः। क्वदेशस्यावश्यकत्वमिति तु न युक्तम्। एतस्यापि किं शब्दविकारत्वे न ज्ञापनात्, पूर्व निर्दिश्यमानपरिभाषासंचारात् किं शब्देप्राप्तेः। एतेन “किमः कः” (७-२-१०३) इति कादेशे कर्तव्ये ‘अ’ इति विशेषपूरणेन व्याख्यानमपास्तम्। किं शब्दविषये इति वक्तुमौचित्यात्। एतेन “इमः” इति न्यासे उत्तरार्थं “किमः” इति न्यासः कार्य इति मनोरमाग्रन्थः[२२३]। “कु तिहोः" (७-२-१०४), “क्वाति” (७-२-१०५) इत्यादेशे कद्वयश्रवणापत्तिः। “कु तिहोः” (७-२-१०४) इति न्यासे उकारस्यालोऽन्त्यादेशत्वापत्तिः एतदर्थं नानार्थक इति एतदारम्भे गौरवमङ्गवृत्तपरिभाषया गुणवारेण च क्लेश तद्याख्यानपरः[२२४]। शब्दरत्नग्रन्थश्च[२२५] प्रत्युक्तेः। उश्रिहोर्वोतीति न्यासे दोषद्वयस्याप्युद्धरात्[२२६]।

---

[223] मनोरमाग्रन्थः F1, G1 : मनोरथग्रन्थः G2

[224] तद्याख्यानपरः F1, G1 : तद्व्यानपर G2

[225] शब्दरत्नग्रन्थश्च F1, G1 : शब्दरत्नग्रश्च G2

न च “कात” इत्येव न्यासेऽपि तुल्यमिति वाच्यम्। एकत एकत्रेत्यादौ दोषवारणाय[२२७] तत्र गत्यन्तराभावादपास्तमिति दिक्।

येयं कादेशविधानसामर्थ्यादकज्विषये निर्दिश्यमानपरिभाषाया अप्रवृत्तिः। सा किंशब्दविषयिण्येव न सार्वत्रिकी[२२८]। भिन्धकीत्यत्र अकचिकृते अनया परिभाषाया धित्वं न प्राप्नोति इत्याशंक्य[२२९] परत्वान्तरङ्गत्वाभ्याधित्वे अकजिति “हुझल्भ्यः हेर्धिः" (६-४-१०१) इति सूत्रभाष्यात्। उक्तमिदं "किमः कः" (७-२-१०३) इति सूत्रे शेखरे च।

**यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः॥ १३॥**

यत्तु कैश्चित् “वृद्धिरादैच्” (१-१-१) “अदेङ् गुणः” (१-१-२) इत्यादौ रपरादेशानुच्चार्य “उरण् रपरः” (१-१-५०) इति सूत्रं न कार्यमिति प्रसङ्गागतमाशङ्क्यापि “आप्ज्ञप्यृधामीत्[२३०]” (७-४-५५) इत्यत्र दोषादिति समाधाय आह। यत्तु "भृञामित्" (७-४-७६) इत्यत्र दोषप्रसङ्ग इति शेखरस्तदशुद्धम्कुत्वा कुचोद्यमिति तच्चिन्त्यम्। भृयामिदित्यत्र दोषाभाव इति अरुच्चैव। “आप्ज्ञप्यृधामीत्” (७-४-५५) इत्यत्र दोषादित्युक्तेः। गुरुवस्तु सिद्धान्ते “उरण् रपरः” (१-१-५०)

---

[226] दोषद्वयस्याप्युद्धरात् F1 : दोषद्वयस्याप्युद्भवनात् G1, G2

[227] दोषवारणाय F1, G2 : दोषवारणा G1

[228] सार्वत्रिकी F1, G2 : सार्वत्रकी G1

[229] इत्याशंक्य F1, G2 : वज्रप्रथामिदित्यत्र दोषादोषात् इति समा G1 (e)

[230] आप्ज्ञप्यृधामीत् F1 , G2 : ज्ञपृधामीत् G1

इति सूत्रसत्त्वे भृञामित्येतद्विषये बिभर्तीत्यत्र इदादेशस्य रपरत्वहलादिश्शेषयोः प्रवृत्त्या इदानीमपि साधुत्वबोधक प्रक्रियाऽभेदाय तयोरावस्यत्वेनैव कार्यः। कृते च तस्मिन् माङोहाङोरपि तत्प्रसङ्गः। न च हलादिशेषेण निस्तारः। एतदंशेऽपि तत्कल्पने प्रक्रियागौरवापत्तेः। साधुत्वबोधकप्रक्रियागौरवपत्तेः साधुत्व-बोधक प्रक्रियाभेदेन तदभावापत्तेश्च लपरोच्चारणासामाथ्यौद्धलादिः शेषप्रवृत्तेश्च [२३१] । अतः तदर्थमकारपरोपीत्यक्तौ इति गौरवमेवेत्युक्तविपरीतपाठमङ्गीकृत्यापि योजयामासुः।

**अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्॥ १४॥**

**तेन एतत्परिभाषा सिद्धेति।** यत्तु सीरदेवोनोक्तं ज्ञापकमुपपाद्य केचिदाहुः। यत्तु शब्दरत्नकृतोक्तं व्रश्चादिसाहचर्याद्धातुसंज्ञिकराजेर्ग्रहणं स्यादिति। भ्राजिग्रहणस्य आवस्यकत्वमिति । तन्मन्दम्। अतिव्याप्तिपरिहाराय अपठनीयस्य राजृ इति ऋकारस्यैवं सति वैयर्थ्यापत्तेः [२३२] । किम्बहुना तदभावेऽपि सिद्धान्ते निङ्भ्यां निङ्भ्यः इत्यधातौ षत्वमुदाहृतमभियुक्तैरिति तदेव मन्दम्। धातुसूत्रन्यासभङ्गेन तत्पाठस्य क्लिष्टत्वात्, अफणादिभ्राजिव्यावर्तेन ऋकारन्तस्य सार्थक्याच्च। भ्राजृ इति ऋकारस्य समुदायानुबन्धत्वेन सूत्रे राजृ इति पाठनेऽपि ऋकारावयवक-राजृशब्दस्य ग्रहणेन भ्राजतेरग्रहणाच्च। नह्यसत्यामपि अर्थवत्परिभाषाया ऋकार-वयवको राजृशब्द इत्यर्थो नाश्रयितुं शक्यत इति युज्यते वक्तुम् । अनर्थकागमविकरणादिशब्देऽप्य अवयवविभाववदर्शनात्। यदपि भ्राजतेः ऋकारस्य

---

[231] शेषप्रवृत्तेश्च G1 : शेषाप्रवृत्तेश्च F1 , G2

[232] वैयर्थ्यापत्तेः G1, G2 : वैयर्थ्यास्यात् F1

समुदायावयवोभयोपकारक इति तदशुद्धम्। महिङोऽपि ङित्वापत्त्या सम्प्रच्छीमहे [२३३] इत्यादौ सम्प्रसारणाद्यापत्तेः। अत एव "तस्थस्थमिपां तांततामः" (३-४-१०१) इत्यादौ तङस्थकारेण मिपः पकारेण प्रत्याहारो न कृतः। तथासति समुदायो-पकारकत्वेन मिपः पित्वानापत्तेरिति शेखरे स्पष्टम्। "निङ्भ्यां" इत्यादि प्रयोगाणमसाधकत्वस्य केचिदित्यादिनां कौमुद्यामेवेक्तत्वाच्च। सत्यपि वा साधकत्वे तद्रूपेणोपात्तधातुष्वेव साहचर्यं लक्षणानुरोधत्। न तु शवर्णांशेऽपि अनित्यत्वात् वा। अत एव धाातुग्रहणानुवृत्तिपरकेचिदित्यादि व्याख्याने अत्र भाष्यानुग्रहोविचार्य इत्युक्तं शेखरे। तस्माद्धातुग्रहणाननुवृत्तावपि वर्णातिरिक्त व्रश्चादिषु साहचर्याश्रयेण न कोऽपि दोषः। यदपि फणादिपठितेन 'भ्राशृ' इति शान्तेन विभ्राडित्यस्य सिद्धत्वात्। ज्ञापितपरिभाषायां चारितार्थ्याभावमाशंक्य अस्मादेव भ्राजग्रहणात् फणादौ भ्रासिति दन्त्यपाठं वृत्त्यादि सम्मत्या व्यवस्थाप्य, एतेन "वा भ्राशभ्ला...." (३-१-७०) इति सूत्रे भ्राशृश्लाशृदीप्तौफणादि सप्तके तालव्यान्तौ पठिष्येते।

प्रकृतसूत्रेऽपि शस्विधायके [२३४] तथैव बोपदेवस्तु [२३५] दन्त्यावाह । प्राचां तु देवानुसृतमिति मनौरमायां पठिष्यत इति। प्रतीकमुपादाय माधवादिभिरिति तत्र शेषं पूरयति। एवं च बोपदेवो बहुविरोधान्डेय इति प्रजल्पनं शब्दरत्नकृतः

---

233 सम्प्रच्छीमहे : सपप्रच्छीमहे G1 : संप्रक्षिमहे F1 , G2 :

234 शस्विधायके : श्यन्विधायके F1 , G2 : श्यनाधायके G1

235 बोपदेवस्तु : तस्तु F1, G1, G2

प्रयुक्तमिति तद्रभसात्[२३६] शब्दरत्नस्य स्वानभिमतबोपदेव इत्यादि पदगर्भित इति अरुचिकमनोरमाशयप्रदर्शनपरत्वात्। अत एव सीरदेवोक्तज्ञापके एतद्दूषणानभिधानं शब्दरत्नकृत इति। केचित्तु विभ्राट्विभ्राशौ भ्राशत्यभिप्रायेण प्रयुक्तस्य विभ्राडिति-रूपस्य दन्त्यान्तत्वे असाधुत्वप्रसङ्गात्तलव्यान्तेमावश्यकः। विभ्राट् विभ्राजाविति भ्राजत्यभिप्रायेणप्रयुक्तस्य विद्यमानसाधुत्वस्यासुधुत्वप्रसङ्गात् सूत्रे भ्राजग्रहणमपि आवश्यकमिति मनोरमाशब्दरत्नयोराशयमाहुः। एतन्मते भ्वादिदिवाद्योः दन्त्यान्तपाठेन भ्रासते भ्रासत इति प्रयोगसिद्धिश्चेदपि भ्रेसतुरित्याद्यसिद्धिः। दिवाद्यन्तर्गणफणादि-ष्वेवपाठं परिकल्प्य "फणाञ्चष्टानाम्" इति न्यासेन परिहार्यात्। अन्ये तु अस्मादेव भ्राजिग्रहणात् अतः परशकारस्य षत्वाभावः अनुमीयते। शृ धातौ षत्वस्य प्रमितत्वेऽपि आकारस्संयोगादित्वेन विशेषणीय इति वर्णयन्ति। अत्र मते कथं भाष्यानुग्रहः। कथश्च भ्राजा श्रृधातौ षत्वसिद्धिरिति[२३७] विचार्यमिति दिक्। यदपि सीरदेवोक्तज्ञापके नन्वेतदयुक्तम्। “फणादिना राजिना साहचर्यात् तथाभूतस्यैव षत्वार्थतया भ्राजिग्रहणस्योपक्षीणत्वादिति” मनोरमोक्तज्ञापनपरघटनाशङ्कायाम्। न चासत्यामर्थवत्परिभाषायामफणादेरेव भ्राजतेर्भागस्य राजित्वाविशेषात् ग्रहणे[२३८] राजौ फणादिनिर्णयात् कथं भ्राजौ[२३९] तत्साहचर्यात् फणादित्वनिर्णय इत्याशङ्कनं परस्परसाहचर्येणोभयोरपि फणाद्योरेव ग्रहणस्य विवक्षितत्वादिति समाधानं च। तदुभयमपि चिन्त्यम्। भ्राजिग्रहणसामर्थ्येन व्रश्चादि साहचर्येण च स्वतन्त्रधातोरेव

---

[236] तद्रभसात् : तद्भसात् F1 : तद्दभसार्थः G1, G2

[237] षत्वमिति G1 : षत्वसिद्धिरिति F1 , G2

[238] ग्रहणे F1 , G1 : ग्रहेणे G2

[239] भ्राजौ F1 : भ्राजतौ G1, G2

प्रथमं बुध्युपारोहेण शंकाया निरालम्बनत्वात् स्वतन्त्रास्वतन्त्रयोः परस्परसाहचर्यस्य दृष्टत्वात् [२४०] उत्तरस्यापि तथात्वात्। मनोरमाप्यत एव चिन्त्या। राजित्यस्य फणादित्वात् भ्राज्येकदेशस्यापि फणादिकस्यैव ग्रहणौचिन्त्यमन्यत्र विस्तरः।

**गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः॥ १५॥**

**अप्रसिद्धिश्च संज्ञादिरपि तद्गुणारोपादेव** बुध्यत इति। तद्गुणारोपपूर्वक तद्धर्मारोपादित्यर्थः। एवञ्च गौर्वाहीक इतिवदाधुनिकगोविन्दादिशब्देऽपि तद्गुणारोप-पूर्वक शक्यतावच्छेदकारोपात् बोध इति मञ्जुषायामादौ निरूपितम्। तथा च गां पाठयेत्यत्र उक्तरीत्यैव संज्ञाशब्दस्थलेऽपि गौणत्वप्रतीतेः प्रागेव मुख्यार्थोपस्थिति-काले प्रातिपादिककार्य्यें त्रयोदेशादिरूपे सति पदस्यैव [२४१] संज्ञात्वेन विनियोग इति संज्ञाभूतत्रिशब्दविषयेरुपं [२४२] त्रयाणिमित्येव बोध्वम्। एवं तर्हि गौणलाक्षणिकादि-प्रसिद्धस्य भेदेनोपादानं किमर्थमिति चेदर्थस्य गौणत्वेन ऐक्येऽपि संज्ञादिर्बोधको-पस्येति व्युत्पत्याऽप्रसिद्धस्य संज्ञाशब्दबोध्यत्वं गौणलक्षणिक अर्थस्य जात्यादि-शब्दबोध्यत्वमपीति बोधकभेदार्थस्यापि भेदनोपादानमेतत्परिभाषाव्याख्याने परिभाषा-भास्करोऽपि मुख्यं प्रसिद्धं तदन्यद्गौणम्। यदुक्तं हरिणा अभिव्यक्तपदार्थापि इत्याद्यभेदेन व्याख्याय प्रातिपादिककार्ये तु नेयं प्रवर्तत इति अविशेषेणैवाह। एतेन पदकार्यविषयक गौणमुख्यन्यायमूलकस्याप्य अभिव्यक्तपदार्था ये इति न्यायस्य गौणमुख्यन्यायदभेदेनोपादानात्प्रातिपादिकार्थविषयकत्मवलम्ब्य प्रातिपादिक-

---

240 दृष्टत्वात् G1, G2 : दृष्टचरत्वात् F1

241 पदस्यैव F1 , G2 : परस्यैव G1

242 संज्ञाभूतत्रिशब्दविषयेरुपं F1 , G2 : संज्ञारूपत्रिशब्दविषये

स्यैव संज्ञात्त्वेन विनियागेऽपि संज्ञात्रिशब्दे हरदत्तसम्मत्याऽत्र यादेशाभावं वदन्तः परास्ताः। मूले वक्ष्यमाणभाष्यवार्तिकादि विरोधेन हरदत्तस्य तिरस्काराच्च। गौणमुख्यन्यायमूलकत्वेनस्याभिप्रयुक्तोक्त श्लोकस्यापूर्ववचनत्वाभावात्तद्भेदोक्तेरहेतुत्वाच्च। यत्तु शेखरे संज्ञाशब्दव्यावृत्तयेऽभिव्यक्तेति न्यायमूलकं प्रसिद्धेति सर्वनामसंज्ञासूत्रे भाष्ये उक्तम्। तत्त्वभिव्यक्तपदार्था ये इति न्यायमूलकं यत्प्रसिद्धमन्यत्र दृष्टं तस्य सर्वनाम इत्यन्वर्थसंज्ञाबलेनैवात्रलाभो न त्वभिव्यक्तपदार्था ये इति न्याये वारणेत्य-र्थादविरुद्धम्। एतेन सर्वनामसंज्ञाप्रकरणशेखरोप्येतदनुसारी। किन्त्वभिव्यक्तपदार्था ये इत्यस्य गौणमुख्य न्यायमूलकत्वं पदकार्येष्वेव प्रवृत्तिं सिद्धान्तयतस्तस्य कथनं पूर्वोपरविरोधः इति विचारणीयमित्यपास्तमिति दिक्।

**अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १६ ॥**

तेन राज्ञासाम्नेत्यादाविति। अलोपान इत्यत्रादिति वर्णग्रहणेऽपि अनिति विशिष्टग्रहणमादायार्थवद्ग्रहणपरिभाषा प्रवृत्त्या राज्ञेत्यादेव लोपस्स्यान्न तु साम्नेत्यादौ परिभाषास्वीकारेण तू उभयसिद्धिरेवमुत्तरत्रापि बोध्यम्।

**अङ्गादिति परे इति**। एवञ्च ज्ञापकत्वासङ्गस्यवचनरूपत्वमेव तस्या इति भावः। यत्त्वान्निति प्रकृतिभावबाधनाय क्रियमाणं "कर्मस्ताच्छील्ये" (६-४-१७२) "ब्राह्मोऽजातौ" (६-४-१७१) इति टिलोपनिपातनमेतत्परिभाषाज्ञापकमन्यथां निनन्तस्य कर्मन् शब्दादेरनोऽनर्थकत्वेन प्रकृतिभावाप्राप्त्या नस्तद्धित इति टिलोपस्य सिद्धत्वाद्व्यर्थं स्यादिति तच्चिन्त्यम्। इनाद्यंशेयस्य ज्ञापकत्वायोगादर्थवद्ग्रहण परिभाषामित्यत्वस्य तेन ज्ञाने वितथैवेति बोध्यम्। व्याख्यातव्यं नाम्नोऽन्तर्बहिभ्याञ्च लोम्नः स्थानेऽन्तरमः इत्यादि त्वदुक्तनिर्दिश्यमानामपि विशेषविषयकत्वेन सौत्रत्वेन वोपपत्तेश्चेति दिक्।

**एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १७ ॥**

क्वचिदेकदेशोऽप्यनुवर्तते अत्रैकयोगनिर्दिष्टानामित्यनुवर्तते। एकस्मिन्नर्थे योग-सम्बन्धेन निर्दिष्टानमित्यर्थः। तत्फलितमाह **परस्परान्विर्थकपदानामिति।** तेन द्वयोरपि परिभाषायोस्समासनिर्दिशे असमासनिर्देशे च प्रवृत्तिः। अत एव "दामहायनान्ताच्च" (४-१-२७) इति सूत्रे संख्यादेरिति वक्तव्यमिति वार्तिकस्य प्रत्याख्यानय ''संख्याव्यायोदेर्ङीप्'' (४-१-२६) इति तदनुवर्तते। अव्ययादेरिति निवृत्तमिति सिद्धान्तिनाभिहिते पूर्वपक्षिणा प्रथमपरिभाषामादाय कथं पुनरेकयोगनिर्दिष्टानां पुनरेकदेशोऽनुवर्तते एकदेशिना इति शंकिते सिद्धान्तिना उक्तम्।

**क्वचिदेकदेशोऽप्यनुवर्तते ॥ १८ ॥**

तद्यथा "तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणाब्जाहचौ" (५-२-२४), "पक्षात्तिः" (५-२-२५) इति अत्र मूले इत्यनुवर्तते। पाकेति निवृत्तमिति दृष्टान्तद्वितीयमादाय[243] समाहितम्। "पक्षात्तिः" (५-२-२५) इति सूत्रे भाष्ये तु उक्त विपरीतदृष्टान्तदार्ष्टान्तिकभावः। यद्यप्येतत्सूत्रस्थकैयटादुभयोः परिभाषायोर्द्वन्द्वसमास-निर्देशे एव प्रवृत्तिरिति लभ्यते। तथापि तस्य प्रकृताभिप्रायकत्वात् अविरोधः। अतः एव च "औतोऽम्शसोः" (६-१-९०) इति सूत्रे भाष्ये जातः तिङि प्रतिषेध इति वार्तिकप्रत्याख्यानाय "वा सुप्यापिशलेः" (६-१-८९) इति सुपित्यनुवर्तते वेति निवृत्तमिति सिद्धान्तिनाभिहिते पूर्वपक्षिणा प्रथमामादाय कथं पुनरेकयोगनिर्दिष्टयोरेकदेशानुवर्तते एकदेशेनेति शंकित एकयोगनिर्दिष्टानामेकदेशोऽप्यनुवर्तते। यथान्यत्र "अलुगुत्तरपदे"

---

[243] द्वितीयमादाय F1 , G2 : द्वितीयाय G1

(६-३-१) अलुगाधिकारः प्रागानङः उत्तरपदाधिकारस्त्वापादपरिसमाप्तेरिति दृष्टान्तं द्वितीयमादाय समाहितमिति दिक्।

**भाव्यमानेन सर्वणानां ग्रहणं न ॥ १९॥**

**प्रकारान्तरेणेति** "ई हल्यघोः" (६-४-११३) इति दीर्घनिर्देशात् 'ऋतो वा' इति इटोदीर्घविधानात् ज्ञापकादित्यर्थः। प्रत्ययांशे[२४४] अनभिधानं भाष्ये उक्तम्। तथा हि "सनाशंसभिक्ष उः[२४५]"(३-२-१६८) इति साम्प्रतिके इत्यादि प्रत्ययस्यानावश्यकः प्रतिषेधः। महासंज्ञाकरणादर्थप्रत्यायकस्यैव प्रत्ययसंज्ञाविधानात् दीर्घभेदकप्राप्तन्तु न अनया निषिध्यत इति तत्र युक्तमित्यभेदका गुणा इति परिभाषायां निरूपयिष्यामः।

**भाव्यमानोऽप्युकारः सवर्णान् ग्रह्णाति ॥ २० ॥**

"दिव उत्" (६-१-१२७) इति ज्ञापिते चारितार्थ्यन्तु "च्छ्वोः शूडनुनासिके च[२४६]" (६-४-१९) इति सूत्रे किङित् ग्रहणाननुवृत्तिपक्षे द्युभ्यामित्यादौ परत्वादूठि पुनः[२४७] प्रसङ्गविज्ञानाध्रस्वस्यैव प्रवर्तने बोध्यम्। क्ङितीत्यनुवृत्तिपक्षोप्याह **ऋत उदिति**। यत्तु किङ्त् ग्रहणानुवृत्तिपक्षे व्यञ्जनस्यान्तरतम्यात्२८५ ह्रस्वविद्धेश्चारितार्थ्यस्य[२४८]

---

[244] प्रत्ययांशे F1 , G2 : प्रत्ययाः शे G1

[245] सनाशंसभिक्ष उः F1 , G2 : महासंज्ञाकरणादर्थ..........गुण G1(e)

[246] च्छ्वोः शूड् F1 : च्छो शुडिति G1, G2

[247] पुनः F1, G1 : पुनः पुनः इत्यस्ति G2

[248] ह्रस्वसिद्धेश्चारितार्थ्यस्य F1 : ह्रस्वविधेश्चारितार्थ्यस्य G1, G2

दुर्निरुप्यत्वात्[२४९] पुनर्व्यर्थं तपरकरणम्। यथाश्रुतरूपाश्रयणद्वारा "हलः" (६-४-२) इति दीर्घबाधनार्थं सम्पद्यत इति तच्चिन्त्यम्। तत्र तद्भावितपक्षाश्रयणात् दीर्घस्याप्राप्तेरिति "इग्यणः सम्प्रसारणम्" (१-१-४४) इति सूत्रे शेखरे स्पष्टम्। गीः पुरित्यादाविदूदिति तपरकरणावोरिति दीर्घस्यासिद्धत्वेन वारणेऽपि पन्थानावित्यादावदिति तपरकरणात् सर्वनामस्थाने चेति दीर्घस्य वारणापत्तेश्च। यद्यपि "अदसोऽसेर्दादु दो मः" (८-२-८०) इत्यत्र उ, इ ह्रस्वदीर्घयोस्समाहारनिर्देशात् अमू इत्यादौ न दोषः। न च ध्यन्तत्वात् ह्रस्वस्य पूर्वनिपाते नपुंसक[२५०] ह्रस्वसवर्णदीर्घयोः प्राप्तयोदीर्घस्य शब्दान्तरप्राप्तया अनित्यत्वेन परत्वात् ह्रस्वे ततस्सवर्णदीर्घे उ इति रूपासिद्धिरिति वाच्यम्। समुद्राभ्नात् घ इति पुनर्निर्देशात् पूर्वनिपातप्रकरणानित्यत्वेन दीर्घस्यैव[२५१] ससशेखरे प्राङ्निपातादिति तन्न। निर्देशस्य सौत्रत्वादुपपन्नत्वेन लाघवाद्भवदुक्तरीत्या उकाल इति वक्तव्ये ऊकाल इति दीर्घनिर्देशेन उवर्णविषये पूर्वनिपातप्रकरणस्या-नित्यत्वज्ञापने च 'उ' इति रूपासिद्धेर्निर्विघ्नत्वात्। न च "सनाशंसभिक्ष उः" (३-२-१६८) इत्यादावनया सवर्णग्राहकतापत्तिः। "ॠत उत्" (६-१-१०७) इति तपरकरणेन भाव्यमानेन सवर्णानां ग्रहणं नेत्यस्यानित्यत्वज्ञापनादिति कैयटेनैव समाधानात्। नित्यत्वानित्यत्वयोश्च लक्ष्यानुरोधेन व्यवस्थिततत्वात्। "उदुपधायाः गोहः" (६-४-८९) इत्यत्र लाघवात् ह्रस्वनिर्देशे एव कर्तव्ये दीर्घनिर्देशात् "भाव्यमानेऽप्युकारः...." (परि-२०) इति परिभाषाया अनित्यत्वाच्च धार्मिकग्राहकमानात् भाव्यमानादेशरूपोकारस्य एव अनया सवर्णग्राहकत्वबोधनाच्चेति संक्षेपः।

---

[249] दुर्निरुप्यत्वात् F1, G2 : दुर्नीरुप्यत्वात्

[250] नपुंसक F1, G2 : पुंसक G1

[251] दीर्घस्यैव F1, G2 : दुर्घस्यैव G1

**वर्णाश्रये नास्ति प्रत्ययलक्षणम्॥ २१ ॥**

स्थानिवदित्यनुवृत्त्यैव सिद्धेरिति मण्डुकप्लुत्येति शेषः। **विशेष्यतारूपंचेति।** तथा च कार्यविधौ विशेष्यतया वर्णावृत्यसाधारणाधर्मावच्छिन्नाश्रयणे प्रत्ययलक्षणनेति फलितम्। तथा च "अतृणेट्" "अग्निचित्" "अचकाददित्यादीनां" स्थानिवत्त्वा प्राप्तावपि प्रत्ययलक्षणसूत्रस्य विधायकत्वात्सिद्धिः। **वर्णाश्रय इति निषेधस्तु उक्तरीत्यावर्णाभावात् न प्रवर्तते।** नन्वेवम् "अग्निचित्" इत्यत्र क्विपः उपदेशे पकारेकारयोर्लोपे अविशिष्ट वकारमात्रस्य "वेरपृक्तस्य" (६-१-६५) इति लोपे अचकादचका इत्यादौ त्रिपाद्या असिद्धत्वात् "इतश्च" (३-४-१००) इति तिप्सि-पोरिकारलोपे हल्ङ्यादित्पृक्तस्योश्च लोपे च कृते कृत्वतिप्त्वसिप्त्वानां रुत्वमिव स्थनिभूताल् वृत्तिधर्मत्वात् मूलकृन्मते अनल्विधाविति निषेधात् स्थानिवत्वाभावेन "ह्रस्वस्य पितिकृति तुक्" (६-१-६९) इति तुक्, "तिप्यनस्तेः" (८-२-७३), "सिपि धातो रूवा" (८-२-७४) इत्येतेषामप्राप्तेः। प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वेमेव[२५२] भाष्यकृदुक्तनियमत्वोक्तेरसङ्गतिरिति चेन्न। अल्मात्रवृत्तिस्थानितावच्छेदकोधर्मः आदेश-विधावुपातेः तदवच्छिन्नस्थान्यल्वृत्तिधर्माश्रयविधौ स्थानिवद्भावो न इत्यनल्विधा-वित्यस्यार्थः। अस्ति च सत्त्वविधायकविसर्गस्त्वम् त्था च तदवच्छिन्नस्थान्य-ल्त्वृत्तिधर्माश्रयविधौ णत्वे कर्त्तव्ये "व्यूढोरस्केन" इत्यादौ निषेधप्रवृत्तिः[२५३]। एवमन्यत्राप्यवधेयम्। प्रकृते च "वेरपृक्तस्य" (६-१-६५), "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" (६-१-६६) इत्यादेशविधायके "ङेर्यः" (७-१-१३) इत्यादाविव समुदायरूपेण

---

[252] विध्यर्थत्वावश्यकत्वे F1 : विध्यर्थमेव G1 : विध्यर्थत्वेमेव G2

[253] निषेधप्रवृत्तिः F1 : निषेधप्रसक्तिः G1, G2

स्थानितया उपादानात् स्थनिभूतावच्छेदकधर्मस्याल्मात्रवृत्तित्वभावेन निषधात्प्रसङ्गात्। स्थानिवद्भावस्य सिद्धत्वात् प्रत्ययलक्षणसूत्रस्यनियामर्यत्वोपपत्तिः। न चैवं कार्यविधौ उपात्तनिमित्ततावच्छेदकधर्मैः कौस्तुभकृदुक्तासाधारण्यनिवेशादविशेष इति वाच्यम्। स्थानिवदिति स्थानिपदश्रुत्या स्थानितावच्छेदकधर्मस्य उपस्थितत्वेन "धिन्वन्ति" इत्यादेस्येन सिद्धयनुरोधेन "अश्" ग्रहण प्रत्याख्यानपरभाष्यप्रामाण्येन च स्थानितावच्छेदकधर्मे एव अल्मात्रवृत्तित्वरूपासाधारण्यनिवेशस्यौचित्यात्। एतेन स्थान्यवयवाल्मात्रवृत्तिधर्ममात्राश्रयणे अनल्विधाविति निषेधस्य नव्यतरैरङ्गीकारात् उक्तोदाहरणेषु स्थानिवत्वप्रसक्तौ प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वसंभवे नियमत्वोक्तिर-संगतिरित्यपास्तम्। एवं "नपुंसकाच्च" (७-१-१९) इति विहितस्यादेशविधौ उपात्त-स्थानितावच्छेदकधर्मस्य औङ्शब्दरुपस्य नाल्मात्रवृत्तित्वं[२५४]। न च चतुष्टयीशब्दानां प्रवृत्तिरिति[२५५] मते संज्ञाशब्दे शब्दस्य प्रवृत्ततया औङ्त्वस्य औङ्शब्दरुपस्य वाच्यता सम्बन्धेन विभक्तिवृत्तित्वेन अल्मात्रवृत्तित्वमेवेति वाच्यम्। सकलशब्दाना मपि जातिरेव प्रवृत्तिनिमित्तमिति मते संज्ञाशब्दनामोच्चारणभेदेन[२५६] नानात्वात्-शब्दवृत्तिजातिरेव प्रवृत्तिः निमित्तम्। अस्याश्च परम्परासम्बन्धेन संज्ञिनिष्ठत्वात् ततस्तद्बोधः। तथा च प्रवृत्तिनिमित्तभूततादृशजातेस्साक्षात्सम्बन्धेन संज्ञाभूतशब्द-वृत्तित्वात् अल्मात्रवृत्तित्वाभावात् निषेधप्रसङ्गात् श्यादेशो ङौङङित उपप्लुतवाक्येन

---

[254] नाल्मात्रवृत्तित्वम् F1, G2 : नामात्रवृत्तित्वम् G1

[255] जातिशब्दाः, गुणशब्दा, क्रियाशब्दा, यदृच्छाशब्दश्चेति चतुष्टयी शब्दानां प्रवृत्तिरिति, ॠलृक् सूत्रे भाष्ये।

[256] संज्ञाशब्दनामोच्चारणभेदेन F1, G2 : संज्ञाशब्दनामोच्चारणभेद G1

ङौङ्त्वस्य परस्परया तत्समानाधिकारणत्वादिप्रत्ययत्व द्विर्वचनत्यादेश्चातिदेशात् “साम्निलोम्निसुपथीकुले तिष्ठतः”, “लोम्नि इमे”, “साम्नि इमे” इत्यादौ न दोषः। एवं “ङे प्रथमयोरम्” (७-१-२८) इत्यम् विधावुपात्तस्य तादृशधर्मस्य प्रथमात्वस्य नाल्मात्रवृत्तित्वमिति निषेधाप्रसङ्गात्। अमादेशः प्रथमावदित्युपप्लुतवाक्येन प्रथमात्वस्य तत्समानाधिकरणद्विर्वचनत्व विभक्तित्वादेश्चातिदेशाद्युवान्तिष्ठतः। "युवं वस्त्राणि" इत्यादौ न दोषः। न चैवं “ससजुषोः (८-२-६६) इत्यादेशविधायके स्थानितावच्छेदक-धर्मस्य सत्त्वस्य अल्मात्रवृत्तित्वेन निषेधप्रसङ्गात् स्थानिवद्भावाभावेन कौ सुप्त्वाभावात् पदान्तत्वनिबन्धनो विसर्गो न स्यादिति वाच्यम्।

यथोद्देशपक्षे वृक्षसीति सान्ते प्रवृत्तायाः पदसंज्ञायाः कृतरुत्वें लौकिकैकदेश-विकृतन्यायेन त्वनपायात् आनुमानिकादेशेन स्थानिवत्वाद्विर्गसिद्धेः। न चैवमप्यारेत्यादौ अमादेशविधौ “उरत्” (७-४-६६) इत्यत्रोपात्तस्य स्थानितावच्छेदकाधर्मस्य ऋत्वस्याल्मा-मात्रवृत्तित्वेन निषेधात् स्थानिवद्भावाप्राप्त्या अभ्यासनिबन्धनः "अत आदेः" (७-४-७०) इति दीर्घो न स्यादिति वाच्यम्। प्रक्रियाज्ञानवतां द्विरुक्तंधातुपूर्वभागज्ञानस्य तस्मिन् सुलभत्वेन पुनरभ्याससंज्ञाकरणेन दोषाभावः इति मत्कृत दोषोद्धारे विस्तरः। एतेन अनल्विधावित्यस्य नव्यतरोत्प्रेक्षितार्थकत्वे ‘वृक्षः’ ‘प्लक्षः’ इत्यादौ सोस्सस्य रुत्वे, रेफस्य स्थानिवत्वात् सुप्त्वेन तदन्ते पदत्वनिबन्धनोः विसर्गो न स्यात् । साम्निलोम्नी-त्यादौ प्रथमाद्विवचनस्य शीत्यादेशे तस्य स्थानित्वात् ङौ वृत्तिस्वादिप्रत्ययत्व-माश्रित्यौत्वाज्जायमानो “विभाषा ङिश्योः” (६-४-१३६) न स्यात्। “सुपथीकुले तिष्ठीतः[257]” इत्यादौ भस्य टेर्लोपो न स्यात्। “युवांन्तिष्ठत” इत्यादावमादेशे इत्यात्वं न स्यात्।युवं वस्त्राणीत्यादौ विभक्तौ परतः “शेषे लोपः” (७-२-९०) न स्यात्। तथा “लोम्नीदमेः”,

[257] सुपथीकुले तिष्टतः F1, G2 : सुपथिकुलेतिष्टतः G1

"साम्नीमे" इत्यादौ ईकारान्ते द्विवचनत्वं स्थानिवद्भावेन न लभ्यतेति[258] अत्र "प्लुतप्रगृह्या अचि" (६-१-१२१) इति प्रकृतिभावो न स्यात्। "आरतुः" इत्यादौ उरदति स्थानिवद्भावेनाभ्यासत्वात् "अत आदेः" (७-४-७०) इति दीर्घो न स्यादति दूषणगणे निराकृतः। अत एव धिन्वन्तीत्यादौ आकारवृत्त्यार्द्धधातुकत्वस्य धिन्वन्तीत्यादौ वकारे अनतिदेशात् इण्न। अत्रेण्निवृत्तयेऽपरविधाविति न्यासेन स्वविधावपि स्थानिवत्त्वस्य समाधिका [259] भाष्योक्तिस्तु एकदेशिनः इति शेखरे एव स्पष्टम्। अत एव च रेफस्थानिकविसर्गस्य रू शब्दत्वं न स्थानिवद्भावेनेति [260] "देवास्सन्ति" वृक्षस्तत्रेत्यादौ यत्वातिप्रसंगाभावात् 'अश्' ग्रहणं प्रत्याख्यातम् "भो भगो (८-३-१७) इति सूत्रे भाष्ये। यत्र ह्यशोऽन्यः खर्भवति। तत्र पूर्वत्रासिद्धमिति यत्वस्यासिद्धत्वाद्विसर्जनीयेन भाव्यम्" इत्यश्येव रुरस्तीति कैयटप्रदर्शिताशयेन 'अश्'ग्रहणमनर्थकमन्यत्राभावात्। नह्यन्यत्र रुरस्ति। अन्यदतो शः इति सिद्धान्तिनाभिहिते "रोः सुपि" (८-३-१६) इति विसर्गादेशविधायके दोरिंतिरेषानुवृत्तिमनुसन्धाय[261] शब्दत उपात्तस्य स्थानितावच्छेदक-भूतरुत्वस्याल्मात्रवृत्तित्वाभावेन निषेधाविषयतया [262] स्थानिवत्वेन रुत्वाच्छब्दस्सुपय-स्वित्युक्ते "रोः सुपि" (८-३-१६) इत्यत्रापि एषानुवृत्तिमभिसन्धाय निषेधविषयत्वात्

---

258 लभ्यतेति : लभ्येतेति F1, G1 , G2

259 समाधिका G1 , G2 : साधिका F1

260 स्थानिवत्वेनेति F1 : स्थानिवद्भावेनेति G1 , G2

261 अनुसन्धाय F1, G2 : अनभिसन्धाय G1

262 निषेधाविषयतया F1 : निषेधाविषययो G1, G2

स्थानिवद्भावाभावेन छन्दस्सु वृक्षस्तत्रेत्यनयोस्सार्थक्याभि प्रायेण[२६३] किः पुनः कारणं सुकारपर एव उदाह्रियते न पुनरयं "वृक्षस्तत्र" प्लक्षस्तत्र इति सिद्धान्तिनाभिहिते "खरवसानयोविर्सजनीयः" (८-३-१५) इत्यत्रव रेफानुवृत्तिसन्दधानेन तेनैव सिद्धान्तेन इहपि विसर्जनीये कृते न भविष्यति। छन्दस्सु पयस्वित्यभिहितेरेषानुवृत्तिवादिना स्थानिवद्भावात् प्राप्नोतीति स्वाशये प्रकाशितेरेषानुवृत्तित्वादिना निरुक्तार्थानभिज्ञेन एकदेशिना न चेहापि प्राप्नोति "वृक्षस्तत्र", "प्लक्षस्तत्र" इत्याशङ्किते रेफाननुवृतिवादिना निरुक्तार्थाभिज्ञेन अनल्विधौ स्थानिवद्भाव इत्येकदेशिसिद्धान्तिनाभिहिते रेफानुवृत्तादिना सिद्धान्तिना उक्तम्। "वृक्षस्तत्र प्लुक्षस्तत्र" इत्याशंकिते रेफानुवृत्तिवादिना निरुक्तार्थाभिज्ञेन[२६४] अनल्विधौ स्थानिवद्भाव इति एकदेशिसिद्धान्तिनाभिहिते रेफानुवृत्तिवादिन सिद्धान्तिना[२६५] उक्तम्। अथायम् ल्विधिः स्यात् शक्यं'शे' ग्रहणमवक्तुं बाढम्। शक्यमल्विधिः। तर्हि भविष्यति। कथमिदमस्ति "रोरि" (८-३-१४) इति। ततो वक्ष्यामि "खरवसानयोर्विसर्जनीयः" (८-३-१५), रः ततः "रोः सुपि" (८-३-१६) विसर्जनीय इत्येवेति तत उत्तरार्थाम्। तर्ह्यशग्रहणं कर्तव्यम्। हलि सर्वेषा हलि,अशि यथा[२६६] स्यात्। इह मा भूत् वृक्षयतेरप्रत्ययः वृक्षवकरोतीत्युक्तम्। वृक्षवहसतीत्यादौ दोषानुद्धारदेव मादेरनभिधानस्यावश्यमाश्रयणीयतया इयमेकदेश्युक्तिः। अनुबन्धैकान्तत्वानेकान्तत्व वृक्षयोः साधारण्येन अश् ग्रहणप्रत्याख्यान-परभाष्यमेतत्। इत्संज्ञाया उभयथापि सत्त्वेन तत्कृतविशेषाभावात् कैयटेन तथा वर्णानाच्च। यत्तु अनुबन्धानेकान्तत्ववादिमते 'अश्' ग्रहणं वैयर्थम् । किन्तु तन्मते

---

[263] प्रायेण F1 : सार्थक्याभिप्रायेण G1, G2

[264] निरुक्तार्थानभिज्ञेन F1, G2 : अनल्विधौ स्थानिवद्भावः G1

[265] सिद्धान्तिना F1, G2 : सिद्धाना G1

[266] यथा F1, G1 : यधा G2

उकारोपलक्षिततत्वरूपस्य इकारमात्रवृत्तीटत्त्वस्याप्यतिदेशो न प्राप्नोतीत्याशंक्य "नमुने" (८-२-३) इति योगविभागादेकदेशं प्रतीव दीर्घं प्रति[२६७] सिज्लोपस्या सिद्धत्वादि इति समादधुः। तच्चिन्त्यम्। आदेशविधौ "ग्रहोऽलिटि" (७-२-३७) इति सूत्रे स्थानिता-वच्छेदकधर्मस्य इट्त्वस्याल्मात्रेवृत्तित्वभावेन निषेधाप्रसङ्गात् स्थानिवत्वेनेष्टसिद्धेः। अत एव "विशिष्टं ह्येषोऽनलमाश्रीयते इटं नाम" इति भाष्योपपत्तिः। "न मु ने" (८-२-३) इति योगविभागस्य भाष्येऽदर्शनेन अप्रामाणिकत्वाच्च। तत्रेति सिज्लोप एकादेशे सिद्ध इत्येवमादिवार्तिकस्य वैयर्थ्यापत्तेश्चेति दिक्। न चैवं कार्यविधौ निमित्ततावच्छेदके दीक्षितोक्तासाधारण्या निवेशे यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो[२६८] मृग्यते। तस्य निमित्तस्य स्थान्यल्साधारणधर्म एव निषेध प्रवृत्तेः बभूविव इत्यादौ न दोष इति अग्रिमशेखर[२६९] पंक्तिर्विरुध्येति इति चेद् ल्मात्रवृत्तिर्यः स्थानितावच्छेदको धर्मः तदवच्छिन्न-स्थान्यल्वृत्ति धर्माश्रयविधौ स्थानिवत्वं नेति द्वितीयार्थाभिप्रायेण तत्पंक्ति प्रसरात् तत्फलकथनाव्यवहितोत्तरमेव तदुक्तेद्वितीयार्थविषये च सर्वत्र स्थानिसम्बन्धितावच्छेदक-स्याल्मात्रवृत्तित्वात्। तेन सह निमित्ततावच्छेदक स्वरूपेणसाधारणधर्मेण चाभेदकस्यैव सत्त्वेन निमित्ततावच्छेदक फलितमसाधारण्यमादाय तदुक्त्युपखतेः[२७०]। यथा प्रदीव्येत्यादौ स्थानिसम्बन्धितावच्छेदकस्य निमित्ततावच्छेदकत्वेन सह असाधारणभेदः। प्रथमार्थविषये तु क्वचित्तद्युकामः क इष्ट इत्यादौ स्वरूपेणासाधारणधर्मेण च तयोरभेदेऽपि "धिन्वन्ति", "देवास्सन्ति" इत्यादौ अनिर्दिश्यमाननिमित्तद्व्यवच्छेदकरुत्वाद्यर्थकत्त्वयोः

---

[267] प्रति F1, G1 : G2(o)

[268]अतिदेशो F1 , G2 : अतिदेशे G1

[269] शेखर F1 , G1 : शेर G2

[270] तदुक्तोपपत्तिः F1 , G2 : तदुक्तुपपत्तेः G1

स्थानितावच्छेदकी भूतरेफत्वादिना स्वरूपसाधारणधर्माभ्याममभेदाभावत्तथा सर्वत्र व्यवहार इति। विस्तरस्तु मत्कृत शेखरदोषोद्धारे विवेचित इत्यलम्। **चित्रायां जाता** [२७१] "चित्रारेवती" **रोहिणीति** वार्तिकेन सन्धिवेलेति विहितस्याणोलुक्तद्धितेति स्त्रीप्रत्ययस्य लुकि अणो योऽकार इति प्रत्ययनिरूपितविशेष्यतारूपप्राधान्यस्य[२७२] अवर्णे सत्त्वात्। अनया प्रत्ययलक्षणनिषेधात् ङीव्भावे टाबित्यर्थः प्रत्ययलक्षणसूत्रस्य[२७३] विधायकत्वा-भिप्रायेण अहोऽयमल्विधाविति। यथा कथंञ्चिदल्विधावित्यर्थः। **निषेधिकेति**। वर्णवृत्य-साधारणधर्मावच्छिन्नस्य विशेष्यता श्रये गोहितमित्यादि विषय इव अयवायवेत्यादा-वित्यर्थः। तेन अतृणेडि इत्यत्र हलीत्यिननुवृत्यत्र तृणाहानीत्यत्र प्रसक्तमचिनेत्यनुवृत्त्या अतृणेडि त्यादेरुक्तरीत्या अनल्विधाविति निषेधावृत्या[२७४] स्थानिवत्त्वेन सिद्धिं सम्पाद्य प्रत्ययलक्षणसूत्रस्य नियामकत्वमिति भाष्यकारः[२७५]। तेन सुदृषदित्यादि सिद्धिरित्यन्यत्र विस्तरः।

**उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥ २२॥**

**इदमेवेति**। नन्वर्थवत्सूत्रस्यापि ज्ञापकत्वसंभवादेवासङ्गतीति चेन्न। बहुपटव इत्याद्यर्थं तस्यावश्यकत्वात्। न च बहुच्पूर्वइति[२७६] वक्तव्ये सामान्यप्रणयनमन्यार्थं सत्

---

271 चित्रायामिति F1 , G2 : चित्रायां जाते G1

272 प्रत्ययनिरूपितविशेष्यतारूपप्राधान्यस्य F1 , G2 : प्रत्ययनिरूपितविशेष्यरूपप्राधानस्य G1

273 प्रत्ययलक्षणसूत्रस्य F1 , G1 : प्रत्यलक्षण G1

274 निषेधावृत्त्या G2 : निषेधाप्राप्त्या F1 : निषेधाप्रवृत्त्या G1

275 भाष्यकाराः G1, G2 : भाष्यकारः F1

276 बहुच्पूर्वमिति F1, G2 : बहु च पूर्वः G1

ज्ञापकमेवेति वाच्यम्। तथा सति सारसङ्ग्रहणस्य नियमार्थत्वानुपपत्त्यात् मूलकेनोपदंशमित्यादौ[२७७] "कृद्ग्रहण...." (परि-२८) परिभाषया कृदन्तत्वेन[२७८] प्रातिपदिक-त्वातिप्रसङ्गात्[२७९] । न च "तेन प्रोक्तम्" (४-३-१०१) इति निर्देशात् कृदन्तत्वेन प्रातिपदिकसंज्ञायां कृद्ग्रहणपरिभाषानुपस्थिवृत्तिरिति वाच्यमनिर्देशस्य सूत्रेणाप्युपपत्तेः[२८०] । पुंयोगादाख्यायामिति चोद्योतकृदुक्तरीत्या फलाभावाच्च। एतेन "तेन प्रोक्तम्" (४-३-१०१) इत्यादि निर्देशोत् कृदन्तत्वप्रयुक्तप्रातिपदिकसंज्ञायां कृद्ग्रहणपरिभाषायाऽप्रवृत्तिज्ञापनादुन्नो दोष इत्यपास्तम्। सर्वत्र निर्देशैरेवोपपत्तेः[२८१] सूत्राणां वैयार्थ्यापाताच्च शब्देन्दुशेखरे निरूपितमिति "उणादयो बहुलम्" (३-३-१) इति सूत्र तत्र व्याकरणान्तरस्योणादि व्यवस्थापकम्। उणाद्यन्ताः शब्दाः येन व्याकरणन्तरेण व्युत्पादिताः[२८२] तत्र बहुलमिति वक्तव्यम्। वर्तमानकालाधिकारे च ते वक्तव्यभूते अपि इति च वाच्यमिति सुत्रार्थः। स्वशास्त्रेत्वेषां साधुत्वबोधनं च एतावतैवेति त्वया मन्ता "अप्तृन्तृच्स्वसृनप्तृनेष्टत्व-ष्ट्रक्षत्तुहोतृपोतृप्रशास्तृणाम्" (६-४-११) अनुवादेषु न वैयर्थ्यशंकितिं "सर्पिष", "यजुषे" इत्यादौ त्वप्रत्ययावयवत्वन्तु बहुलग्रहणादेवेति "आदेशप्रत्यययोः" (८-३-५९) इति सूत्रे भाष्ये स्पष्टम् । एतेन अवश्यं सर्वत्राव्युपन्नत्वमङ्गीकर्तव्यम्। एषां

---

277 मूलकेनोपदंशमित्यादौ F1, G2 : मूले केनोपदंशमित्यादौ G1

278 कृदन्तत्वेन F1, G2 : कृदत्वेन G1

279 प्रातिपदिकत्वातिप्रसङ्गात् F1, G2 : प्रतिपदिकत्वातिप्रसङ्गात् G1

280 सूत्रेणाप्युपपत्तेः G2 : सौत्रत्वेनाप्युपपत्तेः F1 : सौत्रणाप्युपपत्तेः G1

281 निर्देशैरेवोपपत्तेः F1, G2 : निर्देशैरेवापपत्तिः G1

282 व्युत्पादिताः F1, G2 : निष्पादिताः G1

“तितुत्रतथसिसुरकसेषसससु च” (७-२-९) इत्यादौ केषांचिद्ग्रहणवैयर्थ्यप्रसङ्गात् । तेन “सर्पिषा” “यजुषा” इत्यादौ सिद्धमित्यपास्तम्[283]। “तुश्छन्दसि” (५-३-५९), “तुरिष्ठेमेयस्सु” (६-४-१५४) इति च उभयो- र्ग्रहणं यथास्यादिति तृचश्चकारप्रयोजनपर ''ण्वुल् तृचौ'' (३-१-१३३) इति सूत्रभाष्यादुणादीनां व्युत्पन्नत्वं प्रतीयमानमपि शाकटायनरीत्या लोपवारणाय अव्युपत्तिपक्ष एव आवश्यक इति “ॠतः[284]” (७-४-९२) इति सूत्रे कैयटः ॥

**प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २३ ॥**

**स च शब्देति**। यथा “व नो र च” (४-१-७) इत्यादौ वत्रन्तादिति प्रथमस्तदन्तविधिः। सर्वनामाव्ययसंज्ञायां तदन्तविधिवत्। ये तु अनया[285] परिभाषया तदाद्यन्तस्य अपूर्वबोधनमिव तदन्ताशस्यशस्यापि[286] वाचनिकत्वं वदन्ति। तेषां मते शब्दरूपविशेष्यानपेक्षैवं। तन्मते[287] सर्वनामाव्ययसंज्ञायामपि[288] वार्तिककृदुक्तापूर्वस्त-तदन्तविधिर्बोध्यः। अत एव “येन विधिस्तदन्तस्य” (१-१-७१) इति सूत्रे भाष्ये तदन्त-विधिप्रयोजनप्रस्तावे “प्रत्ययग्रहणे चापञ्चम्याः” प्रत्ययग्रहणं प्रयोजक भाष्यप्रतीकमुपादाय

---

[283] भवतीत्यपास्तम् F1, G2 : षत्वं सिद्धमित्यपास्तम् G1

[284] ॠतः F1 : ॠतश्च G2 : रजत G1

[285] ये तु अनया F1, G2 : येत्यत्वनया G1

[286] तदन्तांशस्यशस्यापि F1, G1 : बोधनमितिवदतांशस्यापि G2

[287] तन्मते : तन्यते F1, G1, G2

[288] सर्वनामाव्ययसंज्ञायामपि G1 : सर्वनामाव्यसंज्ञायामपि F1, G2

''प्रत्ययग्रहणे यस्मात्सविहित'' इति सिद्धे तदन्तविधावपञ्चम्या इति निषेधार्थं वचनमिति कैयटेन व्याख्यातम्। स्पष्टञ्चैतदुद्योते। "प्रत्ययाविधौ[289] प्रतिषेधैः" इति निषेधास्तु नात्र। स हि प्रस्तुत विशेष्यविषयकः। "येन विधिस्तदन्तस्य" (१-१-७१) इति सूत्रविहित तदन्तानिषेधविषयः। विशेष्यप्रस्तुततत्वञ्च साक्षादुपात्तविशेष्याधिकृतविशेष्यनियताक्षिप्त-विशेष्यैतदन्यतमत्वं पारिभाषिकं कैयटप्रदर्शितं बोध्यम्। नियतत्वं[290] व्यभिचारित्व-रूपम्। यथा कोसलीत्यत्र सनाधातोरिति दिक्। कौस्तुभोक्तं खण्डयति **यत्त्विति**। प्रत्ययेन निपादिना। स्वं प्रत्ययस्तस्य प्रत्ययस्य। **तादृशेति**। प्रकृत्यवयवकेत्यर्थः। **व्यभिचारेणेति**। यत्तु प्रक्रियाज्ञानवतां व्यभिचाराभावान्न दोष इति तन्न। प्रक्रियाज्ञानवतां तादृशसमुदायः पूर्वमासीदिति[291] । ज्ञानसत्त्वेऽपि स्वरूपसत्तादृशसमुदायस्य सम्प्रत्या-भावेन व्यभिचारावारणात् तेषां तादृशसमुदायबुद्ध्या तादृशसमुदाये तदन्तसञ्ज्ञाप्रवृत्ति-ज्ञानस्यापि संभवेन तज्ज्ञानमादाय संज्ञाप्रवृत्तेरानर्थक्याच्च। आवधिषीष्टेत्यादौ तेषां वृद्धिसत्त्वेन आत्मनेपदसिद्धौ स्थानिवत्सूत्र व्यापारस्य अनर्थक्यापत्तेश्च। सर्वादीनि स्वरादिनिपातमित्यादौ प्रत्ययभिन्ने "इको यणचि" (६-१-७४) इत्यादौ कैयटोक्तरीत्या शब्दरूपं विशेष्यमादाय तदन्तसंज्ञाप्रवृत्तेरवश्यं वक्तव्यतयेहापि तदाश्रयणस्यौचित्याच्च। किञ्च "शब्दोत्थापिताकांक्षाशब्देनैव प्रपूर्यते" इति न्यायविरोधेन आक्षिप्तस्य शाब्दान्वय-प्रतियागित्वाभावात्। "घटमानय" इत्यादावाकाशादेरपि बोधापत्तिः। यत्तु वृत्त्युपस्थापित-तदव्यभिचारिणोरुभयोरपि वृत्त्युपस्थापितत्त्वमङ्गीक्रियते। अत एव "इको यणचि"(६-१-७४)

---

[289] प्रत्ययाविधौ F1, G2 : प्रत्ययविप्रतिषेधः G1

[290] नियतत्वञ्च G1 : नियतत्वम् F1, G2

[291] पूर्वमासीदिति F1 : पूर्वमादिति G1 , G2

इत्यादौ इत्पदप्रवृत्त्युपस्थापित ह्रस्वेकारादिसंज्ञानां दीर्घादीनां तदव्यभिचारित्वात् वृत्त्यपुस्थापितत्वात् षष्ठ्यर्थान्वय [२९२] प्रतियोगितेति [२९३] सिद्धान्तः। तात्पर्याभावादति प्रसङ्गभङ्गस्य सुशक्यत्वेन वृत्त्यपस्थापितस्यैव शाब्देऽन्वय प्रतियोगिताया अकल्पनाद्वा-व्यक्तेराक्षेपाल्लाभं संख्याकर्मादेस्तत्रान्वयञ्च वदातां जातिवादिनां मतस्यैवमवस्थापनीय-त्वादिति, तच्चिन्त्यम्। उक्तरीत्या तादृशसमुदायस्य प्रत्यायाव्यभिचारित्वात् शब्देऽपि शब्दस्य वृत्त्यङ्गीकारमते शक्यवृत्युस्थापितशब्दाव्यभिचारिगगनादेर्बोधस्य शब्दाद्वारणाच्च [२९४] । द्वितीयादिक्षणावच्छिन्नो "घटः सुन्दरः", "त्वं पश्य" इत्यादौ घटपदवृत्त्युपस्थापित तादृशघटाव्यभिचारिणो रूपादेर्बोधापत्तेश्च। इगादिपदे व्यक्तिपक्षे दीर्घादिषु लक्षणास्वीकारेण समुपस्थापितत्त्वाच्च। जातिपक्षे जातितदाश्रयव्यक्तयोरभेदेन च मीमांसकानां जातिवादिनामाक्षेपस्य [२९५] मञ्जूषादौ दूषितत्वेन जातिव्यक्तयोरभेदस्य व्यक्तौ लक्षणाधिमाश्रयणेनादोषाच्चेति दिक्। "अन्वर्थसंज्ञालभ्यः संज्ञी विशेष्यः" इति तु न युक्तमिति उद्द्योते स्पष्टम्। ननु च "सुँपि च" (७-३-१०२), "रोः सुपि"(८-३-१६), "केऽणः" (७-४-१३) इत्यादौ सुबन्तेत्यर्थापत्तिः। पञ्चम्यन्तस्य प्रत्ययविशेषणत्वाभावेन "अपञ्चम्याः" इति निषेधस्य प्रसरादत आह **यत्र प्रत्यय इति**। तस्मिन्निति परिभाषाया सुपि परे इत्यर्थे नियमेन कस्या इत्यवधि साकांक्षात्वेनोपस्थितपूर्वस्येत्यंशस्य तदादेर्वा बधितत्वेनान्वये

---

[292] षष्ठ्यर्थान्वय F1, G1 : षष्ठर्थान्वय G2

[293] प्रतियोगितेति F1, G2 : प्रतियोगिनेतीति G1

[294] शब्दाद्वारणाच्च F1 , G2 : शब्दान्नद्वारणाच्च G1

[295] जातिवादिनामाक्षेपस्य F1 , G2 : जातिवादिवादमाक्षेपस्य G1

“स्यतासी लृँलुँटोः” (३-१-३३) इत्यादौ न दोष इति मूले एव वक्ष्यमाणभाष्यान्तरसङ्ग्रहः इत्यान्यत्र विस्तरः इत्यन्यत्रेति उद्द्योते शेखरादवित्यर्थः।

यत्तु गार्ग्यायणेत्येतावदुदाहरणं परमशब्दार्थस्तु गार्ग्यायणे विशेषणम्। परमशब्दार्थस्य गार्ग्यायणे विशेषणत्वे परमगार्ग्यस्य प्रकृतिसम्भावनाया एवाभावात् परिभाषाप्रयोजनस्य असंभवापत्तेः । गार्ग्यशब्दार्थस्य फगर्थनिरुपितप्राधान्यसत्त्वेऽपि परमशब्दार्थसमवेत[२९६] प्राधान्यसत्त्वेन “भवति च प्रधानस्य सापेक्षस्यापि समास” इति समर्थसूत्रभाष्योक्तरीत्या तद्धितार्थसापेक्षत्वेऽपि परमगार्ग्ययोरसमासे सति समुदायात्प्रसक्त तद्धितस्यानया परिभाषाया वारणे गार्ग्यशब्दाद्य अनन्तात्तद्धितोत्त्पत्तेः निर्विघ्नत्वात् एकार्थीभावे अवयवेन समुदायेन एकार्थीभावस्याद्भावस्याभ्युपगमात्। अत एव “अनुपसर्जनात्” (४-१-१४) इति सूत्रप्रयोजनावसरे इदं तर्हि प्रयोजनं[२९७] प्रधानेन तदन्तविधिर्यथा स्यात् । कुम्भकारीनगरकारी इतरथा हि प्रत्ययग्रहणकङीवुत्पत्तिः[२९८] स्यात्। **कृद्ग्रहण**परिभाषाया तु नात्र प्रवर्तते। अपि तु कृद्ग्रहणात् ङ्यन्ते न समासः। अपि न **“गतिकारकोपपदानमिति”** (परि-७६) परिभाषाया द्विगुत्पत्तौ[२९९] कोः दोषः। कौम्भकारे यो न सिध्यत्यवयवस्य वृद्धिस्वरौ स्यातामित्युक्तमनुपसर्जे इति सूत्रभाष्ययोः। पृथगेकार्थीभावस्य वृत्तिनिमित्तत्वे तु एतद्भाष्यासङ्गतिः[३००] स्पष्टैव। अत

---

[296] समवेत G1, G2 : निरुपित F1 :

[297] प्रयोजनं F1 : प्रयोजन G1 : प्रयेजन G2

[298] प्रत्ययग्रहणपरिभाषायाकङीवुत्पत्तिः F1, G2 : प्रत्ययग्रहकाराङीवुत्पत्तिस्यात् G1

[299] द्विगुत्पत्तौ G2 : घगुत्पत्तौ F1, G1

[300] एतद्भाष्यासङ्गतिः F1 : एतत् ***सङ्गतिः G1, G2

एव पञ्च  गावो धनं यस्येति [३०१] त्रिपदबहुव्रीहौ [३०२] समुदायैकार्थीभावसत्त्वात् द्वयोरपि तत्सद्भावमात्रेणा उत्तरपदे परतो द्वयोर्द्विगुणसंज्ञा तद्धितार्थेत्यनेन सिद्ध्यति इति स्पष्टमन्यत्र। स्यादेतत् समुदायैकार्थीभावमादाय द्विगुसञ्ज्ञोत्तरं टचि अर्थवत्सूत्रेण प्रत्यान्तत्वात्प्रातिपदिकत्वाप्राप्तावपि तद्धितान्तत्वात्समासत्वाच्च। प्रातिपदिकापत्तौ टाबापत्तिः। न च कृत्तद्धितसूत्रेऽप्यर्थवत्पदानुवृत्तेः। अर्थवत्समासस्य अर्थवत्तद्धितान्तस्य प्रातिपादिकसंज्ञाविधानात्र दोषः। तत्राप्युक्तरीत्या अर्थवत्वस्य सत्त्वादिति चेदत्र शेखरकृतः। एतत्संज्ञाफलिभूत विभक्तीतरसमभिव्याहारानपेक्षया लोके अर्थविषयकबोध-जनकत्वरूपं पारिभाषिकमर्थवत्त्वं द्वयोः सूत्रयोर्गृह्यते इति शेखरकृतः[३०३]। तेषामयमाशयः "तद्धितार्थोत्तरपदसमाहारे च" (२-१-५०) इति सूत्रस्थ भाष्यादिप्रामाण्येन समुदायैकार्थी-भावस्य एकस्यैव स्वीकारेण तेनैवावयवानां तत्पुरुषादिसंज्ञोपकारेण पृथगेकार्थीभावा-कल्पनात्। "पञ्चगवधन" इत्यादौ पञ्चगवेत्यस्यार्थबोधने विभक्तीतरधनशब्दापेक्षणेन [३०४] न प्रातिपदिकत्वमतो न टाप्  न चैवं टजपि न स्यात्, तत्र प्रातिपादिकाधिकारादिति वाच्यम्। स्वमते समासान्तविधौ प्रातिपदिकाधिकाराभावस्य शेखरे एवोक्तत्वात् । ननु उक्तरीत्या पारिभाषिकार्थवत्वस्य[३०५] प्रातिपदिकसंज्ञाविधौ आश्रयणे अनुपसर्जनाधिकाराभावे द्वितीयतदन्तविधेरभावेन प्रत्ययग्रहणपरिभाषायाः कुम्भकारेत्यादौ कारशब्दादवयवात्

---

[301] यस्येति G2 : यस्येति F1 , G1

[302] त्रिपदबहुव्रीहौ F1 , G1 : त्रिपदबुव्रीहौ G2

[303] इति शेखरकृतः G1(e) : F1 , G2 (o)

[304] विभक्तीतरधनशब्दापेक्षणेन F1 : विभक्तीतरधनशब्दापेक्षणे नन G1 , G2

[305] पारिभाषिकार्थवत्वस्य F1, G2 : पारिभाषिकार्थवस्य G1

ङीबापत्तिप्रतिपादन परोक्तभाष्यविरोधः। कारेत्यस्यार्थबोधने विभक्तीतरकुम्भसमभि-व्याहारापेक्षणेन निरूक्तार्थवत्वाभावेन तदन्तत्वप्रयुक्तप्रातिपदिकत्वाप्राप्या ङीपः अप्राप्तिरिति चेन्नैवम्। कुम्भकार इत्यादौ कुम्भकारयोः समासप्रयुक्तैकार्थीभावेन एकः अपरः करोति प्रकृतिप्रत्यययोः कृदन्तत्वप्रयुक्तैकार्थीभावः। तत्र समासार्थप्रयुक्तैकार्थो-भावमादाय कारेत्यस्यार्थबोधने कुम्भादिपदसमभिव्याहारापेक्षत्वेऽपि यः कृदन्तत्वप्रयुक्त एकार्थीभावः तमामादाय कारेत्यस्यार्थबोधने विभक्तीतरकुम्भादिपदसमभिव्याहारानपेक्षणात्। ननु विभक्तीतर समभिव्याहारानपेक्षत्वं विभक्तीतरप्रयोगानधीतत्वेन तद्विनाभूतत्वम्। तथा च "तत्रोपपदम् सप्तमीस्थम्" (३-१-९२) इति सूत्रे तत्र ग्रहणात् प्रत्ययविधेरुप-पदसन्नियोगशिष्टत्वात्[३०६] कारेत्यस्य विभक्तीतरकुम्भादिपदप्रयोगाधीनत्वेनैव प्रयुज्यमानत्वात् पारिभाषिकार्थवत्वाप्रसङ्ग इति चेत्सत्यम्। उक्तरीत्या समभिव्यहाररूपस्योपपदप्रयोगस्य समासयोर्नैयत्येपि कृदेकार्थीभावप्रयुक्तातिरिक्तशक्तिमतः कारेत्यस्य तद्विनाप्यर्थबोधक-त्त्वानपायात्। अत एव उप समीपे उच्चारितं पदम् उपपदम् । सामीप्यञ्च सप्तम्यन्तपद-घटितसूत्रविधेय[३०७] प्रत्ययप्रकृत्यर्थे अन्वयित्वमात्रमित्युक्तं[३०८] शेखरे। न चैवमपि लोके अर्थबोधजनकत्वाभाव एवेति वाच्यम्। समासस्य नित्यत्वेन लोके पृथक्संयोगाभावेऽपि अबोधकत्वस्य निर्विघ्नत्वात्। कथमन्यथा मूलकेनोपदंशं कारको व्रजतीत्यादौ उपदंशं कारक इत्यादेस्समासाभावे अर्थवत्वोपपत्तिः। ण्मुलन्तादेरर्थबोधने उपपदापेक्षणादत एव गतिकारकोपदानामित्यत्र उपपदग्रहणं तद्भाष्यादिकञ्च संगच्छते। अत एव[३०९] च इहापि

---

306 प्रत्ययविधेरुपपदसन्नियोगशिष्टत्वात् F1, G2 : प्रत्ययविधेरुपपसन्नियोगशिष्टत्वात् G1

307 विधेय F1 : विधये G1, G2

308 अन्वयित्वमात्रमित्युक्तम् F1 , G2 : अन्वयत्वमात्रमित्युक्तम् G1

309 एव F1 , G2 : एवा G1

तर्हि "साङ्कूटिनं", "व्यावकोशीद्वे" अत्र प्रातिपादिकसंज्ञे अवयवस्यापि समुदायस्यापि तत्रावयवस्य या प्रातिपदिकसंज्ञा तदाश्रया तदवयवादिति प्रसज्येत तत्र को दोषः। कुंभकारेति यो न सिध्यति, अवयवस्य वृद्धिस्वरौ स्याताम् इति "अनुपसर्जनात्[310]" (४-१-१४) इति सुत्रभाष्यसमानाकारं "पुंयोगादाख्यायाम्" (४-१-४८) इति सूत्रभाष्य संगच्छते। न चैवमपि प्रादीनां द्योतकानामितरधात्वादिसापेक्षतयैव बोधकानां प्रातिपदिकत्वानापत्तिरिति वाच्यम्। "कृत्तद्धितसमासाश्च" (१-२-४६) इति सूत्रे अनुक्तसमुच्चयार्थकचकारादेव अधिपरीतज्ञापकाद्वा तत्सिद्धेः। एतेन "एधाञ्चक्रे" इत्यादा-वमन्तस्य निरुक्तार्थवत्त्वाभावात्प्रातिपदिकत्वानापत्तिरिति शंकापि निरस्ता[311]। अन्ये तु विभक्तीतरस्य उपपदातिरिक्तस्यैव[312] विवक्षणान्न कुत्रापि दोष इति वदन्ति। केचित्तु कुम्भकर्मोत्पत्त्यनुकूलक्रियाश्रयत्वे विवक्षिते सामान्योत्पत्त्यनुकूलक्रियाश्रयत्वविवक्षाया अयनपायेनावयवात्[313] कारशब्दादन्यौकार्थीभावेऽपि प्रधानावयवार्थेनापि तस्य दुर्वारत्वात् इत्येकार्थीभावादिनि आहुः। गुरवस्तु अनुपसर्जनाधिकारेण तदन्तग्रहणे ज्ञापितेऽपि कारशब्दस्य व्यपदेशिवद्भावेन अण्णन्तत्वात्ततोऽपि कदाचित् ङीपि कुंभकारे यो दुर्वारः। किञ्च समुदायात् ङीप्यपि स्त्री प्रत्यये तदादि नियमाभावेन केवलादविकारिशब्दात्कदाचित् ढक् सदुर्वार इति प्रकारद्वयेन तदधिकारः। एतस्माज्ज्ञापकादसहाये व्यपदेशिवद्भावप्रवृत्तिः। एव व्यपदेशिवद्भावप्रवृत्तेः। अर्थवत्सूत्रोक्तार्थवत्वाभावेन ङ्यन्तस्याप्रातिपदिकत्वाच्च। तदादिनियमाभावेन अधिकस्य कार्यं बोध्यते। नन्यूनस्येत्यदोषाच्चा। अन्यथा तदन्तग्रहणे

---

[310] अनुपसर्जनात् F1 , G2 : अनुपसर्जनादि G1

[311] निरस्ता G1, G2 : समाहिता F1

[312] उपपदातिरिक्तस्यैव F1 , G2 : उपपादितााति क्तिस्यैव G1

[313] अयनपायेनावयवात् F1, G2 : अप्यनाथायेन G1

फलाभावेन तद्वैय्यर्थ्यं स्पष्टमेवेत्यनुपसर्जनादिति सूत्रस्थशेखरस्थमन्यथेति प्रतीकमादाय एतदधिकारादेव इत्येवकारघटितशेखरग्रन्थात् सर्वान्ते अन्यथेत्याद्युक्तेश्च। उक्तार्थकैतदधिकारात् प्राग्यथाश्रुतार्थवत्त्वेन उक्तरीत्या अण्णन्तात्वात् प्रत्ययस्यावयवादुत्पत्तिः प्राप्नोतीति भाष्यमपि यथोक्तपूर्वपक्षाभिप्रायेणैव अधिकारसामर्थ्येन पुनः पारिभाषिकार्थवत्वस्यापि बोधनान्नावयवात्प्राप्तिः। अत एव अवयवादुपत्तिः प्राप्नोतीति भाष्यकारप्रतीकमुपादाय कृत्तद्धितेति [३१४] कृद्ग्रहणेति गतिकारकेति वारकपरिभाषासंचारणे समुदायस्यापि प्रातिपदिकत्वेन तत एव ङीप्स्यादिति कैयटोक्तशंका वस्तुतस्तु अवयवस्याप्रातिपदिकत्वात् समुदायस्याणन्तत्वात् ङीपोऽप्राप्तिरेवे शंकितुमुचितेत्युद्योतकृदुक्तिः संगच्छते इत्याहुः। वस्तुतस्तु मदुक्तरीत्या भाष्यस्योपपत्तेः पूर्वपक्षाभिप्रायकत्ववर्णनं नोचितम्। अत एव उद्द्योते शंकितुमुचितमित्युक्तम्। शेखरे तु अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनाणान्तस्याप्रातिपादिकत्वाच्चैत्यपपाठ एव, जीर्णपुस्तकेष्वनुपलंभात्। यत्प्रकारद्वय प्रकारेण [३१५] शंकावारणं[३१६] तत्प्रकारनिराकरण क्रमौचित्येन सतोऽपि मध्ये पाठस्य प्रक्षिप्तत्वादनुमानाच्च। अव्यवहित तदग्रिमैस्तदेवाभिप्रेत्य इत्यादिना उपष्टंभकस्य भाष्याभिधानस्यासंगतिप्रसङ्गाच्चेति प्रकृतां प्रतीमः। अथैवं[३१७] देवदत्तगार्ग्येति समुदायस्य वक्ष्यमाणप्रकारेण निरुक्तपारिभाषिकार्थवत्त्वात्तद्धितान्तत्वाच्च "कृत्तद्धितसमासाश्च" (१-२-४६) इति सूत्रेण प्रातिपदिकासंज्ञा स्यात्। अथ संघाते पूर्वभागः पदं, तत्र चेतर्हि समासस्यैवेतिदीक्षितोक्तनियमेनवारण सम्भवेऽपि यस्य समासस्य पूर्वभागौ स्वातन्त्र्येण प्रयोगार्हार्थवन्तौ तस्यचेत्समुदायस्य

---

[314] कृत्तद्धितेति F1 , G2 : कृत्तद्धितेति सूत्रे G1

[315] प्रकारेण G1 : क्रमेण F1, G2

[316] शंकावारणम् F1, G2 : शंकवतारण G1

[317] अथैवम् G1 : तथैवम् F1 , G2

तर्हि समासस्यैवेति शेखरोक्तिनियमे देवदत्तोगार्ग्यीति यञन्तसमुदायघटक पूर्वभागयोः अर्थवत्वेऽपि परभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावादुद्देश्यतावच्छेदकानाक्रान्तत्वान्नियमस्याप्राप्तेः। न च स्वातन्त्र्येण प्रयुज्यमानत्वं विहाय तादृशार्थवत्त्वस्य निवेशेन तस्य च गार्ग्येऽक्षतत्वेन एतन्नियमेनापि वारणसंभव इति वाच्यम्। वृत्त्याश्रय राजन् ङस् पुरुष सु इति अलौकिकवाक्यस्य पूर्वभागसंग्रहार्थमेव अर्हपदोपादानात् अत्र नात्र सुपः प्रागभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावात्। न च सुबतिरिक्तशास्त्रीये कार्यरहितस्य राजन् ङस् पुरुष सु इत्यस्यैव सुब्रहितस्य गार्ग्येत्यादेरपि प्रयोगार्हत्वमक्षतमेवेति वाच्यम्। पदस्यार्थबोधनार्थं प्रसक्तस्य स्वार्थे परिपूर्णस्यापदमिति निषेधाविषयस्यापरिनिष्ठितमिति निषेधमात्रविषयस्य तु अलौकिकवाक्यस्थस्य सुबन्तस्येव प्रयोगार्हत्वेन सुब्रहितस्योक्तविशेषणवैपरीत्येन तदभावात् न च बहुपटवः पुत्रकाम्येत्यादौ बहुच्काम्यजादेरिवघटकतया गार्ग्यस्य प्रयोगार्हत्वमस्त्येवेति वाच्यम्। यस्य समुदायस्य प्रातिपदिकसंज्ञाचिकीर्षिता प्रयुज्यमानतत्समुदायघटकस्यैव [318] घटकतया [319] प्रयोगार्हत्वं स्वीकारेण गार्ग्यांशे [320] विभक्तिरहितस्य देवदत्तोगार्ग्यीति समुदायस्य प्रयुज्यमानत्वाभावेन तद्घटकस्य गार्ग्ये तस्य घटकतयाऽपि प्रयोगार्हत्वाभावात् । प्रयुज्यमानत्वञ्च लौकिकालौकिकसाधारणं देवदत्तोगार्ग्यीति च न लौकिकं, नाप्यलौकिकम्। न च कुम्भकार इत्यादौ कार इत्यादेरसुबन्तत्वाभावेन प्रयोगार्हत्वाभावान्नियमस्य सजातीयत्वभङ्ग इति वाच्यम्। अतिङ्ग्रहणेन ज्ञापकेन गतिवचनेन वा सुबुत्पत्तेः प्रागपि प्रयोगार्हत्वस्वीकारात् । तस्मात् गार्ग्येत्यस्य

---

[318] प्रयुज्यमानतत्समुदायघटकस्यैव F1 , G1 : प्रातिपदिकसंज्ञाचिकीर्षिताप्रयुमानघटकस्येव G2

[319] घटकतया F1 , G1 : घटकितया G2

[320] गार्ग्यांशे F1 , G2 : गार्ग्यः शेष G1

प्रयोगार्हत्वाभावादेव नियमोद्देश्यत्वं, न युक्तश्चैतत्। अन्यथा अर्थवत्वस्यैव[३२१] प्रयोगार्हत्व-स्वीकारात् देवदत्तोगार्ग्येक[३२२] समुदायघटकपूर्वपरभागयोः[३२३] परस्पराधीनत्वरूप-स्वातन्त्र्यस्यापि सत्त्वेन नियमोद्देश्यत्वप्रसङ्गः। न च प्रत्यासक्तिमनापेक्षय व्याप्तिन्यायेन इतरसामान्याधीनत्वविवक्षायां गार्ग्येत्यस्य स्वप्रकृतिकविभवत्यनधीनत्वेन न नियमोद्दश्यत्वमिति वाच्यम्। तथासति बहुपटव इत्यादेस्समुदायघटकप्रकृत्यधनित्वेन इतरसामान्यान्तर्गतविभक्तत्यनपेक्षत्वेन नियमोद्देश्यत्व प्रसङ्गात् तस्मात् देवदत्तोगार्ग्येति समुदायस्यनियमोद्देश्यत्ववारणयोक्तरीतिरेव शरणमिति दिक्। न चैवं प्रयोगार्हत्वर्थवत इत्येवोच्यताम कृतं स्वातन्त्र्येणेति विशेषणे नेति। वाच्यम्। "बहुपटवः" पुत्रकाम्येत्यादौ प्रयुज्यमानसमुदायघटकतया प्रयोगार्हत्वात्। न च तत्वेऽपि बहुजादेः प्रत्ययस्य निरुक्तार्थत्वाभावात् स्वातन्त्र्येणेति व्यर्थमेवेति वाच्यम्। अर्थवत्सूत्रे भाष्यानुक्ता दीक्षितोक्तप्रत्ययपर्युदासनिराकरणायपारिभाषिकार्थवत्वाश्रयणेऽपि नियमकुक्षिप्रविष्टार्थवत्व स्यकल्पितान्वयव्यतिरेकल्पितस्य शास्त्रीयस्यापि ग्रहणात्। ततश्च घटकतया प्रयोगार्हत्वशास्त्रीयार्थवत्वयोः बहुजादौ सत्त्वेन नियमोद्देश्यतावच्छेदकाक्रान्ततया समासा-भावेन[३२४] समुदायस्य प्रातिपादिकत्वानापत्तिः। अतः स्वातन्त्र्येणति प्रयोगर्हविशेषणम्। न चैवमपि पूर्वपरभागयोः अर्थवत्त्वस्यैव स्वातन्त्र्येति प्रयोगार्हत्वस्य लाभः। समासग्रहणकृत नियमस्य सजातियापेक्षात्वाद्वाच्यः। स च न संभवति स्तम्बेरम इत्याद्युपपदसमासे रमेत्यादेः स्तम्बाद्युपपदसापेक्षतयैव प्रयोगार्हत्वेन व्यभिचारादिति चेदत्राहुः। स्वातन्त्र्यं

---

[321] अर्थवत्वस्यैव F1, G2 : अर्थवत्वस्येव G1

[322] देवदत्तोगार्ग्येक F1, G2 : देवदत्तोगार्ग्येकसमुदाय G1

[323] पूर्वपरभागयोः F1, G1 : पूर्वकपरभागयोः G2

[324] समासाभावेन G1, G2 : सम्प्रसाभावेन F1

प्रधानभूतेतरानधीनत्वम्[३२५] , न त्वितराधीनत्वमात्रं समासाधीनेऽपि राज्ञि स्वतन्त्र इति व्यवहारात्। अधीनत्वं ञ्चात्राविनाभूतत्वम्। तदभावोविनाभूतत्वमनधीनमध्य-वृत्तिनोऽपि नञः घटानधिकारणमित्यादाविव समुदायान्वयित्वात् प्रधानभूतेतराधीनत्वा-भावः स्वातन्त्र्यं पर्यवसितत्वम्। तथा च राजन् ङस् पुरुषसु इति समुदायघटक-पूर्वभागस्य प्रधानभूतेतराधीनत्व परभागधीनत्वाभावेन प्रयोगार्हत्वं स्पष्टमेव। पुरुष सु इति परभागोऽपि पूर्वभागेतरस्य प्रधानीभूतत्वाभावेनं प्रधानीभूतेतरघटपटादि तदधीनत्वा-भावः। विशेषणाभावप्रयुक्तविशिष्टाभावस्सुलभ एव। राज्ञः पुरुष इत्यादौपूर्वपरभागयोः योः स्वतन्त्रप्रयोगार्हत्वमूहनीयम्। परन्तुसमासाभावान्नप्रतिपादिकत्वं स्तम्बेरम इत्यप्युपपदे प्रधानभूतेतरभागाधीनत्वाभावः विशेष्याभावप्रयुक्तविशिष्टाभावः। रमेत्युतरभागेऽपि पूर्वभाग-स्येतरस्य प्रधानभूतत्वाभावेन विशेषणाभावप्रयुक्तः विशिष्टाभावः सुलभः । बहुपटव इत्यादौ तु परभागे पूर्वभागस्य प्रधानभूतत्वाभावेनोक्तरीत्या विशिष्टाभावरूप स्वातन्त्र्येण प्रयोगार्हत्वसत्त्वेपि[३२६] पूर्वभागस्य प्रधानभूतेतरपरभागाधीनत्वभावेन दोषः। न च बहुपटव इत्यादौ प्रधानीभूतेतराधीनतया प्रयोगार्हत्वस्य पूर्वभागस्य सत्वमिव पुत्रकाम्यादावुतरभागेऽपि प्रत्यरोच्छया प्राधान्यात् पूर्वभागस्य प्रधानभूतत्वाभावेन विशेषणाभावप्रयुक्तः। प्रधानभूतेतराधीनत्वाभावोप्रतिहत एवेति वाच्यम्। इच्छाविषयस्य पुत्रास्योद्देश्यत्वलक्षणार्थप्राधान्यसत्त्वेऽपि प्रधानभूतेतरपूर्वभागाधीनत्वमेवेति न नियमोद्देश्यतावच्छेदकाक्रन्तत्वमिति[३२७] न कोऽपि दोषः। घटानधिकरणमित्यादेः प्रयोगस्य

---

[325] प्रधानभूतेतरानधीनत्वम् F1 : प्रधानभूतेतरानधीनत्वाभावः G1, G2

[326] प्रयोगार्हत्वसत्त्वेपि F1 : प्रयोगार्हसत्त्वेऽपि G1 , G2

[327] F1 (o) : प्रधानसत्त्वेऽपि..........इत्यारभ्य " आक्रान्तत्वम् इत्यन्तं नास्ति G1 , G2(e)

व्याकरणविरुद्धत्वोक्तदृष्टान्तेन नैव निर्वक्तुं शक्यं वैयाकरणैरिति तु न मन्तव्यम्[328]। प्रकृते स्वातन्त्र्यपदनिर्वचनेन तथा प्रयोगाभावात्। घटानधिकारणामित्यादि प्रयोगस्यान्यत्र व्याकरणाविरोधनोपपादितत्वाच्चेति संक्षेपः। एतेन "स्तम्बेरम" इत्यत्र उपपदसमासविधानेन तस्य च विसब्र स्मेति कृदन्तस्य स्वातन्त्र्येण कृदन्तस्य[329] स्वतन्त्र प्रयोगार्हत्वाभावा-न्नियमस्य सजातीयत्वभङ्गेति दुर्वलोक्तमपास्तम्। यदपि संघात इत्यादि दीक्षितोक्तनियमे शेखरशब्दरत्नोक्तदूषणस्य वृषण्वसुरित्यादौ व्यभिचारान्नियमस्य सजातीयत्वभङ्गरूपस्योद्धरणं तेनैवोक्तम्। "वृषणश्व" इत्यादौ "वृषण् स्" "अश्व स्" इत्यवस्थायामेव समासप्रयुक्तप्रातिपादिकसंज्ञा प्रवर्तते। न च तदानीं भ संज्ञा प्रवृत्तिरस्ति। वृषणीत्यस्यास्वशब्दपरत्वाभावादिति तदपि न। समासर्थलौकिकविग्रहवाक्ये सामर्थ्यारोपेण समाससंज्ञा काले प्रातिपदिकसंज्ञा प्रवृत्तावपि "राजपुरुष" इत्यत्रेव "वृषणश्व" इत्यादौ समासत्व व्याघातात् मासत्वावच्छेदेन तत्पूर्वभागस्य पदत्वासंभवात्। वस्तुतः[330] "वृषण्" शब्दस्य समासं विना अनन्तराश्वपरत्वासंभवात् समास इत्यर्थे लाभेन तेन च पूर्वोतरपदयोराक्षेपे सुबन्ते पदसंज्ञा बाधिका भ संज्ञा प्रवर्तत इति पूर्वभागस्य भत्वात्साजात्यभङ्गो निवार्य एव। ततः प्रातिपदिकसंज्ञायां विभक्ति लुकि एकदेश-विकृतन्यायेन नान्ते भत्वात् "पदान्तस्य" (८-४-३६) इति णत्वं[331] निषेधो न। न च प्रातिपदिकसंज्ञासमकालः[332] नान्ते भत्वाभावाण्णत्वनिषेधापत्तिः। पदान्तत्वस्याप्यभावात्।

---

328 मन्तव्यम् G1 : वाच्यम् F1, G2 :

329 कृदन्तस्य F1, G2 : अदन्तस्य G1

330 वस्तुतः F1, G1 : वस्तुतो G2

331 णत्वम् F1 : एत्व G1, G2

332 प्रातिपदिकसंज्ञासमकालः F1 , G2 : प्रातिपदिकसंज्ञासमकालम् G1

सावपिपदत्वमाश्रित्यादान्तत्वमिति चेत् **“अकृतव्यूहा**परिभाषाया (परि-५६) विनाशोन्मुख-सुनिमित्तकपदस्याप्रवृत्तेः । अत एव नलोपोऽपि नेति बोध्यः। यदपि तेनैवोक्तम् - “वस्तुतस्तु प्रकृतिप्रत्ययाभावना संघातविषयकनियमाश्रयणात् न कोऽपि दोष इति” तदपि चिन्त्यम्। “ङित्थः” इत्यादौ प्रातिपदिकनाापत्तेः। अर्थवत्सूत्रञ्च “बहुपटव” इत्याद्यर्थं स्यात्। बहुच्पूर्वं प्रातिपदिकमिति तु सूत्रयितुं न युक्तम्। तथा सति समासग्रहणस्य नियामकत्वानापत्त्या मूलकेनोपपदंशमित्यादौ कृदन्तत्वे अतिप्रसङ्गादित्यवोचम्। अर्थवत्पदसंघातविषयकत्वमपि[३३३] नियमस्य नाश्रयितुं शक्यम्। ‘गो’ इत्यादेर्नियमोद्देश्यत्वा भावेन प्रातिपदिकत्वापत्तेः। वृषण्व सुरित्यादौ नियमस्य सजात्यभङ्गश्चेति भावप्रकाशि (कायां) विस्तरः। तस्माद्देवदत्तो गार्ग्य इति समुदायस्य समासकृतनियमेन वारणाद्वक्ष्य-माणरीत्या पारिभाषिकार्थवत्वात्तद्धितान्तत्वनिमित्तकप्रातिपदिकत्वापत्तिरिति चेन्मैवम्। प्रत्ययग्रहणपरिभाषाया[३३४] तादृशसमुदायस्य तद्धितान्तत्वाभावेन न प्रातिपदिकत्वमिति अङ्गसंज्ञासूत्रे प्रत्ययग्रहणपरिभाषाप्रयोजनकथनप्रस्तावे भाष्यकृतैव समाधानात्। नचैवमपि देवदत्तोगार्ग्यैति[३३५] समुदायस्य प्रत्ययग्रहणपरिभाषया प्रत्ययान्तभिन्नत्वातदर्थवत्सूत्रेण[३३६] प्रातिपदिकसंज्ञा दुर्निवारा। समासकृतनियमेनोक्तरीत्या निवारणासम्भवादिति चेत्सत्यम्। यस्य यद्धर्मनिमितिका प्रातिपदिकसंज्ञा चिकीर्षिता। तस्य तद्धर्मनिमित्तकप्रातिपदिकसंज्ञा-फलकभूतविभक्तीतरसमभिव्याहारानपेक्षया लोके अर्थविषयक[३३७] बोधजनकत्वं विवक्षितम्।

---

[333] अर्थवत्पदसंघातविषयकत्वमपि F1 : अर्थवत्पदसंघातविषयकमपि G1, G2

[334] प्रत्ययग्रहणपरिभाषाया F1, G1 : प्रत्यग्रहणपरिभाषाया G2

[335] देवदत्तोगार्ग्यैति F1 , G1 : देवदत्तेगार्ग्यैति G2

[336] अर्थवत्सूत्रेण F1 , G2 : अर्थवत्सूत्रे G1

[337] विषयक G1, G2 (e) : F1 (o)

अस्ति चेदं [338] घटपटेत्यादौ प्रकृते च देवदत्तोगार्ग्यौंति [339] समुदायस्यार्थवत्वनिमित्तक-प्रातिपदिकसंज्ञा चिकीर्षिता। अन्यतद्धर्मनिमित्तकप्रातिपादिकसंज्ञाफलभूतविभक्तीतरा या तद्धितान्तत्वनिमित्तकप्रातिपादकसंज्ञानिमित्तकविभक्त्यपेक्षऽपि [340] गार्ग्य शब्दस्य प्रत्ययान्नत्वेन अप्रत्यय इति निषेधादर्थवत्वनिमित्तक प्रातिपदिकत्वस्य अर्थवत्सूत्रेण विहितस्याप्राप्तेः। अप्रत्यय इति निषेधादर्थवत्त्वनिमित्तकप्रातिपदिकत्वस्य अर्थवत्सूत्रेण विहितस्याप्राप्तेः। ननु तद्युक्तरीत्या पारिभाषिकार्थवत्त्वाभावेनैव प्रत्ययग्रहणपरिभाषा-भावेऽपि तद्धितान्तत्वनिमित्तकप्रातिपदिकत्वाप्राप्त्या देवदत्तोगार्ग्यौंति समुदायस्य “प्रत्ययग्रहण....” (परि-२३) परिभाषाप्रयोजनत्वोक्तिः भाष्यकृतामनुपपन्ना स्यात्। “सुँप्तिङन्तं पदम्” (१-४-१४) इति सूत्रभाष्यकैयटप्रामाण्येन “कृत्तद्धितसमासाश्च'' (१-२-४६) इति सूत्रे निरुक्तार्थवत्पदानुवृत्तिरिति चेन्न। गार्ग्यशब्दप्रकृतिकविभक्तेः तद्धितान्तत्व-निमित्तकत्वेन तस्यास्तद्धितान्तत्वनिमित्तकदेवदत्तोगार्ग्यौंति समुदायप्रकृतिकविभक्तीतरत्वा-भावात्। यद्यपि प्रकृत्योस्तयोर्भेदेन तत्प्रकृतिकविभक्त्योर्भेद एव । तथापि विभक्त्य प्रयोजकप्रातिपदिकसंज्ञासंज्ञितावच्छेदकतद्धितान्तस्यैकत्वे तयोरैक्यमिति तात्पर्यम्। तथा च तदितरघटादिसमभिव्याहारानपेक्षयालौकिकार्थबोधजनकत्वरूप [341] पारिभाषिकार्थवत्व-सत्त्वेन तद्धितान्तत्वेन च प्राप्तस्य प्रातिपदिकसंज्ञाऽतिप्रसङ्गस्य वारणाय तादृशसमुदाये प्रत्ययग्रहणपरिभाषाप्रयोजनकत्वेक्तेरुपपत्तिः [342] सर्वोऽप्ययमर्थ एवतत्पदघटितैनैतत्संज्ञा-

---

[338] अस्ति चेदम् F1 , G2 : अस्ति चेत् G1

[339] देवदत्तोगार्ग्यौंति F1 , G2 : देवदत्तेगार्ग्यौंति G1

[340] विभक्त्यपेक्षऽपि F1 (e) : G1, G2 (o)

[341] रूप F1, G2 : रूप G1

[342] प्रयोजनकत्वेक्तेरुपपत्तिः F1, G1 : प्रयोजनकत्वोक्तेरुपपत्तिः G2

फलीभूतेति विभक्तिविशेषणेन शेखरकृत ध्वनितः[३४३] इति निपुणतरमालोचनीयम्। नन्वेवमपि प्रत्ययग्रहणपरिभाषाया अभावेन राजन् ङस् पुरुष[३४४] सु इत्यस्य प्रत्ययान्तात्वादर्थवत्सूत्रेण संज्ञाया अप्राप्त्या समासग्रहणस्य विध्यर्थत्वापत्त्या नियमस्यैवाभावेन देवदत्तोगार्ग्येत्यादि ग्रन्थोत्तरं यथाश्रुतमूलोक्ते नियमे तु नियमेनैव तत्र तदप्राप्त्या भाष्यासङ्गतिः स्पष्टैवेति शेखरोक्तिरसंगतिरिति चेन्मैवम्। कृत्तद्धितग्रहणस्य नियमकत्वं स्वीकृत्य प्रत्ययान्तपर्युदासं भाष्यकृता प्रत्याख्यातमभ्युपगम्य अर्थवत्सूत्रेण समासेऽपि प्रातिपदिकसंज्ञासिद्धेः। समासग्रहणस्य नियामकत्वाक्षत्या तदुक्तेः। एतेन प्रत्ययग्रहणपरिभाषाभावे प्रत्ययान्तत्वेनाप्राप्तौ समासग्रहणं विध्यर्थमेव स्यात् इति देवदत्तोगार्ग्येत्यस्य प्रातिपदिकत्वं स्यादिति भाष्यस्याशय इति दुर्बलोकमपास्तम्। गुरवस्तु प्रत्ययग्रहणपरिभाषायाः [३४५] सर्वथाभावस्तु न वक्तुं शक्यः। देवदत्तश्चिकीषीतीत्यादौ चिकीर्षेत्यन्तसमुदायस्य सन्नन्तत्वेन धातुत्वाद्यापत्तेः। एतत्प्रयोजनान्तरसिध्यर्थमावश्यक्या परिभाषया[३४६]इदमुदाहरणप्यनन्यथासिद्धिमिष्यते। तच्च मनोरमोक्तनियमादेः प्रत्ययग्रहणपरिभाषाया समासप्रत्ययाभिन्नत्वात् प्रातिपदिकसंज्ञसिद्धौ तद्ग्रहणवैयर्थ्येन नियामकतया तेनैव तत्समुदायस्य वारणं सिद्धावतत्प्रयोजनस्यान्यथासिद्धिप्रसङ्गः। शेखरोक्तनियमे तु उक्तरीत्या उद्देश्यतावच्छेदकानाक्रान्तत्वान्नियमेन [३४७] वारणात्। अन्यथा असिद्धपरिभाषोदाहरणत्वसिद्धिरिति

---

[343] ध्वनितः G1 : ध्वनित F1 : ध्वनिः G2

[344] पुरुष F1, G1 : पुरुषा G2

[345] परिभाषायाः F1, G2 : परिभाषा G1

[346] परिभाषाया F1 : परिभाषायाः G1 : परिभाषा G2

[347] उद्देश्यतावच्छेदकानाक्रान्तत्वान्नियमेन F1 , G2 : उद्देश्यतावच्छेदकानाक्रात्वाभियमेन G1

शेखरोक्तेराशयं वर्णयन्तीत्यलम्। प्रकृतमनुसरामः ननु समुदायेन एकार्थीभावसत्त्वे अवयवैकार्थीभावस्य पार्थक्येन वृत्तिनिमित्तत्वेऽपि "परमगार्ग्यायण" इत्यादौ षष्ठ्याः परमगार्ग्यशब्दा- द्विधानात्[348] प्रत्ययग्रहणपरिभाषाया यञन्तस्य गार्ग्यशब्दस्य षष्ठ्यन्तत्वाभावात्तद्धितत्त्वा- प्रसङ्ग[349] एवेति चेन्न। तत्सम्बन्ध्यपत्यमित्यर्थे प्रातिपदिकात्प्रत्ययविधानेन षष्ठ्यन्तत्वस्य निमित्तत्वाभावात् घकालतनेष्विति ज्ञापकात्स्वार्थे परिपूर्णमिति "कुत्सिते" (५-३-७४) इति सूत्रेभाष्याच्च। ततः परत्वं सुपा व्यवहितमपि गृह्यते। सुप् च तस्येत्युपस्थित षष्ठ्यावेत्यन्यादिति शेखरे एव स्पष्टम्। एतेन समुदायोत्तरषष्ठ्यास्समुदायाद्विधानात् गार्ग्यादौ विहितत्वात् प्रकृतपरिभाषाया[350] तस्य तदन्तत्वाभावात् षष्ठ्यन्ताद्विधीयमानस्य तद्धितस्याप्रसङ्ग इत्यपास्तम्[351]। केचित्तु प्रत्ययग्रहणपरिभाषयाऽधिकस्यैव पर्युदासः न तु न्यूनस्य। अत एवास्य युवापत्यमित्यर्थे[352] यञि यस्येति लोपे "यञिञोश्च" (४-१-१०१) इति "फक" सिद्धिरित्याकरोक्तरीत्या गार्ग्यशब्दस्य षष्ठ्यन्तत्वमस्त्स्येवेत्याहुः।

**प्रत्ययग्रहणे चापञ्चम्याः॥ २४॥**

---

[348] परमगार्ग्यशब्दाद्विधानात्  F1 , G2 : परमगर्ग्य.... G1

[349] षष्ठ्यन्तत्वाभावात्तद्धित्त्वाप्रसङ्गः F1 , G1 : षष्ठ्यान्तत्वाभावात्तद्धितप्रसङ्गः G2

[350] प्रकृतपरिभाषाया F1 , G1 : प्रकृतपरिभाषा G2

[351] इत्यपास्तम् F1 , G1 : इत्यपस्तम् G2

[352] युवापत्यमित्यर्थे F1 , G1 : युवापत्यमित्यर्थे G2

**उभयोरेकविषयत्वमिति।** तथा च सति रदाभ्यां परो यः तदादिनिष्ठान्तः तदीय तकारस्य [353] तत्पूर्वपदस्य च न द्वित्वमित्यर्थः स्यादिति दृषत्तीर्णेत्यादौ दोषापत्तिरिति भावः। **नियतावधीति।** ङ्याभ्यां प्रातिपदिकाक्षेप नियमेन [354] तदाकांक्षाया अभावादित्यर्थः। **प्रत्ययविशेषणत्वाभावादिति** [355] । तथा च अपञ्चम्याः इति निषेधस्याप्रसारेण प्रत्ययग्रहणपरिभाषाया तदादितदन्तयोः अपूर्वत्ववादिनां मते तदन्तविधिर्भवति। अन्ये तु स्वादिप्रत्ययनिमित्तके तदाद्यंशमात्रोपस्थित्यातस्यविशेषत्वात्। ङ्यन्तात्तदादेरित्यर्थः स्वाद्यंशे तदन्तांशस्तु नोपतिष्ठते अनया निषेधात् दीर्घग्रहणन्तु क्वचिदुपसर्जनेऽपि स्त्रीप्रत्यये तदादिनियमाभावज्ञापकमिति बहुश्रेयसीत्यादौ सुलोपसिद्धि-रित्याहुः। द्वितीयतदन्तविधिमादाय उक्तोदाहरणे सुलोपसिद्धिरिति दीर्घग्रहणञ्च सार्थकमिति शब्दरत्ने उक्तम्। एतेन ङ्यभ्यामित्यादौ तदन्तविध्यभावेऽपि ङ्याभ्यां परस्य सोर्लोप [356] इत्यर्थे दोषाभाव इत्यपास्तम्। [फलविशेषाभावेऽपि उक्तरीत्या परिभाषाया प्राप्ततदादितदन्तविधेः प्रतिषेधो नेति परत्वाद्धस्वप्रवृत्तिस्स्यात्। उत्तमैकाभ्यामिति अन्यथा तस्याङ्गत्वभावेन दीर्घोनस्यादितिभावः। ननु कुमारीब्रह्मणिरूपेति समानाधिकरण-समास प्रदर्शमार्थ वाक्यमिदमुपात्तरूपन्तु कुमारब्राह्मणिरूपेति तत्रैव तत्परिभाषाया अभावे ब्राह्मणिशब्देतसिलौदिष्विति पुम्वत्वंबाधित्वाह स्वप्रकृतिरिव कुमारीशब्देपि पुम्वद्भावाद्धस्वत्वं विप्रतिषेधेन इति परत्वाद्धस्वप्रवृत्तिः स्यात् । सत्याञ्च तस्यां सकृद्गति न्यायेन पुंवप्रवृत्तौ

---

[353] तकारस्य F1 , G2 : कारस्य G1

[354] नियमेन F1 : विनियमेन G1, G2

[355] अन्ये तु ……………स्वादिप्रत्यय G1 (e) : F1, G2

[356] ङ्यभ्यां परस्य सोर्लोप F1 : ङ्यभ्यां *** सोर्लोप G1, G2

कुमारीब्राह्मणीरूपेति स्यात्। सत्याञ्च परिभाषायां ह्रस्वाप्राप्तेः पुंवत्वमेवेति यथोक्तरूपसिद्धिः[357]]।

**उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्ति॥ २५॥**

ननु "सुँपि च" (७-३-१०२) इत्यादाविव उक्तरीत्याऽत्रापि "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१-१-६५) परिभाषाप्रवृत्या घटादि[358] घपरेष्वित्यर्थे कस्मादित्यवधिसाकांक्षत्वेनो-पस्थिततदादेरेवावधित्वेनान्वयात्। अपञ्चम्या इति निषेधप्रसरात्तदन्तविध्यभावस्सिद्ध एवेतीयं परिभाषा व्यर्थेति चेन्न। **"येन नाप्राप्तिन्यायेन"** प्रत्ययग्रहण परिभाषालब्ध वाचनिकतदन्तविधेरेवापञ्चम्या इति निषेधादिह तु उत्तरपदस्य विशेषत्वेन "येन विधिस्तदन्तस्य" (१-१-७१) इति प्राप्ततदन्तविधिस्यादित्येतत्परिभाषारम्भ इत्युद्द्योते स्पष्टम्। प्रत्ययग्रहणपरिभाषायां तदन्तविधेरनपूर्वत्वपक्षे तु घर इत्येवादेशविधानात् ङ्यांशे तदन्तविध्यनुरोधेनोपस्थित तदादेरित्यस्य षष्ठ्यन्तत्वेन पञ्चम्यन्तस्य प्रत्ययविशेषणत्वा-भावात्। न च परत्वेऽवध्याकाक्षां न शान्तेति वाच्यम्। तदर्थाक्षेपेण[359] दिक्षा[360] शब्दस्या-न्वययोग्यावधिविशिष्टशक्तिस्वीकारेण वा तच्छान्तेः। एवं "सुँपि च" (७-३-१०२) इत्यादावपि आदेशविधावधिकृताङ्गस्येत्यस्य[361] तत्समानाधिकरण्यादुपस्थित तदादेरित्यस्य च षष्ठ्यन्त-

---

[357] F1 (e) : G1, G2 (o)

[358] घटादि F1 : घादि G1, G2

[359] तदर्थाक्षेपेण F1 : तदर्थाक्षेपेणा G1, G2

[360] दिक्षा F1, G2 : दिक्ष G1

[361] आदेशविधावधिकृताङ्गस्येत्यस्य F1, G2 : आदेशविधाव इत्यनन्तरं (वध्याकांक्षा ना शान्तेति वाध्यं तदर्थाक्षेपेण दीक्षशब्दस्य ) G1

त्वेऽपि न दोषः। उक्तरीत्यावध्याकाक्षांशान्तेः। एतेनोपस्थिततदादेरित्यस्यपञ्चम्यन्तत्व-कल्पनाश्रयणा "प्रत्ययग्रहणे चापञ्चम्या" इति निषेधात् "सुँपि च" (७-३-१०२) इत्यादौ न दोष इत्यपास्तम्। मतोश्च बहुजङ्गात् इत्यङ्गग्रहणेन सम्भवति सामानाधिकरण्ये वैयधिकरण्यान्याटय्यत्वाच्च। यत्र प्रत्ययनिमित्तत्वेनेति मूलस्वरसाच्च । तदादेरित्यस्य षष्ठयन्तत्वमेव "स्यतासी लृलुटोः" (३-१-३३) इत्यादावधिकृतधातोरिति पञ्चम्यन्तस्यावृत्या उभयविशेषत्वान्न दोषः। 'घ' परित्यागस्तु संज्ञाविधविति इति निषेधप्रवृत्ति सामार्थ्यातदन्तविध्यभावात्। गुरवस्तु धर्मिकग्राहकमानादुत्तरपदाधिकारे प्रत्ययस्य विशेष्यतद्रूपेणोपादाने तदन्तग्रहणन्नेत्यर्थस्वीकारान्न दोष इत्याहुः।

**स्त्रीप्रत्यये चानुपसर्जने न॥ २६॥**

**नन्वेवं "परमकारीषगन्धीपुत्र" इत्यत्रेवेति।** ननु प्रत्ययग्रहणपरिभाषायाः पूर्वमुपन्यासात् परमकारीषगन्धीपुत्र इत्येत्रैव ष्यङन्तत्वाभावेन सम्प्रसारणस्य सिद्धात्वात्त-स्य दृष्टान्तत्वेनाल्लेखोनोचित इति चेन्न। यदि **"प्रत्ययग्रहणे यस्मात्सविहितः"** (परि-२३) भवति इत्युच्यते "परमकारीषगन्धीपुत्रः" इति न सिध्यति। "प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य" इति अस्त्री प्रत्ययेनेति। यद्यस्त्रीप्रत्यये नेत्युच्यते "अतिक्रन्तकारीषगन्ध्या", "अतिकारिषगन्ध्याऽस्याः पुत्रः", "अतिकारिषगन्ध्यापुत्रः" "अतिकरीषगन्ध्यापतिः" इत्यत्रापि प्राप्नेति स्त्रीप्रत्ययेनानुपसर्जने इति "ष्यङः सम्प्रसारणं" (६-१-१३) इति सूत्रभाष्यादस्त्रीप्रत्यये नेत्येतद्घटित "प्रत्ययग्रहण" परिभाषायाः पूर्वं वुद्धयारूढंत्वेन "परमकारिषगन्ध्यापुत्रः" इत्यत्र सम्प्रसारणस्य सिद्धत्वात्तस्य दृष्टान्तीकरणं तया रीत्या "अतिकारीषगन्ध्यापुत्रे[362]" सम्प्रसारणातिप्रसङ्ग इत्यनेनानुपसर्जनेत्येतावदव

---

[362] अतिकारीषगन्ध्यापुत्रे F1 , G2 : अतिकारीगन्ध्यापुत्रे G1

तार्यते। तद्विशेष्यं स्त्रीप्रत्यय इति न तु सोऽप्यंशोऽवतार्यते। अत एव "गोस्त्रियोरुप-सर्जनस्य" (१-२-४८) इति सूत्रे भाष्ये प्रत्ययग्रहणपरिभाषामुपन्यस्य स्त्रीप्रत्ययेनेत्येवं तदित्येवेत्सुक्तमिति साम्प्रदायिकाः। अन्ये तु प्रत्ययग्रहणपरिभाषोलब्धेन यस्मात् ष्यङ् प्रत्ययो विहितः तदादितदन्तेन भाष्यकृद्दर्शितपूर्वपदस्य विशेषणात्ष्यङन्तान्त्वस्य पूर्वपदस्य इत्यर्थात् "परमकारीषगन्धीपूत्र" इत्यत्रेव "अतिकारीषगन्ध्यापुत्र" इत्यत्रापि नाानुपसर्जनेनेत्यवतारितपरिभाषाया [३६३] अनुपसर्जनस्त्रीप्रत्ययविषये तदादिविधिनिषेधात् तदन्तांशमात्रोपस्थित्यौ द्वितीयतदन्तविधिं विनैव मुख्ये प्रवृत्तिसंभव इति पूर्वपदस्य ष्यङन्तविशेषणत्वमेवोपसर्जनविषये तु तदादिविधेरसत्त्वेन [३६४] सम्प्रसारणप्रवृत्तिश्चेति सम्पूर्णेतत्परिभाषावतरणं सम्यगेवेत्याहुः। दृष्टान्तदार्ष्टान्तिकयोर्वैपरीत्येन योजनं केषांञ्चिन्न युक्तम् । तथा सति न स्यादिति वाक्यशेषो विरुद्धः स्यात्। अन्वयदृष्टान्तस्थले उपमेये श्रूयमाणक्रियया एवोपमानेप्यन्वयात् **"स्त्रीप्रत्यये चानुपसर्जनेन" (परि-२६)** न इत्यत्र तद्विषयकलक्षणे इत्यर्थः। एवमग्रेऽपि नन्वेतिराजकुमारीत्यादौ अर्थं प्रति राजकुमारीत्य-स्योपसर्जनत्वेन तद्विषयकलक्षणे स्त्रीप्रत्यये चानुपसर्जने [३६५] नेति निषेधाप्राप्त्या [३६६] प्रत्ययग्रहणपरिभाषाया तदादिनियमात् राजकुमारीत्यस्य स्त्रीप्रत्ययान्तत्वात्तदन्तसमास-रूप प्रातिपदिकत्वस्य विशिष्टेऽभावात् ह्रस्वो न प्राप्नोति। अत आह। **प्रत्यासत्त्या यस्य समुदायस्येति** । यस्य "राजकुमारी" इति स्त्रीप्रत्ययान्तस्यानुपसर्जनत्वमेवेति । अनया तदादिविधिमात्रनिषेधात् राजकुमारीत्यस्य स्त्रीप्रत्ययान्तत्वात् तदन्तसमासरूपप्रातिप-

---

[363] नानुपसर्जनेनेत्यवतारितपरिभाषाया G1 : चानुपसर्जनेनेत्यवतारितपरिभाषाया F1 , G2

[364] तदादिविधेरसत्त्वेन F1 , G2 : तदादिविधेस्सत्त्वेन G1

[365] स्त्रीप्रत्यये चानुपसर्जने F1 , G2 : स्त्रीप्रत्यये चेति G1

[366] निषेधाप्राप्त्या F1 , G1 : निषेधप्रप्त्या G2

दिकत्वाद्विविशिष्टस्य ह्रस्वसिद्धिरिति "कारीषगन्ध्यापुत्रः" इत्यत्र तु विशिष्टस्य स्त्रीप्रत्ययान्ततत्वमानेयमिति , तदर्थं प्रति कारीषगन्ध्या इत्यस्य स्त्रीप्रत्ययस्योपसर्जनत्व-मेवेति तदादिनियमसम्भवात्[३६७] न ह्रस्व इति दिक्। स्यादेतत्। उक्तरीत्या "राजकुमारी-पुत्रः" इत्यत्रापि ह्रस्वापत्तिः। यस्य राजकुमारीत्यस्य स्त्रीप्रत्ययान्ततत्वमानेयं[३६८] तदर्थं प्रति तस्य कुमारीति[३६९] स्त्रीप्रत्ययानुपसर्जनत्वात्तदानियमाभावेन स्त्रीप्रत्ययान्ततत्वादिति । अत्र शेखरकृतः उपसर्जनमिति महासंज्ञाकरणाद्येन शब्देन समासविधौ यत्प्रथमानिर्दिष्टं तस्य तं प्रत्येव अप्रधानत्वेनोपसर्जनात्वात् प्रत्यासत्त्या[३७०] तदन्तसमासरूपप्रातिपदिकस्यैव ह्रस्व इत्यर्थस्य भाष्यकृता स्वीकारात् न दोष इति समादधुः। यत्त्वाहुः "गोस्त्रियोरुप-सर्जनस्य" (१-२-४८) इति सूत्रस्थ भाष्यकैयटयोरप्यसयां परिभाषायां[३७१] स्त्रीप्रत्यय-विशेषणार्थमनुपसर्जनग्रहणमिति प्रायोवादः। "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" (६-१-६६)इति सूत्रे दीर्घग्रहणात्। अन्यथा निष्कौशाम्बिरित्यादौ उपसर्जनत्वादङ्यन्त-त्वात्सुलोपो न भविष्यतीति किं[३७२] दीर्घग्रहणेन कौशाम्बिरिति ङ्यन्तात् सोः परत्वेऽपि प्रत्ययाक्षिप्तप्रकृतेर्हल्ङ्याभ्या इत्यनेन विशेषणात् हल्ङ्याबन्तप्रकृतेः परत्वाभावात्। अतः "अतिराजकुमारी" इत्यत्र समुदायार्थं प्रत्युपसर्जनस्त्रीप्रत्ययेनापि तदादिनियमा-

---

367 तदादिनियमसम्भवात् F1 : तदादिनियम सत् भावात् G1, G2

368 आनेयम् F1, G2 : आनेय G1

369 कुमारीति F1 : कुमारीत्यस्त्री G1, G2

370 प्रत्यासत्त्या F1 , G2 : प्रत्यासक्त्या G1

371 परिभाषायाम् F1 , G2 : परिभाषाम् G1

372 किं F1, G2 : की G1

भावात्[३७३] स्त्रीप्रत्ययान्तत्वाद्ध्रस्वस्सिध्यतीत्युक्तमिति ,अत्रोच्यते। प्रत्ययग्रहणपरिभाषाया शब्दरूपं विशेष्यमादाय लब्धेन ङ्यन्ताबन्तेन स्वादिप्रत्ययाक्षिप्तप्रकृतेः प्रत्ययग्रहणपरिभाषाया लब्धस्य तदादेर्वा विशेषणात्। ङ्यन्तात्तदाबन्तादित्यर्थेन बहुश्रेयसीत्यादौ सुलोपार्थमावश्यकेन निष्कौशाम्बिरित्यादौ प्रत्ययस्य लोपवारणार्थं दीर्घग्रहणस्य कृतार्थत्वात् "श्रविष्ठासु जातः" श्रविष्ठ इत्यादौ तद्धितलुकि स्त्रीप्रत्ययस्य लुकि प्रत्ययलक्षणेनाबन्तत्वादतिव्याप्तिवारणाय दीर्घग्रहणस्यावश्यकत्वाच्च। प्रश्लेषामाश्रित्य [३७४] दीर्घग्रहणस्य प्रत्याख्यातत्वाच्चा [३७५] । अतिराजकुमारित्यादेरुक्तरीत्या प्रत्यासत्तेश्चश्रयणसिद्धत्वाच्चा। स्त्रीप्रत्ययेत्येवं तदिति भाष्यं तु "ष्यङः सम्प्रसारणम्" (६-१-१३) इति सूत्रभाष्यविरोधेन एकदेश्युक्तिरित्युद्योते स्पष्टम्।

यदप्युपसर्जनस्येति तु कस्यविशेषणं स्यात्। लौकिकशास्त्रीयोभयविधोयोरुपसर्जनत्वस्य ह्रस्वादेशस्त्रीप्रत्ययान्तसमुदायप्रातिपादिकासम्भवादिति चेत् स्त्रीप्रत्ययस्य विशेषणं भविष्यतीति ब्रुमः। लौकिकमेवोपसर्जनत्वमाश्रयीयते इति, तदपि न। गोऽन्तस्य स्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्योपर्जनस्य ह्रस्वो भवतीति भाष्यविरोधापत्तेः। गोऽन्तस्त्रीप्रत्ययान्तप्रातिपदिकावयवस्यापर्जनस्य गोस्त्रीप्रत्ययरुपस्येति वैयधिकरण्येन व्याख्यानं तु "मतोश्च बहुजंङ्गात्[३७६]" (४-२-७१) इत्यङ्गग्रहणमूलकं संभवति सामान्याधिकरण्येति न्यायविरुद्धम्। उपसर्जनग्रहणेन गोस्त्रियौ विशेष्येते। स्त्रीशब्देन स्त्रीप्रत्ययान्तं

---

[373] तदादिनियमाभावात् F1, G1 : नियमाभावात् G2

[374] प्रश्लेषामाश्रित्य G2 : प्रश्लेषमाश्रित्य F1 : प्रश्लेषमासृत्य G1

[375] प्रत्याख्यातत्वाच्चा F1, G2 : प्रत्याघातवाच्चा G1

[376] मतोश्च बहुजंङ्गात् F1 , G1 : मतोश्च बहु अङ्गात् G1

ताभ्यां प्रातिपादिकमिति तदन्तविधिरिति प्रदीपोद्योतविरुद्धश्च [३७७] । गोशब्दांशे शास्त्रीयलौकिकोभयविधोपसर्जनत्वस्य सम्भवेन [३७८] स्त्रीप्रत्ययांशेऽप्यैकरूप्यतया तथा विरुद्धस्यैव तद्ग्रहीतुमौचित्याच्च। स्त्रीप्रत्ययस्य द्योतकत्वेन द्योतकस्य द्योत्यार्थद्वारा विशेषणत्वेनाप्रधानत्वाद्व्यभिचाराभावेन उपसर्जनस्येति विशेषणवैयर्थ्यात्। यद्यपि शास्त्रीयोपसर्जनग्रहणे " शोभना गौः सुगौः", "न पूजनात्" (५-४-६९) इति समासान्ताभावः। "परमः सुगौः यस्य सः" परमसुगुरित्यादौ गौ शब्दस्य शास्त्रीयोपसर्जनत्वादध्रस्वो न स्यादिति तदपि न । गोन्तं यदुपसर्जनं तदन्तस्य प्रातिपदिकस्य ह्रस्वविधानादिष्टसिद्धेः। चित्रगुरित्यादौ व्यपदेशिवद्भावेन गोन्तत्वात् व्यपदेशिवद्भावो प्रातिपदिकेनेत्यस्य तु न प्रवृत्तिः। तस्य प्रत्ययविधिविषयत्वात्सूत्रोपात्तान्तादि शब्दविषयत्वाच्चेति "येन विधिस्तदन्तस्य" (१-१-७१) इत्यत्र भाष्ये स्पष्टम्। किञ्च ह्रस्वविधौ लौकिकोपसर्जनग्रहणे "पञ्चगुः", "प्राप्तजीविकः" इत्यस्यैक विभवत्युपसर्जनसंज्ञाप्रयोजनत्वोक्तिर्भाष्यकृता विरुद्धा स्यात् । गार्गी चासौ बृन्दारिका च गार्ग्यबृन्दारिकेत्यादौ बृन्दारिकाशब्दस्य गुणशब्दत्वेन प्रधानत्वात्तदन्तस्य समासरूपप्रातिपदिकत्वेन ह्रस्वापत्तिश्च। गोबष्कयणीत्यादौ बष्कयणीशब्दस्य जातिशब्दसमभिधाने गुणशब्दत्वेनाप्रधानत्वात्तदन्तसमासरूपप्रातिपदिकस्य ह्रस्वापत्तिश्च। यदपि गौणमुख्यपरिभाषाया "आन्महतः समानाधिकरणजातीययोः" (६-३-४५) इति सूत्रीयप्रदीपप्रदर्शितदशबष्कयणप्रातिपदिकार्थस्योपसर्जनत्वेऽपि स्त्रीप्रत्ययार्थे तदभावादिति तदपि न। "आन्महतः समानाधिकरणजातीययोः" (६-३-४५) सूत्रे अमहती महती संपन्ना महद्भूता ब्राह्मणीत्यत्र गौणार्थवृत्तित्वान्महच्छब्दस्य कथं

---

[377] प्रदीपोद्योतविरुद्धश्च G2 : प्रदीपोद्योतविरुद्धं च F1 : प्रतीपोद्योतविरुद्धम् G1

[378] सम्भवेन G1, G2 : सम्बन्धेन F1

पुम्वद्भाव  इत्याशंक्या महत्वमात्रमुपचरिम्। न तु तद्विशिष्टस्त्रीप्रत्ययार्थेऽपीति विवक्षया पुम्वद्भावसिद्धेः। प्रदीपकृताभिधानोपि गुणवाचकस्त्रीप्रत्ययान्तस्य सामानाधिकरण्येन जातिशब्दविशेषणत्वं नेत्यनभिधानात्। बष्कयणप्रातिपदिकार्थस्य विशेषणत्वं न स्त्रीप्रत्ययार्थस्येति तु वक्तुमशक्यम्। दत्तोरत्वात् विवक्षयेत्युक्त्याऽमहति महत्त्व-विशिष्टस्त्रीप्रत्ययार्थारोपस्य स्वीकारः। उररीकृतश्चैतत्त्वयाऽपि लिङ्गविशिष्टपरिभाषायाम्। किञ्च लौकिकोपसर्जनत्वस्य ग्रहणे कुमारीमिच्छन् ब्राह्मणः कुमारीत्याह, हरीतक्याः फलानि हरितक्यः इत्यादौ ह्रस्वापत्तिरिति शेखर स्पष्टम्। यत्तु कर्म ङी विवरणसंमत्या गोस्त्रियोरित्यत्र स्त्रीप्रत्ययान्तस्य लिङ्गविशिष्टपरिभाषाया प्रातिपदिकत्वातिदेशे सत्यपि प्रातिपदिकस्येत्यनुवर्तते। तेन समानाधिकरण्ये नान्वयबलादिष्टप्रातिपादक। तस्योपसर्जनस्त्रीप्रत्यान्तस्य ह्रस्वो न भवति। लुबन् स्त्रीप्रत्ययान्ते प्रत्यायान्तपर्युदासेन स्वतः प्रातिपदिकस्येव प्रत्ययलक्षणेन तद्धितान्तत्वप्रयुक्तस्यलिङ्गविशिष्टपरिभाषाया तदिष्टस्य तस्याप्यभावाददोषः। एतेन क्यजन्तात् क्विपि कुमारीशब्दे[379] ह्रस्वापत्तिमुद्भावयन्तो नव्यतरारसमाहिता इति तच्चिन्त्यम्। “इद् गोण्याः” (१-२-५०) इति सूत्रे भाष्ये गोण्या नेति वक्तव्यम्। पञ्चगोणिरित्यादौ क्रीतार्थस्य तद्धितस्य लुकि “लुक्तद्धित....” (१-२-४९) इति प्राप्तस्य ङीब्लुकोर्निषेध “गोस्त्रियोरुपसर्जनस्य” (१-२-४८) इति ह्रस्वेन सिद्धिं सम्पाद्य एतन्यासे लाघवाभावमुक्त्वा मात्रार्थमित्वं वक्तव्यम्। गोणीमात्रमिदं गौणिरित्युक्तं तत्र गोणिति प्रतीकमुपादाय यदा मात्रचो लुक् क्रियते तदा गोण्या नेति न्यासेऽपि लुकि प्रतिषिद्धे सिद्धत्येव ह्रस्वत्वमितित्वच्छिरोमणि भूतेन कैयटेनाभिहितं विरुध्येत। अतिदिष्टप्राति-पदिकत्वसत्त्वेऽपि त्वन्मते ह्रस्वाप्राप्तेः। यद्ययमभ्युपगमवादः तर्हि लौकिकस्यैवोपसर्जन-

[379] कुमारीशब्दे G1 : कुमारीशब्दस्य F1, G2

त्वस्य [३८०] ग्रहणे द्वितीयसाधकं विभावयाः मन्मते त्वयं कैयटश्चिन्त्य एव। शास्त्रीयोपसर्जनग्रहणात् एव "कुक्कुटमयूर्यावित्यादौ" समासार्थे समाहारे अवयवार्थस्य अप्राधान्यादनेकमित्यस्यानुवृत्या प्रथमानिर्दिष्टत्वाच्च [३८१] मयुरीशब्दस्योपसर्जनत्वमित्येवं लौकिोपसर्जनत्वस्य समानाधिकरणशास्त्रीयोपसर्जनत्वमादायैव ह्रस्वाप्राप्तिरुद्भाविताकैयटेनैव। स्पष्टञ्चेदं सर्वं गोस्त्रियोरिति सूत्र उद्योते । नन्वेवमपि राजकुमारीत्यस्य एकविभक्तीत्युपसर्जनत्वसत्त्वेन तदादिनियमसद्भावात् दोषस्तदवस्थ एव। अत आह **अत एवेति।** प्रत्यासत्त्याश्रयणादेवेत्यर्थः[३८२]। **असंभवादिति** । राजकुमारीति विशिष्टे शास्त्रीयोपसर्जनत्वसत्वेऽपि [३८३] परिभाषाघटकस्त्रीप्रत्ययनिष्टस्य तस्योपसर्जनत्वस्यासंभवादित्यर्थः। **न तु स्त्रीप्रत्ययास्त्रीप्रत्ययग्रहणे इति।** अन्यथा "राजकुमारीपुत्रः" इत्यादौ रजकुमारीशब्दस्यातिराजकुमारित्यादौ ह्रस्वसिध्यर्थमावंश्यकप्रत्यासत्त्यानुपसर्जनत्वादनुपसर्जने स्त्रीप्रत्यये तदादिनियमाभावात्। प्रत्यान्तत्वेनाप्रत्यय इति निषेधात् समासग्रहणस्य नियमार्थत्वात्तत्राप्यप्रत्यय इत्यनुवृत्तेरप्रातिपदिकतत्वाद्ध्रस्वाप्राप्तेः। तद्वारणाय पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थमिति वार्तिकस्य यद्प्रधानं तस्य चेत् प्रतीयतो भवतीति प्रत्यासत्त्याश्रयणेन तत्खण्डनभाष्यस्य निरालम्बनत्वापत्तेः। स्त्रीप्रत्ययमात्रे परिभाषा-

---

[380] लौकिकस्यैवोपसर्जनत्वस्य F1 , G2 : किं कस्यैवोपसर्जनस्य G1

[381] प्रथमानिर्दिष्टत्वाच्च F1 , G2 : प्रधमानिर्दिष्टत्वाच्च G1

[382] प्रत्यासत्त्याश्रयणादेवेत्यर्थः F1 , G2 : प्रत्यासक्त्याश्रयणादेवेन्यत्यर्थः G1

[383] शास्त्रीयोपसर्जनत्वसत्वेऽपि F1 : शास्त्रीय प्रत्ययोपसर्जनत्वेऽपि G1 :

शास्त्रीय प्रत्योपसर्जनसत्त्वेऽपि G2

प्रवृत्तौ तु अप्रत्यय इति प्रत्ययांशे परिभाषाया अप्रवृत्त्या तदादिनियमसत्त्वेन प्रत्ययान्तत्वाभावात्प्रातिपदिकत्वादुक्तवार्तिकभाष्ययोरुपपत्तिः। ह्रस्वविधौ शास्त्रीयस्यैव उपसर्जनत्वस्याश्रयणेन तस्य च राजकुमारीत्यादौ सत्त्वेन ह्रस्वप्राप्तिः विरुध्येदिति "गोस्त्रियोरुपसर्जनस्य" (१-२-४८) इति सूत्रे उद्योते विस्तर इति दिक्। **इयं च वाचनिक्येवेति**। केचित्तु प्रत्ययग्रहणे यस्मादिति परिभाषाग्राहके भाष्योक्तेः यस्मात्प्रत्यय-विधिस्तदादि प्रत्यये इति विभक्तियोगेनेयुङुवङित्यत्ताऽस्त्रीत्यनुवर्त्य शब्दाधिकाराश्रयण-नार्थपरत्त्वं स्वीकृत्य स्त्रीप्रत्यये इत्यर्थे "यू स्त्र्याख्यौ नदी" (१-४-३) इत्यतः स्त्र्याख्येत्यनुवर्त्यते। न स्त्रीप्रत्ययस्य विशेषणात्प्रधानस्त्रीप्रत्ययभिन्नप्रत्ययग्रहणे तदादिविधिरित्यर्थादियं लभ्येदित्याहुः। अन्ये तु प्रत्ययग्रहणे इति परिभाषार्थसङ्ग्राहके यस्मात्प्रत्ययभिन्नप्रत्ययग्रहणे तदादिविधिरित्यर्थादियं लभ्येत्याहुः । अन्ये तु प्रत्ययग्रहणे इति परिभाषार्थकं वाग्रहणं चानुवस्यैतत्परिभाषार्थलाभ इत्याहुः। तत्रोभयत्रापि भाष्यानुग्रहौ विचार्य इत्यलम्।

**संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ २७ ॥**

अत्र संज्ञाविधाविति तृतीयासमासो न। तथासति "तरप्तमपौ घ" (१-१-२१), "क्तक्तवतू निष्ठा" (१-१-२५) इति वैयर्थ्यप्रसङ्गात्। अनुपदवक्ष्यमाणदोषप्रसङ्गाच्च सम्बन्धसामान्यषष्ठ्या समासे न संज्ञाया विधौ कुत्रापि प्रत्ययग्रहणाभावात्तदन्तविधि प्रसङ्गनिषेधवैयर्थ्यप्रसङ्गात् । अनुपदवक्ष्यमाणदोषप्रसङ्गाच्च। सम्बन्धसामान्यषष्ठ्या समासेन संज्ञाया विधौ चेति परिनिष्ठेति निष्ठान्तस्य उपसर्जनस्य बहुव्रीहौ विधीयमानः पूर्वनिपात्तो निष्ठामात्रस्य स्यात्। अस्मिन्पक्षद्वयेऽपि उत्तरपदाधिकारे इति परिभाषावैयर्थ्यं न रूपबादौ कृतार्थत्वात्। अपि तु भाव क्तिप्रत्ययान्तविधिशब्दस्य कर्मषष्ठ्यन्तसंज्ञाशब्देन समासात्संज्ञाकर्मकविधावित्यर्थः। न चैवं "तरप्तमपौ घ" (१-१-२१) इत्यादौ घ इत्यादि

संज्ञाविधावनया तदन्तविधिवनिषेधेऽपि घरूपेत्यादिविधिप्रदेशे प्रत्ययग्रहणे तदन्तग्रहणं दुर्वारमिति वाच्यम्। संज्ञाविधौनिषेधप्रसक्तिसामर्थ्यादुत्तरपदधिकार परिभाषाया च प्रदेशे बादौ[३८४] तदन्तविधिरिति शेखरे स्वष्टम्। यत्विदं प्रदीपकृदुक्तदूषणविस्मरणमूलकं यदि "संज्ञाविधौ" "संज्ञाया विधौ" उभयत्रापि तदन्तविधिस्स्यात्। तरबन्तान्ते पराते गौरी ब्राह्मणीतरेत्यत्र ह्रस्वः प्रसज्येत।षष्ठसिमासे तु संजया विधावेव तदन्तविधानम्। तरबन्ते गौरीब्राह्मणितरेत्यदौ ह्रस्वार्थनिषेधस्य सार्थक्येन सामर्थ्याभावादिति तच्चिन्त्यम्। संज्ञाविधौ, तदन्तस्य संज्ञायामपि, विधिप्रदेशे घरुपेत्यादौ घशब्देन उपस्थितस्योतरपदस्य विशेषणविशेष्यभावे कामचारादुत्तरपदेन विशेषणद्वितीय तदन्तविधेरयोग्यत्वात् कुमारीब्राह्मणीतरेत्यत्र दोषाभावाच्च। संज्ञाविधौ तदन्तविधिनिषेधस्यानुपयोगे [३८५] तद्वैयर्थ्यात् । न च **पदाङ्गाधिकारे** इति वार्तिकादुत्तरपदस्य विशेष्यत्वात्तदन्तविधिरिति वाच्यम्। उत्तरपदाक्षिप्तपूर्वपदस्य विशेष्यत्वेन स्थानित्वे एव तस्याः प्रवृत्तेः। अत एव तस्य तदन्तस्य इति षष्ठीनिर्देश उपपद्यत इति निरुक्तशेनोपस्थितिः। अन्यथा पादस्य पदाज्यातीत्यादावाज्यन्ते उत्तरपदेऽपि प्रवृत्तेत्याकारे स्पष्टम्। न चैवं सिद्धान्ते घरुपकल्पनामुत्तरपदेन [३८६] विशेषणात्तदन्तविधेरप्राप्तावुत्तरपदाधिकार इति परिभाषा व्यर्थैवेति वाच्यम्। घादिनां प्रत्ययानामुत्तरपदत्वासंभवात् घादिभिरेवोत्तरपदस्य विशेषणात्। "येन विधिः (१-१-७१) इति सूत्रप्राप्ततदन्तविधिनिषेधाया तस्यावश्यकत्वात्। एवञ्च रुपादिष्वेव उत्तरपदे इत्यस्य सम्बन्ध इति "सुँप्तिङन्तम् पदम्" (१-४-१४) इति सूत्रे भ

---

[384] बादौ G1 : घादौ F1, G2

[385] तदन्तविधिनिषेधास्यानुपयोगेन F1 , G1 : तदन्तविधिनिषेधास्यानुपयोगे G2

[386] घरुपकल्पनामुत्तरपदेन F1 , G2 : घरुपतल्पनामुत्तरपदेन G1

ाष्यप्रदीपोद्योते स्पष्टम्। न चैवमपि घादिषु परेष्वित्यर्थेऽपि [३८७] कस्मादिति [३८८] नियतावध्याकांक्षायां तदादेः ङ्यन्तस्यैवावधित्वेनान्वयात्। " सुपि च [३८९] " (७-३-१०२) इत्यादाविव प्रत्ययग्रहणे चापञ्चम्याः इति निषेधेन सिद्धावुत्तरपदाधिकार परिभाषा व्यर्थेति वाच्यम्। तथा [३९०] प्रत्ययग्रहणपरिभाषा लब्धवाचनिकतदन्तविधेरेव निषेधः न तूत्तरपदस्य विशेष्यत्वेन प्राप्ततदन्तविधेरिति "येन विधिः (१-१-७१) इति सूत्रे उद्योते स्पष्टम्। किञ्चोत्तरपदाधिकारे इति अनन्तरं **"प्रत्ययग्रहणे चापञ्चम्या"** (परि-२४) इत्यस्यानिमित्तांशेऽपि प्रवृत्तौ ह्रस्वस्येति सूत्रस्य शेखरस्थ ग्रहणस्योरपदाधिकारे इत्यस्ति [३९१] । परिभाषा ज्ञापकत्वपरभाष्यविरोधापत्तिः अणुपरे इत्यर्थे कस्मादिति नियतावध्याकांक्षाया तदादे हृदयस्यैवान्वयात् प्रत्ययग्रहणमिति परिभाषाया [३९२] तदन्तविधिनिषेधेन लेखग्रहणस्य उपक्षीणत्वात्। एतेन तर्हि कस्मान्न भवति उत्तरपदे ह्रस्वः । सत्यपि संज्ञाविधौ तदन्तविधिप्रतिषेध इति चेत् **"प्रत्ययग्रहणे चापञ्चम्या"** (परि-२४) इति प्रतिषेधं ब्रूमः।परसप्तमीनिर्देशेन हि दिग्योगपञ्चम्यन्तोऽवधिराक्षिप्यते इत्यपास्तम्।यत्तु शेखारोक्तदिशा व्याख्याने प्रत्ययग्रहण चापञ्चम्याः इत्यस्य वैयर्थ्यप्रसङ्गः। इष्टापत्तिरिति चेत् पूर्वनिपातदोषस्य प्रागुक्तस्य का गतिरिति तच्चिन्त्यम्। "हल्ङ्याभ्य दीर्घात सुतिस्यपृक्तं

---

387 परेष्वित्यर्थेऽपि F1 , G2 : परिष्वित्यर्थेऽपि G1

388 कस्मादिति F1 : कस्तादिति G1, G2

389 सुपि च F1 , G2 : सिपि च G1

390 तथा F1 : तया G1, G2

391 इति निषेधस्यानिमित्तांशपि प्रवृत्तौ हृदयस्य हृदिति सूत्रस्थ लेखग्रहणस्यात्तरपदाधिकारे इति F1, G1

392 परिभाषाया F1, G1 : परिभाषया G2

हल्” (६-१-६६) इत्यादौ तदादितदन्तविधौ उभयोरेकविषयत्वे सति ङ्यन्तादाबन्तात्परस्य यस्मात्सुप्रत्ययो विहितस्तदादि तदन्तस्य लोपः स्यात्। **“प्रत्ययग्रहणे चापञ्चम्या”** (परि-२४) इति निषेधे तदादिविधेरुपस्थित्या ङ्याबन्तात्तदादेरसालोॅप इत्यर्थेन इष्टसिद्धिरिति प्रत्ययग्रहणपरिभाषाय वैयर्थ्याभावात्ङ्याबंशे तु नियमतः आकांक्षायाभावेन निषेधाविषयत्वात् तदादितदन्तविध्योरुपस्थितिरित्यन्यत्। निष्ठेति पूर्वेनिपातविधौ संज्ञाविधाविति निषेधसामर्थ्यात्तदन्तविध्यभाव प्रसङ्गदोषोऽपि न। निष्ठामात्रेण बहुव्रीहेरसंभवेन तत्सामर्थ्याद्वाहिताग्निविति निर्देशाद्वा[393] तदन्तविधि स्वीकारात्। यथा “सुप्तिङन्तम्” (१-४-१४) इति सूत्रे अन्तग्रहणे कृतेऽपि व्यपदेशिवद्भावेनपदसंज्ञायां हरिष्वित्यादौ षत्वप्रतिषेधो “हलि सर्वेषाम्” (८-३-२२) इति निर्देशेन वार्यते तद्वदित्युद्योते स्पष्टम्।

ननु “क्तक्तवतू निष्ठा” (१-१-२५) इति संज्ञाविधायके संज्ञाविधाविति निषेधसामर्थ्यात् “रदाभ्याम् (८-२-४५) इत्यादौ तदन्तविध्यभावस्य सिद्धत्वात् “प्रत्ययग्रहणे चापञ्चम्याः” इति निषेधोदाहरणत्वोक्तिः “येन विधिः (१-१-७१) इति सूत्रभाष्यस्यासङ्गतेति चेन्न। उपास्यस्य उपायान्तरादूषकत्वा दियमेकदेरयुक्तिरिति वक्ष्यमाणात्वाच्च। न चैवं “रदााभ्याम् ” (८-२-४५) इत्यादौ पदस्येत्यधिकारात् क्तेन पदस्य विशेषणात् “येन विधिः (१-१-७१) इति सूत्रप्राप्ततदन्तविधेः प्रत्ययग्रहणमिति परिभाषया कथं निषेधः, तस्याः प्रत्ययग्रहण- परिभाषा लब्धतदन्तविधिनिषेधकत्वादिति वाच्यम्। “नलोपः” इत्यात्रान्तग्रहणेनाधिकृत[394] पदस्येत्यस्य अवयवषष्ठीत्वज्ञापनेनसामानाधिकरण्याभावाद्येन विधिरिति तदन्तविधेरप्राप्तेः। एतेन “प्रत्ययग्रहणपरिभाषया अप्रसक्तवाचनिकतदन्तविधेरेवानया निषेधाः” इत्येकदेशानु-

---

[393] निर्देशाद्वा F1 : निर्द्वन्द्व : G1 : निर्देद्व G2

[394] ग्रहणेनाधिकृत F1 : नलोप इत्यन्तग्रहणेधिकृत G1, G2

वाद इत्यपास्तम्। (८-२-४५) उक्तरीत्या द्वयोः परिभाषायोः असंकीर्णफलवत्वादनुवाद-त्वस्यान्याय्यत्वाच्च। वस्तुतो "येन विधिः (१-१-७१) इति सूत्रभाष्यमेकदेशयुक्तिः। "रदााभ्याम् (८-२-४५) इति भाष्यविरोधात्। तत्र हि रदाभ्यामिति किमर्थञ्चरितं मृदितम् । ननु रदाभ्यामि् त्युच्यमानेऽप्यत्र प्राप्नोति। अत्रापि रदाभ्यां परा निष्ठेति असमस्तत्वाभिप्रायेणाशंक्य[३९५] न रेफदकाराभ्यां निष्ठा विशेष्यते। किन्तु तद्वादकारो[३९६] विशेष्यते[३९७]। रेफदकाराभ्यामुत्तरस्य तकारस्य न भवति सन्निष्ठेत्युक्तम्। निष्ठा इति समासनिषेधस्तत्र निष्ठाया उपसर्जनत्वेन विशेषणेन पञ्चम्यन्तेनासम्बन्धः[३९८]। प्रधानस्य तकारस्य सम्बन्ध इति कैयटोक्तेः। तथा च रदाभ्यामिति पञ्चम्यन्तस्य निष्ठारूपप्रत्ययविशेषणत्वाभावात् **"प्रत्ययग्रहणे चापञ्चम्या"** (परि-२४) इति निषेधस्याप्राप्तेः। तत्संज्ञाविधायके संज्ञाविधाविति निषेधासामर्थ्यात्तदन्तविध्यभाव इति शेखरोक्तिरेव ज्यायसीति दिक्। एतेन यदि तु परसप्तमीनिर्देशेऽपि षष्ठीनिर्दिष्टकार्यणैवा-काङ्क्षा निवृत्तेः। पञ्चम्यन्तावधेराक्षेपाभावः। "सुपि च" (७-३-१०२) इत्यादावङ्गस्येत्यनेनान्वयापत्तेर्न तदन्तविधिः। तदा घरूपेत्यत्र उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिनिषेधः। अत एव लेखग्रहणेन ज्ञापकेन पृथगेव साधितस्सः। अपञ्चम्या इति निषेधस्य तु रदाभ्यामित्यादावेव प्रयोजनमित्यपास्तमिति दिक्।

---

[395] असमस्तत्वाभिप्रायेणाशंक्य F1 : असमत्वाभिप्रायेणाशंक्य G1, G2

[396] तकारो F1 : तद्वादकारो G1, G2

[397] विशेष्यते F1, G2 : विशेप्यते G1

[398] पञ्चम्यन्तेनासम्बन्धः F1, G2 : पञ्चम्यन्तनासम्बन्धः G1

**कृद्ग्रहणो गतिकारकपूर्वस्यापि ग्रहणम्॥ २८॥**

**पदाङ्गाधिकारे तस्य च तदन्तस्य च॥ २९॥**

**व्यपदेशिवदेकस्मिन्॥ ३०॥**

**ग्रहणवता प्रातिपदिकेन तदन्तविधिनास्ति॥ ३१॥**

**व्यपदेशिवद्भावोऽप्रातिपदिकेन॥ ३२॥**

**यस्मिन्विधिस्तदादावल्ग्रहणे॥ ३३॥**

**वाचनिक्येषेति**। यत्तु अत्र "न ल्यपि" (६-४-६९) इति सूत्रं[३९९] ज्ञापकम्। तथाहि "घुमास्था इत्यत्र हलीति सप्तम्यन्तविशेषणेन चेत्तदन्तविधिः। तदा प्रदायेत्यादौ ल्यपि परत आत्वं न प्राप्नोतीति तद्व्यर्थं सदुक्तार्थज्ञापकम्। न च तदन्तविधावित्वमनवकाशम्। पीतवानित्यादौ[४००] सावकाशत्वादिति तच्चिन्त्यम्। उक्तपरिभाषाया ज्ञापनापेक्षया अकारान्ते कित्यपीत्व प्रवृत्तिज्ञापनेन सार्थक्यात् पीतमित्यादौ[४०१] ईत्वसिद्धिश्च[४०२] फलम्। पूर्वसूत्रे हलीति व्यर्थं तु न। वीतिरीतिरित्यादा[४०३] वीत्वाभाव-

---

[399] सूत्रम् F1, G2 : सूत्र G1

[400] पितवानित्यादौ G1 : पीतवानित्यादौ F1, G2

[401] पितमित्यादौ G1, G2 : पीतमित्यादौ F1

[402] ईत्वसिद्धिश्च F1, G2 : इत्वसिद्धिश्च G1

[403] वीतिरीतिरित्यादा F1 : विरित्यादौ G1 : वितिरित्यादौ G2

सम्पादनार्थवत्वात्। अथवा औपदेशिक[४०४] हलन्तस्यापीत्वप्रवृत्तिज्ञापनेन सार्थक्यम्। तेन "दीयते", "विधीयते" इत्यादौ यकि परतोऽपीत्वसिद्धिः। **निरुपितमिति।** वलादेरित्यनुवृत्त्या विशेषणस्यापि वत्पदार्थस्य सौत्रत्वात् तकारेण विशेषणत्वात् तरूपो यो वल् तदादेरित्यर्थः। किति सप्तमीप्रथमार्थे इति तत्रोक्तम्। गुरुचरणास्तु कितीति[४०५] सप्तमी यथाश्रुतैव वलाद्यार्धधातुकस्येति वर्तते। ततश्च तकाराव्यवहितपरकेच्छत्यादेः परस्य वलादेरार्धधातुकस्येति सूत्रार्थान्नकाचित्कल्पनेति प्राहुः। यत्तु "नादिन्याक्रो (८-४-४७) इत्यत्र आदिनीशब्दस्य परविशेषणत्ववदत्रापीतीत्यस्य प्राधान्यादार्धधातुकविशेषणतैव उचितेति तन्न। क्वचित् गुणः **"कृताकृत"** न्यायेन विशेषणविशेष्यताया[४०६] अपि वक्तुं शक्यत्वेन तथा नियमाभावात्। नहि प्रधानन्याय एव सर्वत्राश्रयणीयो न्यायमिति नियमोऽस्तीति दिक्।

यत्तु वलीत्युक्तावपि अव्यवहितवल्परकाङ्गात्परस्यार्धधातुकस्येत्यर्थापत्त्या पुनरप्या-दिग्रहणस्य वैयर्थ्यप्रसङ्ग इति तन्न। अङ्गस्य प्रत्ययांशे उत्थिताकांक्षत्वेन वलस्तदन्वया-सम्भवात् न च गुणः। कृतात्मसंस्कारेति न्यायेन वल्रूपपदार्थविशेषणविशिष्टस्यङ्गस्या र्धधातुकेन विशेषणान्न दोषः। **"श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्"** इति न्यायेन विशेषणातयाऽपि तदन्वयासम्भवात्[४०७]। यदपि वस्तुतस्तु वल्यार्धधातुकस्येत्युच्यमाने अङ्गाक्षेपपूर्वकं षष्ठीप्रकल्पनायां तत्सामानाधिकरण्योपगमेन तदादि ग्रहणं प्राप्तम्। ततः

---

[404] औपदेशिक F1, G2 : अधवैपदेशिक G1

[405] कितीति F1, G2 : किति G1

[406] विशेषणविशेष्यताया F1, G2 : परविशेषणत्ववदत्रापितीत्यत्र G1

[407] तदन्वयासम्भवात् F1, G2 : तदन्वयसम्भवात् G1

पूर्वमेव तस्मिन्नित्यनेन वलिपरे यथाऽर्धधातुक[408] तस्येत्यर्थः[409]। प्रसङ्गाद्भाविष्यतीत्यादावेव स्यान्न तु भवितेत्यादाविति कथमादिग्रहणवैयर्थ्यशङ्का। "तीषसह" (७-२-४८) इत्यत्र इच्छत्याद्यन्त पञ्चम्यास्साक्षाच्छ्रवणेनाक्षेपाभावात्परत्वातस्मादित्यनेन बाधात्तस्मिन्नित्यनेन संस्कार इति तकारपरार्ध धातुकस्येत्यर्थो न प्रसज्यत इति तन्न। "आर्धधातुकस्येड्वलादेः" (७-२-३५) इत्यस्याङ्गाधिकारस्थत्वेन तदाक्षेपस्य[410] निष्प्रयोजनत्वात्। न चाङ्गाधिकारस्य षष्ठ्यन्तस्य सत्त्वेऽपि वलीत्यस्य षष्ठ्यन्तत्वकल्पनाय पञ्चम्यन्ततदाक्षेपावश्यकत्वमिति[411] वाच्यम्। प्रत्ययविधौ तस्य पञ्चम्यन्तत्व कल्पनावश्यकत्वेऽपि अत्र "अतो भिस् ऐस्[412]" (७-१-९) इत्यादाविवाङ्गसंज्ञानिमित्तस्य आर्धधातुकस्येति अर्थे निस्तारात्। न च तथापि गुणः कृताकृतेति न्यायेन वा आर्धधातुकविशेषत्त्वाद्वलपरकार्धधातुकस्याङ्गसंज्ञा-निमित्तस्य इत्यार्थापत्त्यादिग्रहणं सार्थकमिति वाच्यम्। तथा सति "श्र्युकः किति" (७-४-११) इति "नेड्वशि कृति" (७-२-८) इत्यादिनां वैयार्थ्यापत्त्यापाहितस्यानिरोधेषु[413] "शमिता यज्ञे" (६-४-५४) इत्यादिनिर्देशेन च सेना सुराच्छायेति निर्देशेन दीर्घादिति पञ्चम्याः षष्ठ्यन्तत्वकल्पनावत् वलीति सप्तम्या षष्ठ्यन्तत्वकल्पनेन तस्मिन्निति परिभाषया अप्रवृत्तेर्यत्किञ्चिदेतत्। वस्तुतस्तु "येन विधिः" (१-१-७१) इत्यास्याप्रवृत्तौ तदन्तविध्युत्तरं

---

[408] यथाऽर्धधातुकम् F1, G2 : यधार्धधातुकम् G1

[409] तस्येत्यर्थः F1, G1 : तस्येदित्यर्थः G2

[410] तदाक्षेपस्य F1, G2 : तदाक्षेपेन G1

[411] पञ्चम्यन्ततदाक्षेपावश्यकत्वमिति F1, G2 : तदाक्षेपावश्य G1

[412] ऐस् F1, G2 : एधि G1

[413] वैयार्थ्यापत्त्यापाहितस्यानिरोधेषु F1, G1 : वैयार्थ्यप्रत्यापाहितस्यानिरोधेषु G2

सामानाधिकरण्येनान्वययोग्यतायाऽपि निमित्तत्वेन तदपवादभूतस्य यस्मिन्विधिरित्य-स्यापि उत्सर्गसमानदेशापवादन्यायेन तदादिविद्ध्युत्तरं समानाधिकरण्येनान्वययोग्यता स्थलेऽपि पूर्वमेव प्रवृत्तेर्वलित्यस्य [४१४] विभिन्नविभक्तिकत्वेऽपि षष्ठीकल्पनपूर्वकं [४१५] सामानाधिकरण्याय षष्ठ्यन्ततत्वकल्पनव्यत्ययेत्यन्यत्[४१६]। तस्मिन्नित्यस्य तपरिशिष्टपदार्था-हारेणैव शैषिकाधिकरणसप्तम्यवगमोत्तरमेव प्रवृत्त्या ततः पूर्वमेव तदादिविधिप्रवृत्त्या-वादिग्रहणं वैय्यर्थ्यात्तीषसहेत्यादाविवात्रापि धातोरिति पञ्चम्यवलीत्यस्य षष्ठ्यन्तत्व-कल्पनेन समानाधिकरण्यावगम [४१७] इति तु न सम्यक्। आर्धधातुकग्रहणसत्वे धातोरित्यनुवृत्तौ प्रयोजनाभावात् । भाष्यकृता तु "ऋत इद्धातोः" (७-१-१००) इत्यतषषष्ठ्यन्त धातुग्रहणमनुवर्त्य [४१८] लूभ्यां पूभ्यामित्यादाविटान्निर्वार्यार्धधातुकग्रहण-प्रत्याख्यातमित्यन्यत्। यदपि नचैवं सति कारनाम्नि [४१९] च प्राचां हलादावादि-ग्रहणवैयर्थ्यप्रसङ्गः। क्वचिद्वल्ग्रहणे [४२०] सप्तम्यन्तस्य विशेष्यतापीत्यर्थे तात्पर्यग्रहणक-त्वात् [४२१] । अत एव औतोंशसोरित्यादावमोऽवयवेऽचीत्यर्थो न त्वजादावमिति।

---

414 प्रवृत्तेर्वलित्यस्य F1, G2 : प्रवृत्तेवलीत्यस्य G1

415 षष्ठीकल्पनपूर्वकम् F1, G2 : कष्ठीकल्पनपूर्वकम् G1

416 षष्ठ्यन्ततत्वकल्पनव्यत्ययेत्यन्यत् F1, G2 : षष्ठ्यन्तकल्पनव्यत्ययेत्यन्यत् G1

417 समानाधिकरण्यावगम F1, G1 : समानाधिकरण्य G2

418 अनुवर्त्य F1, G2 : अनुवत्य G1

419 कारनानि G1 : कारनाम्नि F1, G2 :

420 क्वचिद्वलग्रहणे F1, G2 : क्वचिद्वग्रहणे G1

421 तात्पर्यग्रहणकत्वात् F1, G2 : तात्पर्यकत्वात् G1

"गमिच्छति", "गव्यति" इत्यादौ वर्णप्राधान्येन प्रत्ययलक्षणादात्वं न यत्वेवमादौ तदादि विध्याश्रयणे एकदेशस्ससर्वस्य पदस्यप्रसज्येति शेखरस्तत्र। तत्र निर्दिश्यमानपरिभाषाया दीषाभावादिति तच्चिन्त्यम् । अमादेनिर्दिश्यमानत्वेन तया स्थानिवत्त्वावारणात् तन्मते "आदेः परस्य" (१-१-५३) इति परिभाषाबाध्यत्वेन तस्याप्रवृत्तेश्चेत्यन्यत्र विस्तरः। नन्वजातिग्रहणं कर्तव्यम्। पञ्चगर्गरुप्यं पञ्चगर्गमयमित्यत्र लुङ्माभूदिति भाष्ये। तद्रात्यावितरविहित यते तु लुग्येन विधिस्तद्वहतीति सूत्रस्भाष्यसंमतः सिध्येदित्या-शंक्याजादिग्रहणं कर्तव्यमिति भाष्यस्य "गोत्रोऽलुक्" (४-१-८९) इत्युत्तरसूत्रादचीत्यवकृष्यं वाक्यभेदेन व्याख्यानाद्धलादेरपि कस्यचिल्लुगिति तात्पर्येणादोषादित्युद्योते समाहितम्। तदेतद्ग्रन्थविरुद्ध [422] विशेषणविशेष्ययोरुभयोस्सप्तम्यन्तत्वाभावेन तदादिविधेरप्राप्तेरिति चेन्न। सप्तम्यन्तशब्दस्वरुपमध्याहृत्य तदादिविधिप्रवृत्तेरिति केचित्।

अपरे तु अजादिग्रहणं कर्तव्यमित्यादिग्रहणमात्रं कर्तव्यमचीत्यपकृष्य व्याख्येयमिति विवरणतात्पर्यामिति वदन्ति। अन्ये तु प्रातिपदिकात्परस्मिन्ततद्धितावयवेऽपि सति प्रत्ययस्य लुंग्विधीयमानः प्रत्यासत्त्या [423] तस्यैवाजादेस्तद्धितस्येति व्याख्यानान्न दोष इत्यादिग्रहणमपि न कर्तव्यमित्यु द्योतेतात्पर्यमित्याहुः। नन्वेवमपि "हुझल्भ्योः हेर्धिः" (६-४-१०१) इति सूत्रस्थभाष्यविरोधः। तत्र रुदिहीस्त्यादौ "हुझल्भ्योः हेर्धिः" (६-४-१०१) इति धित्वं प्राप्नोतीत्याशंक्य "घसिभसोर्हलि" (६-४-१००) हलादेर्हेरित्यर्थेन परिहृतम्। तत्रोभयोविशेषणविशेष्ययोस्सप्तम्यन्तत्वाभावाद्विरोध इति चेन्न। प्रत्यये इति सप्तम्यन्त-मङ्गेनाक्षिप्य तदादिविधिरिति केचित्। अचिपिलोपस्येष्ठत्वेन पूर्वसूत्र हलीत्यस्य

---

[422] तदेतद्ग्रन्थविरुद्ध F1, G2 : विरुद्ध इति नास्ति G1

[423] प्रत्यासत्त्या F1, G1 : प्रत्यासत्या G2

निरुपयुक्तत्वेन इहार्थवत्वं वाच्यम्। इहापि येर्धर्हलन्तत्वासंभवाद्विशेष्यस्य सप्तम्यन्तत्वाभावेन तदादिविधेरप्राप्तप्त्या सम्बन्धः तर्हि व्यर्थस्यादिति तत्सामर्थ्याद्विशेष्यस्यसप्तम्यन्तत्वाभावेऽपि तदादिविधिः। न चैवमपि विभिन्नविभक्तित्वात्सामानाधिकरण्येन सम्बन्धासम्भव इति वाच्यम्। हलोति सप्तम्याः षष्ठ्यन्तत्वप्रकल्पनादित्याहुः। वस्तुतोनिर्दिश्यमानपरिभाषाया भाष्यकृतैव दोषवारणात्पूर्वसूत्रे हलीत्यस्य प्रत्याख्यानाच्च। एतद्भाष्यमेकदेश्युक्तिरिति बोध्यम्। एतेनोभय विरोधाच्चिन्त्योऽयं ग्रन्थ इत्यापास्तमिति दिक्।

**सर्वो द्वन्द्वो विभाषैकवद्भवति॥ ३४॥**

द्वन्द्वश्चेत्यादिप्रकरणविषयस्याप्य [४२४] अनया वैकल्पिकत्वबोधने उभयरूपस्य प्रयोगस्य "चार्थे द्वन्द्वः" (२-२-२९) इत्यनेन सिद्धत्वात्प्रकरणवैय्यर्थ्यापत्तिः। अतः तदविषयत्वम्। न च तत्र प्राण्यङ्गादिनामेव समाहार इति नियमेन सार्थक्यं प्रकरणस्येति वाच्यम्। तथासति तिष्यपुनर्वसूनां प्राणिनां द्वन्द्वे बहुवचनस्य द्वित्वविधायके तिष्यपुनर्वस्वोरित्यत्र बहुवचनग्रहणवैयर्थ्यापातात्। तेन च्व्यर्थेन बहुवचनग्रहणेन प्राण्यङ्गादीनां [४२५] समाहार एवेति नियमाबोधनद्वारा तद्यतिरिक्त सर्वद्वन्द्वस्योभयरूपता [४२६] बोध्यत इति। एतेषां भाष्योक्त प्राणित्वपक्ष बहुवचनग्रहणस्य सामर्थ्यम्। नन्वेतेषामथवेत्यादिभाष्यसम्मतं प्राणित्वपक्षेऽप्राणिजाति- वाचकत्वेन प्राण्यङ्गादित्वात्तस्य च समाहार एवेति नियमेन नित्यैकवचनान्तत्वात् बहुवचनाभावेन सूत्रं

---

[424] द्वन्द्वश्चेत्यादिप्रकरणविषयस्याप्य F1, G2 : द्वन्द्वश्चेत्यादिप्रकरणविषयस्यापि G1

[425] प्राण्यङ्गादीनां F1, G2 : प्राण्यङ्गादीनाम् G1

[426] सर्वद्वन्द्वस्योभयरूपता F1, G2 : सर्वद्वन्द्वभयरूपता G1

निर्विषयमित्याशंकति। **न चैवमिति**। तद्वैकल्पिकेति जातिप्राधान्यद्विवक्षायामय न्नियमोनतु व्यक्तिप्राधान्यविवक्षायामिति तदभावे इत्येव फलितवैकल्पिकस्येत्यर्थः। तत्फलं तु "स्वरित" इति सूत्रस्थ क्षीरोदक इति भाष्यप्रयोगे एकवद्भावाभावः। तथा चात्र व्यक्तिप्राधान्येन [427] तदभावादेकवचनान्तप्रयोगाभागे न।सूत्रं व्यावर्तनाभावाद्यर्थं सत् बहुचनग्रहणमस्मिन्पक्षेऽप्युक्तनियमबोधनद्वारा परिभाषार्थज्ञापकमिति उभयसद्भावात् बहुवचनानां प्रयोगसत्वेन सूत्र सविषयम्। अन्यथा व्यावर्त्याभावेन बहुवचनग्रहणं व्यर्थमेव स्यादिति भावः। स्पष्टञ्चेदं "तिष्यपुनर्वस्वोः (१-२-६३) इति सूत्रे भाष्ये।

**सर्वे विधयश्छन्दसि विकल्यन्ते ॥३५॥**

छन्दसि दृष्टानुविधानादिति भावः। **योगविभागेनेति**। अन्यथा व्यत्यय एव बहुलस्स्यादितिभावः। **विभागेनेति**। अस्मिन्पक्षे बहुलग्रहणं न कर्तव्यम्।

**प्रकृतिवदनुकरणं भवति ॥३६ ॥**

**इयङिति** परिभाषाभावे धातुत्वात्स न स्यात्। **अनित्येति**। अन्यथा धातुत्वा-भावात्प्रातिपादिकनिबन्धनविभक्तिर्न स्यात्। तेन द्विः पचतीत्यादौ अतैत्तरीयाणां "तिङ्ङतिङ" (८-१-२८) इति निघातः। तत्रैव तैत्तिरीयाणामाद्युदात्तश्च नित्यत्वानित्य-त्वाभ्यां सिद्धः। अस्य "वाऽऽमि" (१-४-५) इत्यादौ विभक्तेर्लुगभावश्चानित्यत्वेन सिद्धमित्यन्यत्र विस्तरः।

**एकदेश विकृतमन्यवत्॥३७ ॥**

---

[427] प्राधान्येन F1, G1 : प्रधान्येन G2

इति श्रीमता वैयाकरणकुलतिलकेन मन्नुदेवेन प्रणीते दोषोद्धारणेति परिभाषेन्दु-शेखरव्याख्याने शास्त्रत्वसम्पादनोद्देशनामकमिति प्रथमं प्रकरणं समाप्तम् ॥

## { बाधबीजं नाम द्वितीयं प्रकरणम् }

**पूर्वपरनित्यान्तरङ्गापवादानमुत्तरोत्तरं बलीयः ॥ ३८ ॥**

**पुनः प्रसङ्गविज्ञानात् सिद्धम् ॥ ३९ ॥**

**सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ ४० ॥**

क्वचित् चरितार्थयोः इत्यनेन अपवादविषयपरत्वमुक्तम्। कार्यं कारोतीति सकृद्गति न्यायसाधको दृष्टान्तः । पूर्वान्वयी यदा तमित्यादि पुनः प्रसङ्गविज्ञानन्याय-साधकमग्रिमान्वयी [428] विनिगमकाभावः इति। ननु जातिपक्षे जातौ शास्त्रप्रवृत्तेः बाधितत्वात् [429] व्यक्तिद्वारा सा वाच्या द्वारभूता च व्यक्तिः शास्त्रान्तरप्राप्तिविषयत्वेन [430] यत्र युगपदुभयोः असंभवरूपवाधः तत् व्यक्तितरव्यक्तिरेव इति विनिगमकसत्त्वात् विरोधाधारभूतव्यक्तिविषयकत्त्वं न शास्त्रस्य इति उभयोरप्रवृत्तौ। परविध्यर्थं "विप्रतिषेधे परं कार्यम्" (१-४-२) इति सूत्रमिति। पुनः प्रसङ्गन्यायसिद्धिरिति कैयटोक्तं युक्तमेवेति चेन्न। व्यक्तीपक्षे व्यक्तीनामानन्त्यात् तत्र शक्तेर्ग्रहीतुमशक्यत्वेन [431] जात्युपलक्षितव्यक्तौ तद्ग्रहो [432] बोध्यः तादृशी च व्यक्तिर्विरोधाधारभूतापि व्यक्तिरिति।

---

[428] प्रसङ्गविज्ञानन्यायसाधकमग्रिमान्वयि F1, G2 : प्रसङ्गन्यायदृष्टान्तोऽग्रिमान्वयी G1

[429] बाधितत्वात् F1 : बोधकत्वात् G1, G2

[430] शास्त्रान्तरप्राप्तिविषयत्वेन F1, G2 : शास्त्रान्तरप्राप्तविषयत्वेन G1

[431] शक्तेर्ग्रहीतुमशक्यत्वेन F1, G2 : शक्तेर्गहीतुमशक्यत्वात् G1

[432] तद्ग्रहो G2 : तदुहो G1 : ग्रहौ F1

तत्र[४३३] शास्त्रद्वयस्य उद्देश्यतया युगपदसंभवेऽपि शास्त्रस्यावृत्त्या पर्यायेण प्रवृत्तिरिति त्वदभिहितरीत्या[४३४] जातिपक्षेऽपि **एकार्थास्तु विकल्पेरन्निति** न्यायेन युगपदसंभवेऽपि ण्वुलतृजादिवतपर्यायेण विना व्यावृत्तिविरोधाधारभूतव्यक्तिषु एव उद्देश्यता अवच्छेदकाक्रान्तविरोधात् एव विज्ञायते यथा अग्निरानीयतामित्युक्तेः चोदितपात्रद्वारैव अग्न्यानयवृत्तिः। तत्र अपि यथा तुषादिपात्राणां नद्वारता वोधितत्त्वादेवं[४३५] शास्त्रान्तरप्राप्तिविषयत्त्वेन यत्र युगपदुभयासंभवरूपबाधस्तद्यक्तेरपि ततोद्वारतेति। तत्र तदितरव्यक्तिषु चरितार्थेन शास्त्रद्वयेन न लक्ष्यसंस्कारं कुर्यादित्यपास्तम्। तृजादि दृष्टान्तस्य व्यक्तिपक्षविषयकत्वमेव इत्यत्र मानाभावात् युगपदुभयोः संभवरूप बाधेऽपि[४३६] न पर्यायेण कार्यप्रवृत्तिसंभवात् पात्रदृष्टान्तस्य वैषम्याच्च दृष्टान्तमात्राश्रयणेन पुनः प्रसङ्गन्यायादिसाधने सर्वांशसमभाष्योक्तदूतदृष्टन्तेनैव[४३७] तत्तसिद्ध्या जातिव्यक्ति-पक्षयोः उपादानस्य व्यर्थत्वाच्च। तस्मात् शास्त्रीयतृजादिदृष्टान्ताश्रयणेन सकृद्गति-न्यायसिद्धेः। लौकिकदूतदृष्टन्ताश्रयणेन पुनः प्रसङ्गविज्ञानसिद्धिरिति मूलोक्तमेव युक्तमिति "विप्रतिषेधे परं कार्यम्" (१-४-२) इति सूत्रे भाष्ये स्पष्टतरम्। तत्र लक्ष्यानुसारादिति यत्तु यत्र परशास्त्रप्रवृतौ पूर्वशास्त्रं प्रवर्तमानं पूर्वप्रवृत्तपरशास्त्रप्रवृत्तिं बाधते। तत्र जातिपक्षेऽपि **सकृद्गति** न्यायाश्रयणमेव न पुनः[४३८] प्रसङ्गविज्ञानान्तेन शिश्वियतुरित्यादौ

[433] तत्र F1, G2 : तच्च G1

[434] त्वदभिहितरीत्या F1, G2 : त्वदभिमतरीत्या G1

[435] सद्वारता वोधितत्त्वादेव F1, G2 : सद्वारताबोधकत्वादेवं G1

[436] बाधेऽपि F1, G2 : बोधोऽपि G1

[437] सर्वांशसमभाष्योक्तदूतदृष्टन्तेनैव F1, G2 : सर्वांशसम्मतभाष्योक्तदूतदृष्टान्तेनैव G1

[438] पुनः F1 : पुनः पुनः G1, G2

परत्वात् विभाषाश्वेरिति सम्प्रसारणविकल्पे वचि स्वपीति न भवति। स्पष्टश्चेदम् अचश्श्वेत्यत्र इत्यत्र प्रदीपे इति तच्चिन्त्यम्। “साक्षात्प्रभृतीनि च” (१-४-७३) इति सूत्रभाष्यविरोधापत्तेः।

तत्र हि च्व्यन्त[439] प्रतिषेधो वक्तव्यः। लवणीकृत्य न वा पूर्वेण कृतत्वात् न वा वक्तव्यं पूर्वेण कृतत्वात्। अस्त्वनेन विभाषा पूर्वेण नित्या भविष्यति इति भाष्ये उक्तः। पूर्वेणेति प्रतीकमुपादाय पुनः प्रसङ्गविज्ञानादिति भाव इति कैयटेनोक्तम्। त्वदुक्तरीत्या **सकृद्गतिदिति** न्यायविषयतायाः सत्त्वेन विरोधस्स्पष्ट एव। यद्यपि प्रदीपाभिप्रायवर्णेन[440] लवणशब्दे मान्ततत्वसन्नियोगेन वैकल्पिकि गतिसंज्ञोच्यते इति तदभावे ऊर्यादिच्वीति[441] नित्यायामपि गतिसंज्ञायां मान्ततत्वसन्नियोगशिष्टाया गतिसंज्ञाया अभावः । परत्वात् पूर्वप्रवृत्तोऽपि न बाधितो भवतीति शिश्वियतुरित्यत्रोक्तन्यायाद्विशेष इति। तदपि चिन्त्यम् । गतिसन्नियोगशिष्टत्त्वस्य मान्तत्वे सत्वेऽपि मान्तत्व-सन्नियोगशिष्टत्वस्य गतिसंज्ञायामाभावात्। अत एव भाष्ये लवणशब्दे मान्ततत्वगतिसंज्ञा सन्नियोगेन वक्तव्यमित्युक्तम् । अग्रे च अनेन विकल्पे गतिसंज्ञासन्नियुक्तं मान्तत्वं च प्राप्नोतीत्युक्तम्। लवणीकृत्येत्यत्र लवणीशब्दस्य लवणमिति मान्तादेशविधानेन परिहृतमिति त्वन्यत् सन्नियोगशिष्टत्वं च विधेयतया प्राकरणिकप्रत्ययादिविधेयाद्यनुवादेन विधिविषयत्वमेव प्रधानभूतविधेयस्य सन्नियोगशिष्टो विहितसमाख्यापि अत्र अर्थेऽनुगुणेति सन्नियोगशिष्टपरिभाषायां वक्ष्यामः। न च मान्तत्त्वे गतिसंज्ञा सन्नियोगशिष्टत्वे

---

439 च्व्यन्त F1 : च्यन्तस्य G1, G2

440 प्रदीपाभिप्रायवर्णेन F1, G2 : प्रदीपाभिप्रायवर्णनं G1

441 ऊर्यादिच्वीति G1, G2 : उर्यादिन्वीति F1

गतित्वेऽपि मान्तत्व सन्नियोगशिष्टत्वमस्त्वेवेति वाच्यम्। तथा सति मान्तत्त्वभावाभाव-प्रयुक्तौ गतित्त्वाभावाभावौ स्याताम्। तौ च न संभवतः। अनुवृतविभाषापदस्य[४४२] गतिसंज्ञाया सम्बन्धरूपमान्तत्त्वे विभाषापदसम्बन्धे तु विभाषापदस्य क्लृप्तसंबन्धा त्यागात् क्लुप्तसम्बन्धयोरापत्तिः वाक्यभेदस्य उभयवादिसिद्धत्वेऽपि साक्षात्शब्दादीनां मान्तत्त्वविधानाभावेन तत्र गतिसंज्ञायां विकल्पार्थं विभाषापदस्य गतित्वेऽपि सम्बन्धापत्तिश्च तस्मात् वैकल्पिकगतिसंज्ञाभावपक्षे नित्ययां गतिसंज्ञायां पूर्वप्रवृत्तपर-शास्त्रस्य अभावां शमादाय बाधसत्त्वात् **सकृद्गतिन्याय**विषयतायाः सत्त्वेन पुनः प्रसङ्गविज्ञानस्वीकारपरभाष्यकैयटविरोधापत्तिर्दुष्परिहरा "अतश्च" (४-१-१७५) इति सूत्रभाष्यन्तु यथाश्रुतेऽपि सुयोजन्तत्रत्यकैयटस्तु विन्त्य एव इति अन्यत्र विस्तरः। यत्तु एतेन **सकृद्गति**न्यायश्रयेण भिन्धि[४४३] इत्यत्र परत्वात् अताङा बाधितो धित्वं न स्यादिति शेखरोक्तम् इष्टापत्तिग्रासात् "स्थानिवदादेशोऽनल्विधौ" (१-१-५५) सूत्रभाष्याननुगुणत्वात् वालप्रतारणामात्रमिति मन्तव्यम्। भिन्धीत्यादेः तातङभावपक्षे सिद्धत्वादिति चिन्त्यम्। सिद्धत्वाच्चेति तन्न भिन्धकीति पाठसत्त्वेन तथापाठस्य एव अभावात्। अत एव "अचश्च" (१-२-२८) इति सूत्रे भाष्ये यत्रहि पूर्वोविधिः पूर्वप्रवृत्तिः परविधिं न बाधते। तत्र पुनः प्रसङ्गविज्ञानमिति कैयटमुपादाय यथा भिन्धकीत्यत्र परत्वात्द्धौ कृते पुनः प्रसङ्गविज्ञानात् अच इत्युद्योतः सङ्गच्छते सत्यपि तथापाठे दोषाभावस्य गदायां गुरुचरणैः प्रतिपादितत्वात्[४४४] च्चेति दिक्।

---

[442] अनुवृतविभाषापदस्य F1, G2 : अनुवर्तमानविभाषापदस्य G1

[443] भिन्धि G1, G2 : मिद्धि F1

[444] प्रतिपादितत्वात् F1 : सिद्धात्वाच्चेति G1, G2

**विकरणेभ्यो नियमो बलीयान्॥ ४१॥**

शबादिभ्यस्तु पूर्वमेवेति कर्त्रादौ सार्वधातुके पदे[445] तद्विधानात् नियम इति नियमत्त्वेन अन्याभिमतो वाक्यैक वाक्यतया विधिरित्यर्थः। अस्मिन्पक्षे एवमेव व्याख्येयत्वात् पूर्वमते तु स्यादेः परत्वात् लादेशेषु कृतेष्वनियमात् पूर्वं परत्वेन स्यादेरेव शपोऽपि प्राप्तत्वादिति बोध्यम्। एकवाक्यतया विधानपक्षे एव स्यादिभ्यो लादेशानामन्तरङ्गत्वमात्राश्रयणेन पक्षान्तरमाह यद्वेति। एकवाक्यतया विधानप्रतिबन्धे द्विविधेऽपि संज्ञाया आदेशानां विधानाद्विहितानां च संज्ञाविधानात् प्राप्तमन्याश्रयदोषं परिहरति। आत्मनेपदशब्दादाविति एकवाक्यतया विधानवादि विहितानां नियम इति प्रागुक्तं पक्षद्वयं[446] दूषयति भिन्नवाक्येति गौरवमिति । गौरवत्रयमित्यर्थः। यदि तु लुगादिनेव[447] नियमेन अपि अनुत्पत्तिरेव अन्वाख्यायते तदोक्तपक्षयोरपि दोषाभावः इत्यत आह। अन्यत्र विस्तर इति कृताकृतप्रसङ्गिनित्यं तदुदाहरति। अत एव तुदतीति तद्विपरीतमनित्यमित्यस्य प्रपञ्चमाह[448] यद्यक्तीति ।

**शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति॥ ४३॥**

---

[445] पदे F1 : परे G1, G2

[446] पक्ष F1 : पक्षं G1, G2

[447] लुगादिनेव F1 : लिङ्गादिनेव G1, G2

[448] प्रपञ्चमाह G1, G2 : प्रभेदमाह F1 :

इदानीं तुदतीत्यस्य नित्योदाहरणात्वात्संभवेऽपि गुणान्नित्यैकादेश इत्याशयेन “सार्वधातुकमपित्” (१-२-४) इति सूत्रभाष्योदाहृते च्यवन्ते इत्यादौ प्रयोजनं बोध्यम्। प्रथमोदाहरणं तु तुदतीत्यादौ एतत्तुल्यन्यायेनेति ।

**शब्दान्तरात्प्राप्नुवतः शब्दान्तरे प्राप्नुवतः च अनित्यत्वम्॥ ४४॥**

प्रथमोदाहरणं तु तुदतीत्यादि गुणे कृते शब्दान्तरात् प्राप्तेः लक्ष्यानुसाराच्च क्वचित् कृताकृतेति वक्ष्यमाणया बाध इत्यन्यत् द्वितीयोदाहरणं करिष्यति इत्यादि लादेशे कृते स्यादीनां शब्दान्तरे प्राप्तत्वेन अनित्यत्वात्परत्वात् इतिबादय एव ।

**लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः॥ ४५॥**

“असिद्धवदत्राभात्” (६-४-२२) सूत्रे इति तत्र हि कुर्व इत्यादौ लघूपधगुणोकार-लोपयोः प्राप्तौ नित्यत्वात् उकारलोपः। गुणस्तु लोपे कृते **प्रत्ययलक्षणेन प्राप्नोतीति** अनेन न्यायेन अनित्य इत्युक्तम्।

**क्वचित् कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता ॥ ४६॥**

**यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदपि अनित्यम्॥ ४८॥**

लक्षणान्तरेण शास्त्रेण ननु लक्षणान्तरेण प्राप्नुवन्नितिवत् अतिदेशशास्त्रेणेति। सप्तमे इति “स्वमोर्नपुंसकात्” (७-१-२३) इति सूत्रे इत्यर्थः। तत्र हि तत्कुलमित्यत्रात्त्वलुकोः प्राप्तयोः परत्वात् अनित्यत्वात् लुगित्युक्ते अनित्यो लुग् न हि कृते अत्वे प्राप्नोति अमाबाधात् इति भाष्यमुपादाय[449] कैयटेनोक्तम्। एवं च पूर्वं क्वचिदिति अस्याः

[449] भाष्यमुपादाय F1 : भाष्यव्याख्यावसरे G1, G2

प्रपञ्चभूता । अपरा तु[४५०] पदव्यक्तीत्याद्यर्थक[४५१] कृताकृतेत्यस्याः प्रपञ्चभूता । शब्दान्तरात् इति अस्या प्राप्तेः। क्रमेण[४५२] तद उपष्टभकमाह बलीति। "लुँटः प्रथमस्य डारौरस" (२-४-८४) इति सूत्रे श्वः कर्तेत्यादौतास्यनुदात्तेदिति निघातडादेशयोः प्राप्तौ डादेशस्य अनित्यत्वमुक्तम्[४५३]। इत्यन्यत्र विस्तरः।

**स्वरभिन्नस्य च प्राप्नुवन् विधिरनित्य ॥ ४९॥**

**असिद्धं बहिरङ्गमन्तरङ्गे ॥ ५० ॥**

अन्तः पदार्थमाह मध्ये इति । मध्ये इत्यस्य सापेक्षत्वात् आह बहिरङ्गशास्त्रीयेति अन्तर्भूतानीति शेषपूरणं लभ्यम्। परिभाषास्थान्तः शब्दस्य अन्तर्भूतान् इत्यार्थकत्त्व-मन्तर्भूतत्वस्य साकांक्ष्यत्वादाहबहिरङ्गशास्त्रीयेत्यादि शेषपूरणं लभ्यमिति सूचितम्। बहिरङ्गपदे तथैव प्रतिपादनात् तेनार्थेनिमित्तकस्येति। ननु **समानाधिकरणसमासात् बहुव्रीहिः विप्रतिषेधेन** इति वार्तिकस्य खण्डनायान्तरङ्गः कर्मधारयः कान्तरङ्गता स्वपदार्थे कर्मधारयोऽन्तरङ्गः। अन्यपदार्थे बहुव्रीहिः बहिरङ्ग इति "वर्णो वर्णेन" (२-१-६८) इति सूत्रभाष्यविरुद्धमेतत् अर्थकृतबहिरङ्गत्वस्य आश्रयणादिति चेन्न। तस्य एकदेशयुक्तित्वेन अदोषात्। तथा हि "शेषो बहुव्रीहिः" (२-२-२३) इति सूत्रे **समानाधिकरणानां**

---

[450] अपरातु F1 : परा तु G1, G2

[451] पदव्यक्तीत्याद्यर्थक F1 : यद्युक्तीत्यार्थिक G1, G2

[452] क्रमेण G1, G2 : ऋमेण F1

[453] डादेशस्य अनित्यत्वमुक्तम् F1 : डादेश नित्यत्वमुक्तम् G1, G2

**बहुव्रीहिरिति** वदतो वार्तिककारस्य “वर्णो वर्णेन” (२-१-६८) इति सूत्रे समानाधिकरणसमासाद्बहुव्रीहिः विप्रतिषेधेन इति कथनं व्याहतम्। अनेकमन्यपदार्थे इति बहुव्रीहेः कर्मधारयाप्राप्तिविषयेः चारितार्थ्यात्। विप्रतिषेधप्रतिपादनावसरे कण्ठेकाल इत्यादौ बहुव्रीह्यवकाशप्रदर्शनपरा भाष्योक्तिरपि एकदेशिन एव सप्तमीविशेषणे इति ज्ञापकात्। तत्र व्यधिकरणविषये बहुव्रीहेः सिद्धत्वात् अग्रे च न एष युक्तो विप्रतिषेधोऽन्तरङ्गः समानाधिकरणसमासः बहिरङ्गो बहुव्रीहिरिति विप्रतिषेधखण्डक-भाष्योक्तिरप्येकदेशिन एवोक्तरीत्या बहुव्रीहेर्निरवकाशत्वेन बाधकत्वात्तद्विषये अन्तरङ्गत्वस्य दौर्वल्याद्विप्रतिषेधासंभवे एव वक्तव्ये इष्ट अस्य एव अन्तरङ्गत्व-कथनस्य अनुचितत्वात् च। अग्रे इष्टिप्रतिपादनमपि सिद्धान्त्येकदेशिनः इष्टसाधक-त्त्वेन सिद्धान्तिततत्वात्[454] निरवकाशत्वेन बहुव्रीहेः सिद्धौ इष्टेः अनुपयोगेन एकदेश्युक्तत्वादित्याहुः। वस्तुतस्तु अर्थनिमित्तकान्तरङ्गत्वे सर्वथा न आश्रीयते इति ज्ञापयितुं प्रसिद्धभाविनावेतावर्थाविति[455] “खरवसानयोर्विसर्जनीयः” (८-३-१५) इति सूत्रभाष्यादन्त रङ्गबहीरङ्गयोः तुल्यवदाश्रयणेन अन्तर्भूतार्थनिमित्तकान्तरङ्गत्ववत् निरूपितम्। बहिर्भूतार्थनिमित्तकबहिरङ्गत्वमाश्रीयते एव न आदेशान्तरङ्गनिरूपितम् अर्थकृतं बहिरङ्गत्वन्तु नाश्रीयते। यथा प्रकृते उक्तभाष्यादन्तरङ्गशब्दयोः घटकस्य अङ्गत्वमाश्रीयत एवानादेशान्तरङ्गनिरूपितमर्थकृतबहिरङ्गत्वं तु नाश्रीयते यथा प्रकृते युक्तभाष्यादन्तरङ्गशब्दयोर्घटकस्य अङ्गशब्दस्य समानार्थकस्यैव ग्रहणेन शब्द-निमित्तकस्य बहरिङ्गस्य तादृशान्तरङ्गनिरूपितस्य बहिरङ्गत्वमिति[456] अर्थनिमित्तकस्य

---

[454] सिद्धान्तिततत्वात् F1 : सिद्धान्तिनं G1, G2

[455] प्रसिद्धभाविनावेतावर्थाविति F1 : प्रतिद्वन्द्वीभावितावेतावर्थाविति G1, G2

[456] F1 (e) : G1, G2 (o)

च स्वीकारात्। अन्यथा शब्दनिमित्तकान्तरङ्गस्य अर्थनिमित्तकबहिरङ्गेन विरोधस्यैव अभावेन भाष्योक्त प्रतिद्वन्द्वित्वानापत्तेः। अत एव बहिर्भूतकर्त्रासाधनार्थक प्रत्ययापेक्षद्वित्वादितो अन्तरङ्गतरार्थोपसर्गनिमित्तक सुटोऽन्तरङ्गत्वं[457] मूलकृतैव[458]। वक्ष्यति[459]। "अचः परस्मिन्पूर्वविधौ" (१-१-५६) इति सूत्रभाष्यस्थितमनुष्योयमिति लोकन्यायसिद्धत्वमस्याः अर्थानामपीत्यादिना तत्रापि पूर्वोपस्थितजात्याद्यर्थनिमित्त-कान्तरङ्गत्वस्य परोपस्थितलिङ्गाद्यर्थनिमित्तककार्येषु सत्त्वात् विशेषापेक्षात् सामान्यापेक्षमन्तरङ्गमिति अस्य खण्डनप्रस्तावे समुद्धृतमनुप्सूत्रस्थ भाष्यविरोधा परिहाराय तस्य एकदेशयुक्तत्वावश्यकत्वे नैव अर्थकृतवहिरङ्गत्वाश्रयण् प्रयुक्तविरोध-स्यापि परिहारः संभवतीति स एव कृतः। न तु उक्तं सूक्ष्मेऽक्षिका कृतेति न तद्विरोध उद्भावनीयः एकाजिति कर्मधारयो न बहुव्रीहिर्वितिपदार्थप्रधानत्वेन अन्तरङ्गत्वादिति "निपात एकाजनाङ्" (१-१-१४) इति सूत्रस्थशेखरे अपि व्याख्यात इति दिक्। एतेन "वर्णो वर्णेन" (२-१-६८) इति सूत्रभाष्यविरोधमस्या लोकन्यायसिद्धत्वप्रतिपादक "अचः परस्मिन्पूर्वविधौ" (१-१-५६) इति सूत्रभाष्यविरोधं च अपादयन् कश्चिन्नानुमन्तव्यः। पदयोजनात्वित्थम्। अत्र बहिरङ्गपदे शब्दशास्त्रे शब्दनिमित्तकान्तरङ्गशास्त्रे तस्यैव शब्दस्यैव तेन प्राधान्येन तत्रेति शेषः शब्दनिमित्तकान्तरङ्गशास्त्रस्थले इति तदर्थः। तेनार्थकृतान्तरङ्गस्थले अर्थकृतं बहिरङ्गत्वम् अस्त्येवेति बोध्यम्। अत एव शब्दकृतान्तरङ्गनिरूपित अर्थकृतार्थबहिरङ्गत्वस्य अनाश्रयणादेव अन्यथा तदसङ्गतिः स्पष्टैवेति न तिस्ह इति निषेधासङ्गतिरित्यर्थः। यत्तु त्रिशब्दार्थसमवेतसंख्यासमर्थके आमि

---

[457] सुटोऽन्तरङ्गत्वम् F1 : लुकोऽन्तरङ्गत्वम् G1, G2

[458] मूलकृतैव F1 : मूलकृदेव G1, G2

[459] वक्ष्यति G1, G2 : वक्ष्यति वक्ष्यति F1

त्रयादेश इत्यर्थकस्य त्रेस्त्रय [४६०] इत्यस्य माधवमते [४६१] गौणेऽप्रवृत्त्यापि प्रियतिसृणामित्यादौ निषेधस्य चरितार्थत्वादन्तरङ्गप्रवृत्युत्तरं बहिरङ्गप्रवृत्तेः सर्वसंमतत्वेन त्रयादेशे कृते स्थानिवद्भावात्तिस्त्रादेशे दोषाभावाच्च। वस्तुतस्तु षष्ठीबहुवचनरूप-विशेषसापेक्ष्यत्वात् त्रयादेशस्य नान्तरङ्गत्वमिति तच्चिन्त्यम्। एतत्तदोरित्यादौ अर्थकारकसम्बन्धाश्रयणे नञ् [४६२] समासग्रहणस्य लिङ्गत्ववदत्र तथा अर्थाश्रयणे [४६३] प्रमाणाभावात्। षड्भ्यो लुगित्यादाविव वहुवचनादेरभावाच्च स्थाननिरूपितसम्बन्धस्य अन्तरङ्गत्वात् इति "षष्ठी स्थानेयोगा" (१-१-४८) इति परिभाषाबाधे मानाभावाच्च। षष्ठ्यान्तरात् परस्यैव कार्ये तथा अर्थाश्रयणाच्च लक्षणापत्तेश्च उक्तरीत्या अन्तरङ्गबहिरङ्गभावस्यैव अभावेन अन्तरङ्गप्रवृत्युत्तरमित्यस्यासंगतत्वाच्च [४६४]। त्रयादेशे कर्तव्ये अन्तस्य स्थानिवद्भावप्रतिषेधः इत्यर्थकस्य **स्त्र्यादेशे अन्तस्य प्रतिषेधः** इति वार्तिकस्य असङ्गति सङ्गाच्च। ईदृशे विषये अर्थकृतबहिरङ्गत्वाश्रयणं [४६५] कुर्वता त्वयापि त्रयादेशोत्तरं स्थानिवद्भावति स्त्रादेशोऽपितस्य "नामि" (६-४-३) दृष्ट्या बहिरङ्गत्वेन असिद्धत्वात् तिस्त्रिति निषेधः साथ्र्यक्यं वक्तुं [४६६] शक्यत्वाच्च विशेषापेक्ष्यात्

---

[460] त्रेस्त्रय G1, G2 : त्र्पेस्त्रय F1

[461] प्राचीनमते G1, G2 : माधवमते F1

[462] नञ् F1 : षष्ठी G1, G2

[463] तथा अर्थाश्रयणे F1 : तस्याश्रयणे G1, G2

[464] संगतत्वाच्च F1 (e) : G1, G2 (o)

[465] अर्थकृतबहिरङ्गत्वाश्रयणं F1 : अर्थरुपबहिरङ्गत्वाश्रयणं G1 : अर्थरुपबहिरङ्गत्वाश्रयणे G2

[466] स्थानिवद्भावति.........वक्तुं F1 (e) : G1, G2 (o)

सामान्यापेक्ष्यमन्तरङ्गमित्यस्य मूले एव दूषितत्वेन वस्तुतस्त्वित्यस्य असङ्गतत्वाच्च। यत्तु तत्रै तावदावेदनीयं प्रदर्शिता "अचः परस्मिन्पूर्वविधौ" (१-१-५६) इति सूत्रभाष्यात् प्रत्यङ्गवर्तिलोकन्यायसिद्धोयऽमर्थ इति यत्र युगपत् प्रत्यङ्गस्तत्रैव प्रवर्तमानो "वाह ऊठ्" (६-४-१३२) सूत्रीयासिद्धपरिभाषाया न सङ्ग्राहकः। जातस्य बहिरङ्गस्य पश्चात् प्रवर्तमाने अन्तरङ्गेऽसिद्धत्वमिति हितदर्थो धर्मिग्राहकमानसिद्धत्वादिति तच्चिन्त्यम "वाह ऊठ्" (६-४-१३२) सूत्रीयासिद्धपरिभाषार्थसंग्राहकत्वाभावेऽपि असिद्धपरिभाषायाजाततत्काल-प्राप्तिकबहिरङ्गसिद्धत्वबोधनेन लोकसिद्धान्तरङ्गन्यायस्य संग्राहकत्वात्। अत एव "विप्रतिषेधे परं कार्यम्" (१-४-२) इति सूत्रे भाष्येऽन्तरङ्गश्चेति वार्तिकस्य च बहूनिजात तत्कालप्राप्तिकबहिरङ्गविषयाण्युदाहरणानि दत्तान्येतस्याः परिभाषायाः प्रयोजनानि यदर्थं एषा परिभाषा कर्तव्या यानि सन्ति तानि प्रयोजनानि सैषा परिभाषा क्रियते। ननु चेयं च कर्तव्या। असिद्धं बहिरन्तरङ्गे । किं प्रयोजनं ? अचावेदं पचामेदं सिद्धत्वात् बहिरङ्गलक्षणस्य अन्तरङ्गलक्षणमेत्वं माभूदिति उभे तर्हि कर्तव्ये नेत्याहानयैव सिद्धमिहापि स्योनः स्योनेत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य गुणस्य अन्तरङ्गलक्षणो यणादेशो भविष्यत्युक्तम्। कैयटे अपि पचावेदमित्यन्तरङ्गबलीयस्त्वेन तन्न सिध्यति बहिरङ्गे कृते आद्गुणो एत ऐ प्राप्नोति। अनयैवेति। इयं हि व्यापिका पूर्वोक्तप्रयोजननिष्पात् शास्त्रासिद्धत्वाश्रयणाद्बहिरङ्गो न तावत् प्रवर्तते।

अन्तरङ्गलक्षणे तु प्रवृत्ते यत्र निमित्तसद्भावः तत्र बहिरङ्गलक्षणप्रवृत्तिः इत्युक्तम्। न च वक्तुं योग्यं शास्त्रसिद्धत्वाश्रयणादनयोरन्तरङ्गाश्चेत्यपूर्ववचनार्थ एव संगृह्यते न लोकसिद्धन्याय इति अविशेषेण भाष्यकैयटप्रवृत्तेः एकदेशविकृतमनन्यवत् इत्यादिव ल्लौकिकार्थस्यैव वार्तिकेन प्रतिपादनात् लौकिकन्यायात् वार्तिकस्य भेदाभावाच्च। तस्मात् असिद्धपरिभाषयैव तस्य क्रोडीकारः। तेन त्रैपादिके अन्तरङ्गे कार्येऽसिद्धपरिभाषायाः

पक्षद्वयेऽप्यप्रवृत्तेर्मूलकृतैव वक्ष्यमाणत्वात् तदेककृतान्तरङ्गन्यायस्याप्यप्रवृत्तिः। अत एव "अदसोमात्" (१-१-१२) इत्यत्र मात् प्रगृह्यसंज्ञायां तस्या सिद्धत्वात् एव एकादेशप्रतिषेधो वक्तव्यं इति भाष्येऽन्तरङ्गबलीयस्त्वादयावेकादेशेभ्यो पूर्वमूत्वमीत्वे न भवतः नाजानन्तर्य[467] इति निषेधाद्बहिरङ्गेष्वयादिषु अजानन्तर्याश्रयणादिति कैयटवक्ष्यमाणरीत्या अजानन्तर्य इति परिभाषाविषयत्वं मनसि निधाय त्रैपादिक अन्तरङ्गबहिरङ्गपरिभाषाया अप्रवृत्तिरिति कैयटाभिहितं तस्य चोक्तमाशयः। यत्तु त्रिपाद्यां न्यायप्रवृत्तेः अनिराकरणद्दतोतरमिति तच्चिन्त्यम्। शास्त्रीये परिभाषाया अप्रवृत्तौ न क्रोडीकृत-न्यायस्याप्यप्रवृत्तेः उक्तत्वात्। अत एव गतिबुद्धि इत्यादावकर्मकश्रुत्यान्तरङ्गद्रव्यकर्मण एव निषेधः प्रत्याख्यान[468] बहिरङ्ग कालादिकर्मण इति संगच्छते। संगच्छते च ल्यव्लोपे कर्मण्यधिकरणे चेत्यादौ प्रत्यासत्त्या ल्यप् प्रकृत्यर्थक्रियानिरूपितकर्माधिकरणयोरेव पञ्चमीत्यर्थः। अत्र शास्त्रीयकार्यस्य अन्तरङ्गस्य कस्यचित् कर्त्तव्यस्य अभावेन असिद्धपरिभाषाया अप्रवृत्तावपि लोकसिद्धान्तरङ्गन्यायेनैवलोके इव अत्रापि वाक्यार्थसाधने बाधकाभावात् प्रत्यासत्तेश्च अन्तरङ्गत्वमैव। यत्तु वाक्यार्थसंस्कारकस्य लोकसिद्धान्तरङ्ग-न्यायस्य त्रिपाद्यामपि प्रवृत्तौ फलोपवर्णनं धिच् झलो झलीत्यादौ[469] पदस्य इत्यनुवर्त्य प्रत्यासत्त्या निमित्तनिमित्तिनोरेकपदस्थत्वे एव लोपविधानात् पयो धावति सोमसुत्स्थातेत्पादौ न दोषः इति सङ्गीति तत्र न कर्तव्यमित्याकर इति तत्रैवमपि पयोधावनं सोमसमासे निमित्तनिमित्तिनोरेकपदस्थत्वेन प्राप्तसलोपस्यावारणात्।

---

[467] नाजानन्तर्य G1, G2 : नाप्येनकार्थे F1

[468] प्रत्याख्यान F1, G2 : प्रत्यासत्त्या G1

[469] झलो झलीत्यादौ G1 : फलोफलीत्यादौ F1, G2

अखण्डैकपदग्रहणे तु प्रमाणाभावः[470] । रषाभ्यामित्यादौ तु पदे इति निमित्तनिमित्तिनोरेक-पदस्थत्वलाभे सिद्धे समानग्रहणसामर्थ्यात्तदर्थलाभः। न च पदस्येत्यनुवृत्ति-समार्थ्यात्तदर्थलाभः इति वाच्यम्। तस्यासिद्धत्वोत् निषेधाप्राप्त्योत्वं संसाध्येहापि तर्हि प्राप्नोति सुश्रोता अत्र त्वमसीत्याशङ्क्य परिहृतमन्तरङ्गः अत्र प्लुतः बहिरङ्गमुत्वं वाक्यान्तरस्य वाक्यादाविति तद् एतत् विरुध्यते अन्तरङ्गस्य प्लुतस्य त्रैपादिकत्वेन परिभाषायाः तत्क्रोडीकृतान्तरङ्गन्यायस्य च शास्त्रीयकार्यस्य कर्तव्यत्वेन प्रवृत्तेरिति चेन्न। "खरवसानयोविर्सर्जनीयः" (८-३-१५) इति सूत्रस्थ भाष्यप्रामाण्येन त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषायाः **तत्क्रोडीकृतन्यायस्य** च अप्रवृत्तेः एतद्भाष्यस्य च पूर्वप्रतिद्वन्द्वितया एकदेशिनोक्तत्वात् अविरोधः। अत एव "प्लुतप्रगृह्या अचि नित्यम्" (६-१-१२१) इति सूत्रे भाष्ये देवदत्ता 'उ' अत्र त्वमसीत्यत्र असिद्धमिति प्लुतस्य असिद्धत्वाद्रुर्थेन प्लुतप्रकृति भाववचनेन तस्य सिद्धत्वज्ञापनद्वारा एकादेशात् प्लुते इति विप्रतिषेधेम् इति उक्तमन्यता सुश्रोता इति यत्र त्वमसीत्यत्र उक्तरीत्यात्रापि प्लुतस्य अन्तरङ्गत्वेन एकादेशस्य बहिरङ्गत्वेन तयोः विप्रतिषेधस्य असङ्गत्यापत्तेः। ययोऽदपयोदशालेन्द्र[471] इत्यादौ च त्रैपादिकयोः तु एकदेशयोरन्तरङ्गयोः सम्पादिका न वा बहिरङ्गलक्षणत्वादिति भाष्योक्तिस्तु युक्तैव । कैयटस्तु देवदत्त अत्र त्वमसि इत्येव प्लुतस्य अन्तरङ्गत्व-मभिधाय भाष्यन्दूषयन् चिन्त्य एव परिभाषायाः तदेकीकृतन्यायस्य च त्रैपादिके अन्तरङ्गेऽप्रवृत्तेः। वाक्यत्वसम्पादकएहीत्यादिपदान्तरसापेक्षत्वेन प्लुतस्य एकादेश-सम्मतत्वादिति उद्द्योत कृतः समाधानञ्च। ननु तदपेक्षया प्लुतादपि अत्र त्वमसीति वाक्यान्तरसापेक्षैकदेशस्य बहिरङ्गत्वमिति चेदत्राहुः। प्रकृते "दूराद्धूते च" (८-२-८४) इति

---

[470] प्रमाणाभावः F1 : प्रामाण्याभावः G1, G2

[471] पयोट् पयोदेत्यादौ G1 , G2 : ययोऽदपयोदशालेन्द्र F1

विषये एकादेशस्योत्वस्य चोक्तरीत्या परम्परया वाक्यसापेक्षत्वेपि गुरोः अनृत इति प्लुतविषये तदपेक्षणाद्वाक्यापेक्षणस्य वैषम्याभावात्तत्पपरिहारात्[४७२] पदापेक्षत्वात्तु प्लुतविषये एकादेशादेः सर्वत्रैवेति प्लुते वाक्यद्वारकतद्घटकपदापेक्षा सवर्णाज्-द्वारकतया पदापेक्षा। एकादेशादेरिति साम्यमेवेत्याशयात्। यद्वैकादेशे सवर्णाज्-द्वारकपदापेक्षमेव प्लुतोऽपि वाक्यद्वारकपदापेक्षत्वमेवेति साम्यमिवेत्याशयात्[४७३]। नचैवं सुश्रोता च असीत्यत्राप्युक्तरीत्या साम्यापत्तौ प्लुतस्यान्तरङ्गत्वप्रतिपादकोक्तभाष्य-विरोधापत्तिरिति वाच्यम्। तस्य एकदेश्युक्तित्वेन अदोषात्। एतेन प्लुतस्य अपि वाक्यत्वसम्पादकपदान्तरसापेक्षतयैकादेश समत्त्वमेवेति चिन्त्यमिति। अभिनवविवरणकारा यदूचुस्तदशुद्धं देवदत्ता अत्र त्वमसीत्यत्र वाक्यस्य टे प्लुतसिद्धये[४७४] एहीत्यादि-वाक्यशेषस्य प्राक्पूरणात् तदपेक्षप्लुतादपि अत्र च असीति वाक्यान्तरसापेक्षैकादेशस्य बहिरङ्गत्वमित्यपास्तमिति यत्तूक्तं भाष्यदूषककैयटे इति तच्चिन्त्यमित्युक्तं नत्वशुद्धमिति तत्र चिन्ताबीजं नाजान्तर्य इति निषेधात् देवदत्ता अत्र असीत्यादौ एकादेशात् प्लुतो विप्रतिषेधेनेति भाष्योपपत्तिरिति तच्चिन्त्यम्। **नाजानन्तर्य्ये... (परि-५१)** इति परिभाषाया असत्त्वात्। सत्त्वेतया जातबहिरङ्गासिद्धत्वस्यैव निषेधेन समानकालप्राप्तिक-बहिरङ्गासिद्धत्वस्य इति निखिलवैयाकरणसिद्धान्तविरोधाच्च। सुश्रोता अत्र असीत्यत्र प्लुतोत्वयोरन्तरङ्गबहिरङ्गभावप्रतिपादकस्य अतः "रो रि " (८-३-१४) इति सूत्रभाष्य-विरोधाच्च। इण् ङि शीनामाद्गुणः सवर्णदीर्घत्वात् शचङ्न्तस्यान्तरङ्गलक्षणत्वादिति

---

[472] वैषम्याभावात्तत्पपरिहारात् F1 : नैयात्यभावात् G1, G2

[473] साम्यमेवेत्याशयात् F1 : सत्यमेवेत्याशयात् G1, G2

[474] प्लुतसिद्धये F1 : प्लुतत्वसिद्धये G1, G2

वार्त्तिकविरोधाच्च। यत्तु यद्यप्ययजइ[475] इन्द्रमित्यादावयज इन्द्रमिति स्थिते उत्तरोपस्थिति यन्निमित्ते सवर्णदीर्घऽजानन्तर्य्यं सद्भावस्तथापि तस्य निमित्तविनाशसंभावनामादाय **अकृतव्यूहा...**(परि-५६) निषेधात् विधेयत्वेन **नाजानन्तर्य्ये...** (परि-५१) न प्रवर्तते इत्यन्तरङ्ग आद्गुणो निष्प्रत्यूहः तथाचेण् **ङिशीनामाद्गुणः सवर्णदीर्घत्वादिति** वार्तिकप्राप्ति कल्पद्वयो दोषः प्रयुक्त इति तच्चिन्त्यम्। **अकृतव्यूहा...** (परि-५६) मूलकृन्मतेऽसत्त्वात्सत्त्वे वा यदि गुणस्यात्तर्हि सवर्णदीर्घोनस्यादिति निमित्तविनाशसंभावनामादाय तथैव सवर्णदीर्घवारणस्य सिद्धत्वादन्तरङ्गत्वम् अभिप्रायेण ङिशीनामाद्गुणः सवर्णदीर्घत्वादिति वार्तिककृदुक्ति वैयर्थ्यापातानाच्च। न तु अनया परिभाषाया संभावितनिमित्तविनाशामादाय सवर्णदीर्घाप्राप्तौ **नाजानन्तर्य्ये**...(परि-५१) इति परिभाषानिमित्तस्य त्वदुक्तविधेयस्य **नाजानन्तर्य्ये**...(परि-५१) इति परिभाषाया अप्रवृत्तौ वार्तिककृदुक्तमन्तरङ्गत्वं युक्तमेवेति चेत् । एवन्तर्हि **नाजानन्तर्य्ये**... परिभाषाया भाष्योक्तम् उदाहरणे धूर्हिरण्यं द्यूरित्यादौ यणादेशेऽजान्तर्याश्रयणे प्यूडपेक्षयोत्तरोपस्थितिमन्निमित्तकत्वाभावात्, ऊठि पक्षपेक्ष-योतरापस्थितिमति तन्निमित्तकत्वे अपि अजानतर्यनाश्रयणाद्भाष्यासङ्गत्यापत्तेः। अधीत्य प्रेत्येत्यादौ सवर्णदीर्घेऽप्यजानन्तर्य्य सत्त्वेऽपि तुगपेक्षयोत्तरोपस्थितिमन्निमित्तकत्वा-भावात्। तु कि दीर्घापेक्षयोत्तोरपस्थितिमन्निमित्तकत्वेप्यजानन्तर्यानाश्रयणे ज्ञापकपर विप्रतिषेधसूत्रभाष्यासङ्गत्यापत्तेश्च। धर्मिग्रहकमानात् जातिबहिरङ्गासिद्धत्वस्य एव अनया निषेधाच्च। एतेन देवदत्ता उ अत्र चसीत्यत्र प्लुते कृते पश्चादेकादेशं बाधित्वाप्राप्ते प्रकृतिभावे अजानन्तर्याश्रयणे अन्तरङ्गपरिभाषा न प्रवर्तते इति। नाजानन्तर्य परिभाषार्थ-निष्कर्षस्य वक्ष्यमाणत्वात् सूश्रोता उ अत्र असीत्यत्र तु प्लुतेऽप्लुतेऽप्लुतेऽप्लुतादिति निषेधादतो रोरित्यस्य तदुपसर्जनीभावात् नाजानन्तर्याश्रयणमिति विशेषादित्यपास्तम्।

---

[475] यद्यप्ययजइ G1, G2 : पघप्ययजे F1

उक्तभाष्यविरोधादेवं परिष्कारस्य एव कर्तुमशक्यत्वादिति नाजान्तर्यपरिभाषायां विशेषतो वक्ष्यामः। एवं संज्ञाकृतान्तरङ्गबहिरङ्गभावस्थलोऽपि अन्तरङ्गबहिरङ्गयोः उभयोरङ्गशब्देन संज्ञारूपकनिमित्तकादन्तरङ्गबहिरङ्गभावस्थलेपि अन्तरङ्गबहिरङ्गयोः उभयोङ्गशब्देन संज्ञारूपकनिमित्तग्रहणेनान्तर्भूतः संज्ञानिमित्तकान्तरङ्गनिरूपितबहिर्भूतसंज्ञानिमित्तक बहिरङ्गत्वस्य स्वीकारान्न दोष। संज्ञयोरन्तर्भूतत्वं च लक्ष्यस्थितसंज्ञिद्वारकम् यथा स्योन इत्यत्र गुणादेशोभयत्र्यऽन्तरङ्ग[476] इति विप्रतिषेधसूत्रभाष्ये प्रदर्शितम्। तत्र सि ऊ न इति स्थिते यण् सूत्रोपस्थिते संज्ञाबोध्यपूर्वनिमित्तकपरमपेक्षया गुणविधायक सूत्रोपात्तर्द्धधातुकसंज्ञा बोध्यपरोपस्थिते न प्रत्ययनिमित्तकपूर्वोपस्थितान्तरङ्गत्वमादाय भाष्ययोजनन्तु न संभवति। पूर्वापरोपस्थितयोर्निमित्तयोः सूत्रस्थितसंज्ञाबोधकत्वात्। ईदृश संज्ञाकृतान्तरङ्गभावस्तु नाद्रियते। यथा गौधेरः पचेरन्नित्यादौ संज्ञाबोध्यरेफवकार रूपसंज्ञिनिमित्तकालोपापेक्षयाङ्गसंज्ञाबोध्यप्रकृतिनिरूपितसंज्ञिनिमित्तकै यादीनां परोपस्थित संज्ञानिमित्तकत्वाभावेन तद्घटित्वेन च बहिरङ्गत्वाभान्नासिद्धम्। "येन विधिः तदन्तस्य" (१-१-७१) इति सूत्रस्थ "इको यणचि" (६-१-७४) इत्यत्र तदन्तविधौ तदादिविधौ च सति ऊ न शब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इति प्रतिपादकभाष्यमपि नास्माकं प्रतिकूलमजादीति संज्ञाशब्दबोध्यलक्ष्यिस्थित ऊ न शब्दसापेक्षयण आर्द्धधातुक-संज्ञाशब्दबोध्येन सापेक्षगुणान्तरङ्गत्वाभावात्। तद्घटक नशब्दमात्रपेक्षत्वेन गुणस्यैव अन्तरङ्गत्वाच्च। गुणापेक्षया ऊठ् अन्तरङ्गत्वप्रतिपादकः कैयटस्तु चिन्त्य एव। वकारान्तममनुनासिकादिं च प्रत्ययमपेक्षमाणस्योठ उक्तसंज्ञाबोध्यलक्ष्यस्थित प्रकृति-प्रत्ययनिमित्ततयागुणात् अन्तरङ्गत्वाभावात्। अङ्गसम्बन्धिनीमिग्लक्षणां लध्वीमुप-धामार्द्धधातुके प्रत्ययमपेक्षमाणस्य अपि युक्तसंज्ञाबोध्यप्रकृतिप्रत्ययोभयनिमित्तकतया

---

[476] गुणादेशोभयवत्यऽन्तरङ्ग F1 : गुणाद्यणदेशोऽन्तरङ्ग G1, G2

बहिरङ्गत्वाभावात्। बहुपेक्षत्वरूपबहिरङ्गत्वं तु न शब्दमाश्रित्येत्यादि भाष्यविरोधादि दूषणेन मूले एव दूषितम्। नित्यत्वात्तु गुणात्पूर्वम् ऊठ् गुणस्तु न नित्यः ऊठ् उक्तरीत्यान्तरङ्गत्वेन यणा बाधितत्वात्। यद्यपि यस्य च लक्षणान्तरेण निमित्तं विहन्यते तत् नित्यत्वस्य पाक्षिकत्वप्रागुक्तं तथापि प्रयोग भेदेन पाक्षिकत्वस्वीकारेणान्तरेण निमित्तं विहन्यते तदन्यते तदनित्यत्वस्य पाक्षिकत्वं प्रागुक्तं तथापि प्रयोगभेदेन पाक्षिकत्वस्वीकारेण अन्तरेण निमित्तं विहन्यते। तदनित्यत्वस्य पाक्षिकत्वं प्रागुक्तं तथापि प्रयोगभेदेन पाक्षिकत्वस्वीकारेण लक्ष्यानुरोधेनानित्यत्वस्यैव स्वीकारान्न दोषः। एतेनैतेन नित्यत्वाद् गुणात्पूर्वम् ऊठ् गुणस्तु ऊठि यणाबाधितत्वात् नित्य इति शेखरोक्तिः प्रत्युक्ता लक्षणान्तरेण निमित्तविधाने नित्यत्वाभाववैकल्पिकत्वस्य प्रागुक्तत्वादित्यपास्तम्। लक्ष्यानुरोधितयापि प्रागभिधानेन पूर्वग्रन्थविरोधाच्च संज्ञिद्वारक पूर्वपरोपस्थितः संज्ञान्तरङ्गबहिरङ्गभावस्य स्वीकारादेव वृत्रहभ्यामित्यादिसंज्ञाबोध्य-संज्ञिसापेक्षतुगपेक्षया नलोपस्य पदसंज्ञाबोध्यलक्ष्यस्थितसंज्ञिसापेक्षत्वेऽपि तस्य पूर्वोपस्थितत्वात् न बहिरङ्गसिद्धत्वेन निर्वाह इति तुग्ग्रहणमिति वक्ष्यमाणस्य मूलग्रन्थसङ्गतिः। अत एव च संख्यासंज्ञाबोध्येन नकारान्तसंज्ञिसापेक्षषट्संज्ञासापेक्षया पदसंज्ञाबोध्यनकारान्तसंज्ञिसापेक्षनलोपस्य बहिर्भूतसंज्ञानिमित्तकत्वाभावान्न बहिरङ्ग-सिद्धत्वमिति च वक्ष्यमाणमूलसङ्गतिः[४७७]। अत एव च त्वकृतमित्यादौ विभक्तिसंज्ञाबोध्य तृतियैकवचनमात्रसंज्ञासापेक्षत्वाद्यपेक्षया समाससंज्ञाप्रयोज्यप्रातिपदिकसंज्ञाबोध्यतद्घटि-तसमुदायरूपसंज्ञिसापेक्षलुकोबहिरङ्गस्यापि प्रावल्यप्रतिपादकभाष्येण विरोधः। नन्वेवं वाह ऊ डित्यत्र ऊ ठ् ग्रहणस्य प्रकृतपरिभाषाया ज्ञापकत्वासङ्गतिः ज्ञापितायां परिभाषायामङ्गस्य आर्द्धधातुके इत्यादि संज्ञाशब्दबोध्यलक्ष्यस्थित वा रूपसंज्ञि-

[477] वक्ष्यमाणमूलसङ्गतिः F1 : वक्ष्यमाणमूलसङ्गति G1, G2

सम्प्रसारणस्य पूर्वस्थितनिमित्तकत्वे न सम्मतत्वेन वा बहिरङ्गत्वाभावादसिद्धत्वाभावेन चारितार्थ्याभावादिति चेदेवं तर्हि ज्ञापकपरभाष्यप्रामाण्येन आश्रयतयैव निरूपकतयापि संज्ञाबोध्योयस्तन्निमित्तकत्वस्य अपि बहिरङ्गत्वप्रयोजकत्वस्वीकारात्। तादृशबहिर्भूत-शसादि प्रत्ययनिमित्तकत्त्वेन सम्प्रसारणस्य बहिरङ्गत्वादसिद्धत्वापत्तौ ऊठ् ग्रहणस्य चारितार्थ्यात्। अत एव अयादेशादे रपरनिमित्तकत्वेन अन्तरङ्गाच्चेति मूले हेत्वन्तरोपन्यासः। अत एव "एङ्ह्रस्वात् सम्बुद्धेः" (६-१-६७) इति सूत्रे शेखरे हरेः विष्णो इत्यादावङ्गाधिकारस्थातत्परनिमित्तापेक्षाच्च गुणात्पूर्वं ह्रस्वान्तत्वेन एव सिद्धेः एङ् ग्रहणं व्यर्थमिति प्रश्नाशयवर्णनं सङ्गच्छते। अत एव चाभ्यासस्यासवर्णम् इति सूत्रे शेखरे उवोरवे-त्यादावङ्गसंज्ञासापेक्षषडपेक्षयान्तरङ्गत्वात् सवर्णदीर्घः स्यादित्याशंका संगच्छते। अत एव "ह्रस्वः"(७-४-५९) इति सूत्रे शेखरेऽभ्यासस्यावयवस्याच इति वैयधिकरण्येन अन्वयस्य इच्छाशब्दस्य द्वित्वे कृतेऽभ्यास संज्ञासापेक्षह्रस्वापेक्षयान्तरङ्गत्वात् तुकि अनजन्तस्यापि ह्रस्वसिद्धिः फलमुक्तम्। अत एव च उ स्य पदान्तात् "दीर्घोऽकितः" (७-४-८३) इत्यादि सूत्रस्थ शेखरग्रन्थसङ्गतिः। न चैवं कृति तुग्ग्रहणं व्यर्थं नलोपस्यापि पदसंज्ञानिरूपकभ्यासापेक्षत्वेन बहिरङ्गत्वादनया असिद्धत्वासिद्धेरिति वाच्यम्। राजेत्यादौ सुप्तिङिति सुवन्तस्य अपि पदत्वात्पदत्वस्य सर्वथानिरूपकसापेक्षत्वाभावेन बहिरङ्गत्वाभावात् कृतितुग्ग्रहणेन[478] निरूपकतया संज्ञानिमित्तकत्वेन बहिरङ्गत्वस्य क्वाचित्कत्वबोधनाच्च तेनमुवल् संज्ञाबोध्यरेफनिमित्तक लोपाक्षया अङ्गसंज्ञानिरूपक-प्रत्ययसंज्ञाश्रयरूपसमुंदितप्रत्ययाप्येयादेशादीनां न बहिरङ्गत्वप्रयुक्तसिद्धत्वमिति गुरवस्तु बहिर्भूतप्रत्ययनिमित्तकसंज्ञाकृत बहिरङ्गत्वं नाश्रीयन्ते कृति तुग्ग्रहणात्। तेन तादृशा-अङ्गसंज्ञासापेक्षस्य अपि वहिरङ्गासिद्धत्वम्। गुणस्य तादृशाङ्गसंज्ञा निमित्तकत्वेन

---

[478] कृतितुग्ग्रहणेन F1 : कृतितुग्ग्रहणताया G1, G2

बहिरङ्गत्वाभावेऽपि यस्मः पूर्वोयणः पूर्वोपस्थितनिमित्तेनतोऽन्तरङ्गत्वात् "विप्रतिषेधे परं कार्यम्" (१-४-२) सूत्रभाष्यप्रदर्शिते स्योन इत्यत्र यण्सिद्धिः यण् तदन्तविधौ तदादिविधौ च सति यावतश्शब्दसमुदायत्वनिमित्तत्वं तद्घटकोकारा घटितत्वे ततोगुणस्य अन्तरङ्गत्वात् ऊनशब्दमाश्रित्ययणादेशो नशब्दमाश्रित्य गुण इति भाष्यस्यापि अनुपपत्तिः ऊठो कः कैयटस्तु न युक्तः गुणस्यान्तरङ्गतादृशा-संज्ञानिमित्तकत्वेन बहिरङ्गत्वाभावात्। न च तदनाश्रयणेऽपि अङ्गसंज्ञाकृतान्तरङ्गत्वसत्वात् प्रदीपोपपत्तिरिति वाच्यम्। बहब्पेक्षत्वेन बहिरङ्गत्वस्य समाख्याविरुद्धत्वात् मूले एव दूषितत्वाच्च। यत्तु उ नमाश्रित्य यणादेशो न तु संज्ञादि रूपनिमित्तस्यापीति नव्योक्तिर्युक्ता तथाग्रहणेमानाभावात् गुणोबाधक इति अचान्तरङ्गत्वादिहेतोः भगवतो अनुपन्यासस्तत्वाच्चेति तच्चिन्त्यम्। ऊनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इति भाष्योक्तिस्वरस्येन अन्तरङ्गत्वहेतोरेव प्रत्ययात्। यदपि एतद्भाष्यस्य समानवर्णसमुदायनिमित्तकत्वे तात्पर्यमिति तन्न। अन्तरङ्गलक्षणत्वेन अभिमतस्य यणादेशस्य बहिरङ्गलक्षणत्वेन अभिमतो गुणो बाधकः प्रसज्येतेति पूर्वभाष्येणैव परत्वेन गुणस्य यण् बाधकताया उपपत्तेः ऊनशब्दमाश्रित्य यणादेशेन शब्दमाश्रित्य गुण इति तदुत्तरभाष्योक्तेरानर्थक्यप्रसङ्गात्। एतेन परत्वाद्गुणोबाधक इति कैयटोक्तम-पास्तम्। यत्तु प्राथम्यात्तदेव वा वक्तुमुचितमिति मूलमनूद्य दूषणाभिधानं प्रत्यासन्न-शब्दरूपनिमित्तोदाहरणोपक्रमेण तथोक्तेरनुक्तत्युपलक्षकत्वादिति तन्नस्योन इत्यस्य अन्तरङ्गचेति वार्तिकप्रथमोदाहरणत्वेन तथोपक्रमाभावादिति यत् किंचित् एतत्। न तु एतन्मते ऊठ्ग्रहणस्य ज्ञापकत्वासङ्गतिः सम्प्रसारणस्य बहिर्भूतप्रत्ययनिमित्तकभ-संज्ञासापेक्षत्वेनैव बहिरङ्गत्वादिति चेन्न। ज्ञापित्तायामपि परिभाषायामचरितार्थत्वेन ऊठ्पदेन यावताविनानुपपत्तिरिति न्यायात् बहिर्भूतप्रत्ययनिमित्तकसंज्ञाकृतबहिरङ्गस्यापि क्वचिद्ग्रहणज्ञापनात्तेनोक्तशेखरादि विरोधोनेत्याहुः। एवन्तु बहिर्भूतप्रत्ययनिमित्तक-

संज्ञाकृतं बहिरङ्गत्वमप्याश्रयितुं शक्यमुक्तरीत्या ऊठ्ग्रहणात् ज्ञापकात् कृतितुग्ग्रहणस्य तु एतत्क्वाचित्कत्वज्ञापनेन चारिताथ्र्यसंभवात् ज्ञापकद्वयफलानि तु उक्तरीत्यैव बोध्यानीत्यपि केचित् एवं प्रकारेण मूलस्योपपत्तौये तद्दूषयन्ति। तान् प्रति किं वदाम इति संक्षेपः।

**नाजानन्तर्य्ये बहिष्टवप्रक्लृप्तिः ॥ ५१ ॥**

**येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ५८ ॥**

**न लक्ष्यसिद्ध्युपयोगीति** । अत एव असंभवे एव बाधकत्वमिति वार्तिकमतानुसरेण न रामादित्यत्र जश्वत्वं वाावसाने इति चर्त्वमिति क्रमस्य दीक्षितैः कौमुद्यां प्रदर्शितत्वे सत्यपि सम्भवे वाधनमिति सिद्धान्तभूतभाष्यविरोधादसङ्गतत्वेन बाधित्वेति शेषपूरणेन जश्त्वं बाधित्वा चर्त्वमिति शेखरोक्तिः सङ्गच्छते। न च पूर्वत्रासिद्धमिति चर्त्वस्यासिद्धत्वाज्जश्त्वेन भाव्यम् अपवादो[479] वचनप्रामाण्यादिति भाष्यात् अपवादविषयेऽग्निमथ् अग्निमत् भुत् भुद् इत्यादाविव पूर्वत्रासिद्धमित्यस्य बाधकल्पनयाऽ सिद्धत्वाभावादिति तच्छिव इति प्रतीके शब्दरत्ने स्पष्टम्। न च पूर्वत्रासिद्धमिति प्रवर्त्य चर्त्वस्यैव बाधकल्पनया दीक्षितोक्तक्रमोणपपत्तिरिति वाच्यम्। गुणे त्वन्याय्यकल्पनेति न्यायेन साक्षात् लक्ष्यसंस्कारत्वात् प्रधानस्य चर्त्वविधेर्बाधकल्पनायोगात्। पूर्वत्रासिद्धमित्यस्य तु तत्र तत्र शास्त्रे स्वोपस्थित्या संस्कारकत्वेन णत्वाद् बाधकल्पना युक्तैव। ननु एवं रत्नमुडित्यादौ जश्त्वापवादत्वेन चर्त्वं प्रवृत्त्यान्तरतम्याद् घकारः स्यादिति दोष एवेति केचिदत्राहुः। गुणस्य फलविशेषवदुत्सर्गप्रवृत्ति-साम्पादकत्वे प्रधानस्य तु उत्सर्गभावमात्रफलकत्त्वे गुणस्य प्राधान्यात् प्रावल्यम्।

---

479 अपवादो F1 : अपवादे G1, G2

अपवादे यद्यप्यन्यत्र चरितार्थं इति न्यायादिति सदस्थिमालायां स्पष्टम्। यथा रत्नमुडित्यादौ "पूर्वत्रासिद्धम्" (८-२-१) इति गुणशास्त्रप्रवृत्त्या चर्त्वस्य असिद्धत्वात् षकारस्य डकारः। आदावपवादत्वेन चर्त्वं प्रवृत्तौ तु षकारस्य षकार एवेति रामादित्यादौ तु पञ्चम्यादेशस्य दकारान्तत्वाद्विपरीतमित्यसिद्धत्वबाधाच्चर्त्वास्यैव प्रवृत्तिरिति इनादेशप्रत्याख्यानपरभाष्यकैयटयोरपि दकारान्त एव पाठ इति न तत्र विप्रतिपत्तव्यम्। ऋधेर्धस्येति प्रतीकस्थशब्दरत्नोक्तिस्तु "पूर्वत्रासिद्धम्" (८-२-१) इति परिभाषाप्रवृत्त्यप्रवृत्त्योर्विशेषाभाव इव चर्त्वे प्रवृत्त्यप्रवृत्त्योर्विशेषाभावेन चर्त्वाप्रवृत्त्या-ऽनयति न तावद्विरोधः इति दिक्। एतेन रामादिति प्रतीके शेखरं दूषयन् कश्चिन्नानुमन्तव्यः। अनवकाशत्वादेव बाधकत्वमिति संज्ञानामपि भपदादीनाम आकडारीयाणाम् आकडारादेका संज्ञेति वचनान्निरवकाशत्वादिना भवत्येव बाध्यबाधक-भावः। तदन्यासात्तु कृत्कृत्यप्रत्ययसंज्ञानां व्याप्यव्यापकभावापन्नानां विभिन्नफलकत्वा-द्विरोधाभावाच्च समावेश एव आकडारीयाणामपि संज्ञितावसानसंज्ञानां समावेश एव "विसर्जनीयस्य सः" (८-३-३४) इति सूत्रभाष्यप्रामाण्यात्। अत एव "परः सन्निकर्षः सहिंता" (१-४-१०८) इति सूत्रे सन्निकर्षश्चप्रायः परेण क्वचित्पूर्वेणापि अवसानकार्याणां संहिताधिकारे पाठात्। अवसानसंज्ञया परसत्त्वे सावकाशायाः संहितासंज्ञायाः सत्यपि सम्भवे बाधनं भवतीति न्यायेन विषयभेदेऽपि बाधः स्यादिति तदसङ्गतिरेव इत्याशङ्क्य संहिताधिकारेऽवसानसंज्ञाकार्याणां पाठेनाकरसूत्रस्य स्वशास्त्रीयसंज्ञामात्रविषयकत्वकल्प-नात् संहितावसानयोः लौकविदितत्वादिति वार्तिकान्तयोः लौकिकत्वादिति शेखरे उक्तम्। यत्तु तत्र अततेर्ङ् अ इत्येव। भाष्यकृता व्युत्पादितस्य सम्बोधने अस्य स्त्री ई इत्यादौ स्त्रियाञ्च द्वितीयवर्णसन्निधाने सन्निकर्षाभावात् संहितासंज्ञाया अविषयेऽवसानसंज्ञायाः तत्कार्यास्याणोड। प्रगृह्यस्येत्यनुनासिकस्य वृक्ष इत्यत्र चार्द्धमात्राधिककालव्यवधानेन रेफोच्चारणे संहितासंज्ञाया अभावादवसानसंज्ञायाः

तत्कार्यस्य विसर्गस्य च संभवात् सत्यपि संभवे बाधनं भवति इति न्यायोपष्टम्भेन बाधकत्वोक्तेरयुक्तत्वादिति तच्चिन्त्यम्। "विसर्जनीयस्य सः" (८-३-३४) इति सूत्रभाष्य-प्रामाण्येन अनवसानकार्यविषये पूर्वसन्निकर्षरूपसंहितायाः स्वीकारेणोक्तलक्ष्ययोः संहिताधिकारस्य अनुनासिकाप्राप्तावसानसंज्ञाफलस्य दुर्निरूप्यत्वात्। न च तत्र तेषां पाठेऽपि तेषु तदसम्बन्धोनऽग्रे च मण्डूकप्लुत्यासम्बन्धः इति वाच्यम्। नियतावधिपरिच्छिन्नेष्वधिकारेषु मण्डूकप्लुतेरभावान्नदीस्रोतोन्यायेन तेषामधिकारादिति स्पष्टमुद्योते। एतेन तत्र पाठस्य सत्वेऽप्यवसानकार्य्ये योगित्वात्तदसम्बन्धादग्रे च मण्डूकानुवृत्त्यादोषाभावस्य वक्तुं शक्यत्वादित्यपास्तम्। वृक्ष इत्यत्र अर्द्धमात्रिक-कालव्यवस्यावग्रहकृतस्य पदान्ते एवग्रह इति नियमेन रेफात्पूर्वमसंभवादा लस्यादि-कृतस्य साधुत्वप्रयोजकत्वेन तत्र शास्त्रप्रवृत्तेः अभावात् पूर्वेण सन्निकर्षम् आदाय संहितायाः सत्त्वेनाऽवसानकार्यस्य विसर्गस्य निष्प्रत्यूहत्वाच्च। यदपि परत्वाद्बाध इति परमवशिष्यते तदपि वर्णान्तरोच्चारणे सर्वत्र विरामसद्भावाद्व्यापिकामवसान-संज्ञावर्णान्तरानुच्चारणे सावकाशामनवकाशा संहिता संज्ञा बाधते इति संहितासंज्ञासूत्रे वदता भाष्यकृतैव समाहितम्। एतेन संहिताधिकारेऽवसानकार्याणां पाठ सामर्थ्यात् तयोः समावेशोक्तिः प्रत्युक्तेति तदपि चिन्त्यम्। वृक्ष इत्यादौ परवर्णानुच्चारणे परेण संहिताया अभावेऽपि आष्टमिकभाष्योक्तरीत्या पूर्वेण तस्याः सद्भावाभ्युपगमात् संहितासंज्ञाया अनवकाशत्वाभावेन एतद्भाष्यस्यैकदेश्युक्तत्वात्। अत एव तत्रैवन्तर्हि अनवकाशा संहितासंज्ञा अवसान संज्ञां बाधिष्यते इति लृडन्तं प्रौढत्वसूचकमुक्तम्। अत एव चाथवेत्यादिना पक्षान्तरमुक्तन्तन्न। एतेन पूर्वोक्तभाष्यरीत्या वृक्ष इत्यत्राप्य-वसान संज्ञायाः संहितासंज्ञया बाधप्रसङ्गात् स्ववसानयोरिति विसर्गाप्रसङ्गात्। अत एव एतत् भाष्यव्याख्यानावसरे वृक्ष इत्यत्र अवसानसंज्ञायाः सावकाशत्वमुक्तं प्रदीपकृतेत्यपास्तम्। "परः सन्निकर्षः सहिंता" (१-४-१०८) इति सूत्रभाष्यस्य

एकदेशयुक्तत्वात् वृक्ष इत्यादौ विसर्गसिद्धये त्वयाप्येतद्भाष्यस्य एकदेशयुक्ततया अवश्यं वक्तव्यत्वाच्चेत्यन्यत्र विस्तरः। अपवादशास्त्रस्य निषेधरूपत्वे तु सर्वथा विरोधान्निषेधविषये विधेरप्रवृत्तिः ब्राह्मणा भोज्यन्तां न कौण्डिन्य इत्यत्र यथा तेन हलन्त्यमित्यादि न विभक्तावित्यादिविषये न कदापि प्रवृत्तिरिति "हलन्त्यम्" (१-३-३) इति शेखरे स्पष्टम्। यत्तु गवाक्च्छब्दे स्वमोर्लुका लुप्तत्वात् प्रत्ययलक्षणानु भावान्नुम्नेति शेखरोक्तेराशयं तदनुगामिनः प्रष्टव्याः । सुडनपुंसकस्येति निषेधविषये सर्वनामस्थानसंज्ञाविधेः विरोधादप्राप्तेरेव नुमोऽप्यभावादिति तच्चिन्त्यम्। उपायस्योपायान्तरादूषककत्वात् स्वमोः स्थितौ हि सर्वनामस्थानत्वात् भावादिति हेतोः समुचितत्वेऽपि लुकि सति कुड्येचित्रमितिन्यायेन प्रथमकल्पितस्य तत्परत्वा-भावादिति हेतोः एव समुचितत्वाच्चेति दिक्।

**क्वचिदपवादविषये अपि उत्सर्गऽभिनिविशते इति॥ ५९॥**

**क्वचिदपवादविषये**[४८०] न तु शेष इत्यस्य अधिकारत्वात् तेन अणोविधानानुपपत्तिरिति चेन्न। तस्य विधायकताया अपि मनोरमाशेखरादावुक्तत्वात्। न च वृद्धत्वाच्छोऽणं बाधित्वा स्यादिति वाच्यम्। राष्ट्रावारपाराद्धस्वाविति आरभ्य-विहितानां घादीनां तत्र जात इत्याद्यर्थेषु विधानेन स्वविषये बाधकत्वेऽपि तत्प्राक्पठित "शेषे" (५-२-९१) इति सूत्र विहिताण्बाधकत्वाभावात् वृद्धाच्छेत्यस्य घाद्यन्तर्गतत्वात्। तत्र जात इत्याद्यर्थः निर्देशप्रकरणपठितस्य[४८१] तस्यदमित्यस्य तु न प्राप्तिर्येन तद्धिताणो वृद्धाच्छोबाधकः प्रसज्येत कांचनकरणकनिर्माणविषयेत्यर्थस्य विवक्षितत्वेन सम्बन्धार्थे

---

[480] क्वचिदपवादविषये F1, G2 : क्वाचिद् अपवादविषये G1

[481] निर्देशप्रकरणपठितस्य G2 : निर्देशप्रकरणात् पठितस्य F1, G1

विधायकस्य तस्येदमित्यस्याप्राप्तेः। अत एव गर्गेण निर्मितो गार्ग्य इत्येव । गर्गाणामयं कांचनस्येयमिति विवक्षान्तु तस्येदमित्यणं बाधित्वा वृद्धाच्छोभवत्येवेति गदायां स्पष्टम्। एतेनात्र नव्यतराः कांचनेन निर्मितेत्यर्थे शैषिकोऽण् न कुत्रापि दोष इति तत्र इदं वक्तव्यम्। किं शैषिकोऽण् तस्येदमित्यनेन विवक्षितनिर्माणस्येदमर्थव्याप्यत्वात् उत् शेष इत्यस्य स्वतन्त्रविधायकत्वेन अप्यङ्गीकारात्तेनेति। नाद्यः वृद्धाच्छ इत्यनेन बाधादिति भास्करेणैव दूषितत्वात्। अत एव न द्वितीयः शेषः इत्यस्य प्रत्याख्यानाच्च। अधिकारत्वे प्रयोजनानां ज्ञापकैः अन्यथासिद्धेर्भाष्ये प्रदर्शितत्वात्। स्वतन्त्रविधायकत्वे प्रयोजनानान्तु चाक्षुषं रूपमित्यादीनां तस्येदमित्यनेन सिद्धेः कैयटोपाध्यायैः उक्तत्वादित्यपास्तम्।

चक्षुषा गृह्यमाणरूपादेः[४८२] चक्षुसम्बन्धित्वेन विवक्षायां तस्येदमिति सिद्धावपि तत्करणकग्रहणकर्मकत्वविवक्षायां तेनासिद्धेश्च गर्गेण निर्मितो गार्ग्यो रथ इत्यत्र गतेश्च। अत एव ज्ञापकादानुमानिकवचनकल्पनेन सिद्धस्य वचनस्य प्रत्याख्यानं न सुष्ठिवत्य-भिसन्धायाधिकारत्त्वमस्तु, लक्षणत्वन्तु नातीवोपयुज्यते इत्यतीव पदघटितमिश्रैरुक्तं दीक्षितैरपि शैषिकान्मतुवर्थीयादित्यस्य विषयलाभार्थत्वमधिकारस्य व्यवस्थाप्यैवं स्थिते विधायकत्वमपि तस्य सुवचनमिति न अतीव निर्भरः कार्य इति मनोरमायामुक्तम् । यत्तु काञ्चनीत्यादिसिध्यर्थविधायकत्वस्य अवश्यवक्तव्यतया तद्वैयर्थ्योक्तिः प्रामाणिकी। अत एव भाष्येऽधिकारत्वस्यैव ज्ञापकादाश्रयणादाक्षेपः कृत इत्याशंक्य भानुः पितायस्येत्यर्थे भानव इत्यस्य शेषे इत्यणैव सिद्धे तस्येदमित्पत्येऽपि बाधनार्थं कृतं भवेत्। **उत्सर्गः शेष एव अस्मैवृद्धान्यस्य प्रयोजनमिति** वार्तिककृदुक्तस्य तस्य अपत्यमिति योगविभागप्रयोजनस्य असङ्गतिप्रसङ्गादिति समादधुस्तच्चिन्त्यम्। कृतेऽपि

---

[482] गृह्यमाणरूपादेः G2 : गृह्यमाणरुपादि F1, G1

योगविभागेऽपत्यत्वपुरस्कारेणैव तस्यापत्यमित्यण् विधानादभानुः पिता अस्येत्यर्थे भानव इत्यण् सिद्ध्ये शेषे इत्यस्याणः विधायकत्त्वावश्यकत्वात्। तस्येदमित्यपत्येपीति वार्तिकशेष इति सूत्रस्थं भाष्यं च शाब्दबोधकृतविशेषानादरेण प्रवृत्तमिति भानोरपत्यं भानव इत्यादौ अपत्यत्वेन बोधार्थं योगविभागस्य सार्थक्यात्। यदपि अत्रोच्यते मयड् वैतयोरित्येव सिद्धे नित्यं वृद्धशरादिभ्य इत्यत्रारम्भसामर्थ्यात् नित्यग्रहणस्य शरादिभ्य इत्यनेनेन एव अन्वयाङ्गीकारात् क्वचित् वृद्धेभ्यो मयट्प्रवृत्त्या [४८३] काञ्चनीत्यस्य साधनीयत्वात्, इति तदपि चिन्त्यम्। आरम्भसामर्थ्यादिवास्य नित्यत्वे सिद्धे नित्यग्रहणं क्वचित् अन्यत्रापि नित्यविधानार्थमिति एकाचो नित्यं त्वङ्मयं वाङ्मयमित्यस्य सिद्धिरिति शेखरे एवाभिधानात्। न चैवं शरादिषु मृत्च्छब्दपाठो व्यर्थ इति वाच्यम्। तस्य एतदनित्यत्वबोधनार्थत्वात् तेनत्वाचोरोग इत्यादावौत्सर्गिकाणुसिद्धिरिति "न ङिसम्बुद्ध्योः [४८४] " (८-२-८) इति सूत्रे शेखरे एव स्पष्टम्। एतेन नित्यग्रहणं वृद्धशरादिभ्योऽन्यत्रापि क्वचित् नित्यार्थन्तेन तत्वङ् मयम् इत्येकाचो नित्यं मयडिति प्राञ्चः। तत्र शरादिषु मृत्च्छब्दपाठस्यव वैयर्थ्यप्रसङ्गादित्यपास्तम्। काञ्चनीत्यत्र मयड् भावस्तु शेषे इत्यस्याविधित्वादेव सिद्ध इति बोध्यम्। केचित्तु काञ्चनीत्यादौ काञ्चनस्येयमिति विग्रहेऽपि वृद्धाच्छ इत्यपवादविषये तस्येदमिति औत्सर्गिकोऽण् कर्तृकर्मणोः कृतीत्यत्र कृद्ग्रहणात् क्वचित् अपवादविषयेऽप्युत्सर्गप्रवृत्तेः स्वीकारात्। अन्यथा कृतपूर्वीकटमित्यत्र न लोकेति निषेधात् षष्ठ्यभावे सिद्धे कृतीत्यस्य वैयर्थ्यापातात्। तेन ददैरुषस्य **माधाभ्योधायै रामोदसत्तमिति** भट्टिप्रयोगे अपवादषष्ठीम-

---

[483] मयट्प्रवृत्त्या G2 : मयड्प्रवृत्या F1 , G2

[484] न ङिसम्बुद्ध्योः G2 : नङिसम्बुछयोः F1 , G2

विषये द्वितीयासिद्धिः इत्याहुः तन्न। कर्तव्यपूर्वीकटमित्यपवादविषये षष्ठीवारणेन कृद्ग्रहणस्योपक्षीणत्वात्। कृतेनापि यथाश्रुतार्थकेन कृद्ग्रहणेन षष्ठ्यावारणाच्च। उक्तभाष्योदाहरणात् कृद्ग्रहणस्य सामर्थ्याच्च कृदन्तशक्तिग्रहसहकारेण उपस्थितक्रिया कर्तृकर्मणोः षष्ठी न तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थिति विषयक्रिया कर्तृकर्मणोरिति शेखरोक्तार्थकल्पनेन षष्ठीवारणे तु न लोकेत्यत्रापि लादिसाहचर्येण निष्ठांशे निष्ठाशक्तितानसहकारेणोपस्थितक्रियान्वयिनोः कर्तृकर्मणोः इत्यर्थस्वीकारेण निषेधस्याप्यसत्त्वात्। ज्ञापकस्य शैथिल्यात् कृतपूर्वीत्यत्र कर्मणोऽविवक्षया भावक्तान्तस्य ईदृशवृत्तिमात्रविषयताया भाष्यसंमतत्वेन तस्य केवलस्य क्वाप्यप्रयोगेण कृदन्तशक्तिग्रहसंभवेन तद्धितान्तसमुदायशक्तेरेव क्रियोपस्थापकत्वात्। तण्डुलानां पाचकतर इत्यादौ तु पाचकादेः पृथक्प्रयोगात्तच्छक्तिग्रहस्यापि सत्त्वेन कृदन्तशक्तिग्रहसहकारेण उपस्थितक्रियाकर्मत्वषष्ठ्युपपत्तिरिति शेखरे एव स्पष्टम्। न चैवं प्राज्ञो व्याकरणमिति मनोरमोक्तप्रयोगानुपपत्तिः । प्रज्ञाशब्दस्य भावाघञन्तस्य पृथक्प्रयोगसत्त्वेन कृदन्तशक्तिग्रहप्रयोज्योपस्थितक्रियाकर्मत्वसंज्ञा तण्डुलानां पाचकतर इत्यादाविव षष्ठीप्राप्तेरिति वाच्यम्। प्राज्ञो व्याकरणस्येत्येवेष्टत्वात् इति प्रज्ञा श्रद्धेति सूत्रे शब्दरत्ने स्पष्टम्। एतेन निष्ठायोगे न लोकेति निषेधविषयत्वेन भाष्योदाहरणस्य स्वार्थे तात्पर्याभावात्तद्बलेन अर्थविशेषकल्पनेन प्रमाणाभावात्। न च न लोकेत्यत्र कृद्ग्रहणानुवृत्त्या कृन्निष्ठा प्रयोज्योपस्थितक्रियाकर्तृकर्मणोः एव निषेधात्प्रकृते तदविषयत्वमिति वाच्यम्। तथा स्वयमव्याख्यातत्वात् फलाभावाच्च। तण्डुलानां पाचकतर इति वृत्तौ समुदायस्यैव अर्थवत्त्वात् कृदन्तशक्तिग्रहप्रयोज्योपस्थिति विषयत्वस्य क्रियायामसत्त्वात् , षष्ठीप्रवृत्तेः वक्तुमशक्यत्वाच्च। प्राज्ञो व्याकरणमित्या-दाविव तण्डुलानां पाचकतर इति द्वितीययैव भवितुं युक्तत्वादित्यपास्तम्। उक्तरीत्या निषेधविषयत्वेन कृतपूर्वीतिभाष्योदाहरणस्य स्वार्थे तात्पर्यसंभवात् कैयटादिभिः

तथैव वर्णितत्वात् उपलक्षणत्वे मानाभावात् सिद्धान्तमञ्जूषोद्योतयोः परमगुरुचरणै-व्याख्यातत्वाच्च। कटं कृतवान् पुत्र इत्यादौ निषेधप्रवृत्तेरेव फलत्वाच्च यथाश्रुतार्थकत्वे तु निषेधाप्राप्तया कर्तृकर्मणोरिति षष्ठ्यापत्तेः। तरप्प्रत्ययस्य द्योतकत्वेन पक्षद्वयेऽपि कृदन्तशक्तिग्रहप्रयोज्योपस्थितक्रियाकर्मत्वस्य सत्त्वाच्च। प्राज्ञो व्याकरणस्येति षष्ठीप्रयोगस्पष्टत्वेन दृष्टान्तासिद्धेश्च कृते ये कतृकर्मणी तत्र यथास्यात् तद्धितस्य येकतृकर्मणं तत्र माभूदिति कृद्ग्रहणप्रयोजनपरभाष्यं स्वरसात्तण्डुलानां पाचकतरः प्राज्ञो व्याकरणस्येति षष्ठीघटितप्रयोगस्यैव इष्टत्वलाभाच्च। अन्यथा तद्धिताधिक्येक-माभूदित्येव वदेत्। एतेन तद्धिताधिक्ये ये कर्तृकर्मणी तत्र माभूति-त्याकरेतद्व्याख्यातमित्यपास्तम्। कैयटाद्याकरानुपलम्भात्, भाष्यस्वरसविरोधाच्च उक्तभाष्यस्य निरुक्तार्थकत्त्वादेव तण्डुलानां पाचकतर इत्यादाविव तण्डुलानां पाचकपुत्र ओदनस्य पक्तृपुत्र इति समासवृत्तौ षष्ठी भवत्येव कृदन्तशक्तिग्रह-सहकारेणोपस्थितक्रियाकर्मत्वसत्त्वादिति उद्योते स्पष्टम्। एतेनात्र तद्धिते इति वृत्तिमात्रोपलक्षणं तेन ओदनस्य पक्तृपुत्र इति समासवृत्तौ न षष्ठीति बोध्यमित्यपास्तम्। ओदनं पाकीयति उदन्तं प्रश्रयतीति तु माणवकं मुण्डयति व्याकरणं सूत्रयतीतिवत्करोति क्रियाकर्मत्वमादाय साध्विति सुप आत्मनः क्यच् हेतुमति च इति सूत्रयोर्भाष्येस्पष्टम्। भट्टाचार्यस्तु व्युत्पत्तिवादे ओदनस्य पाकीयतिप्रयोगे इष्टापत्तिं कुर्वन्तोमान्या एव धायै रामोदमुत्तममिति त्वदुक्तफलस्य यथा सिद्धिस्तथा “कर्तृकर्मणोश्च भूकृञोः” (३-३-१२७) इति सूत्रे शेखरे स्पष्टम्। एतेन टूधातोः शप्रत्ययान्तात् स्वार्थिकेऽपि धायैरिति प्रयोगं साधयन्त उपेक्ष्याः , वृत्तिद्वयकल्पनापत्तेः विधायकाभावाच्च। यत्तु वस्तुतस्तु कृतपूर्वी कटमित्यत्र कर्मसामान्ये प्रत्यये पूर्वशब्देन समासे इनौ च कृते पश्चात्कर्मविशेषा-काङ्क्षायां कटस्य वृत्तस्य विशेषणयोगो नेति निषेधात् सामानाधिकरण्येन कृतपदार्थेन योगाभावेऽपि क्रियाकारकयोः नित्यसाकाङ्क्षत्वात् शरैः शातितपत्र इत्यादाविव

धात्वर्थक्रियायां कर्मत्वेन योग इति भावक्तान्तस्य अविवक्षितकर्मत्वस्य कटेऽभावेऽपि कर्मसामान्यप्रथमान्तस्य शक्यं चक्षुः[485] उपहन्तुमित्यादौ केवलस्यापि प्रयोग दर्शनात्तथा-भूतक्तान्तस्य तथा प्रयोगात्तथोपस्थितिविषयक्रियानिरूपितकर्मत्त्वस्य कटेसत्त्वात्त-तदुक्तकल्पनायामपि श्रमितसिद्धेरश्लाभावादिति तच्चिन्त्यम्। विशेषातिरिक्तसामान्यसद्भावे मानाभावात्। सधकत्वर्थफलाश्रयः क्तेनाभिहित विशेषजिज्ञासाकाले तदर्थफलेऽचित्तस्य कटस्य अनभिहितताया वक्तुम्शक्यत्वेन द्वितीयाषष्ठ्योरप्राप्तेश्चेत्युद्द्योते स्पष्टम्। कर्मसामान्येऽभिहिते क्रियायाः स्वोत्तरप्रत्ययानभिहितकारकांशे शरैः शातितपत्र इत्यादाविव साकाङ्क्षत्वेऽपि स्वोत्तरप्रत्ययानभिहितकारकांशे निराकाङ्क्षत्वेन विशेषकर्मणः क्रियाकारकभावेन क्रियायामन्वयाच्च। सामान्यस्य परं सामानाधिकरण्येन विशेषजिज्ञासात्वस्यैवेत्यन्यत्। अत एव कैयटेन भावे वा क्त उत्पद्यत[486] इति पक्षान्तरमुक्तम् । यो सौ कृतकटयोरभिसम्बन्धः स उत्पन्ने प्रत्यये इनौ पश्चादभिनिवर्तते अस्ति च करोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति भाष्यस्य कृतः पूर्व कटोऽनेनेति वाक्यइष्टस्तयोः सामानाधिकरण्यलक्षणः सम्बन्ध उत्पन्ने प्रत्यये इनौ पश्चादभिनिवर्तते बुद्ध्यारूढो भवति। पूर्वभावविषयकृत-शब्देन कृति सत्वात्तत्र तद्धितार्थदर्शनात्तेनैकार्थीभूतस्य कटेन सम्बन्धाभाव एव पश्चात्तदभिनिवृत्तावेव करोतेः कटेन सामर्थ्यमित्यर्थः। तदपि भावे क्तप्रत्ययवादिमते एव निर्वहति कर्मसामान्ये क्तप्रत्ययवादिनः । तव मते तु कृतस्य कटेन सामर्थ्यमिति वक्तुं युक्तंस्यात्। नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च यदा वाक्यं तदा

---

[485] शक्यं चक्षुः F1 : शक्यंचक्यु G1, G2

[486] उत्पद्यत F1 : उत्पपजा G1, G2

प्रत्ययः यदा प्रत्ययः सामान्येन तदावृत्तिस्तत्र विशेषार्थिना विशेषोनुऽप्रयोक्तव्यः कृतपूर्वीकटमिति भाष्ये सामान्येन इत्यस्य अविवक्षितकर्मतया धात्वर्थमात्रवृत्तिना-भावक्तान्तेन इत्यर्थो विशेषार्थिनेत्यस्य कर्मविशेषजिज्ञासानिवर्तकबलवत्तेत्यर्थ इत्युद्द्योते शेखरे च स्पष्टम्। सामान्येन वृत्तिरित्यस्य कर्मसामान्येन विवक्षायां वृत्तिरित्यर्थवादिनान्तु अनभिहिते कर्मणि द्वितीया इत्यादौ विशेषपदानुपादानात् कर्मत्वेन कर्मसामान्याभिधानाच्च शक्यं चक्षु उपहन्तुमित्यादाविव द्वितीयमानापत्तिर्दृढैवेति बोध्यम्। अत एव हरिः विशेषकर्मसम्बन्धे निर्मुक्तेऽपि कृतादिभिः विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते। अकर्मकत्वे सत्येवक्तान्तो भावाभिधायिनि ततः क्रियावता कर्त्रा योगो भवति। कर्मणामिति कृतः कटोऽनेनेति। वाक्यावस्थायां कृतादिशब्देन कटादिरूपविशेषकर्म-सम्बन्धेऽनुभूतेऽपि तस्यामवस्थायां सामर्थ्येन वृत्तिविरहद्विशेषनिरपेक्षो भाववचनोऽन्य एव कृतशब्दः प्रवर्तते वृत्तिं लभते तदेवोपमादयन्नाह अकर्मकत्वे इति। एवं विशेषनिरपेक्षत्वेपि सामान्यापेक्षत्वमस्त्येवेति वाच्यम्। विशेषरहितसामान्यस्य अभावादिति दत्तोत्तरत्वात् । यत्त्वकर्मकत्व इति सत्त्वे वा इति पाठं अभिधायाकर्मकत्व-सत्वेवेत्यादिना अविवक्षितकर्मत्वाद्भावे क्त इति पक्षान्तरमुक्तं हरिणा तदभ्युच्चयमात्रम्। अविवक्षितकर्मत्वेन अकर्मकत्वस्य धातुमात्रे सत्त्वात्। कालादिकर्मणान्तु सर्वेषामपि सकर्मकत्त्वात् शास्त्रे अकर्मकपदेन सामर्थ्यात् कालादिभिन्नं कर्म येषां न संभवति तेषामेव ग्रहणस्य न्याय्यत्वात्। अन्यथा घटं क्रियते देवदत्तेन घटं कृतमित्याद्यपि प्रसज्येति तच्चिन्त्यम्। कैयटे तथा पाठस्याभावात् पक्षान्तरत्वाभावात् कालादिभिन्नं कर्म येषां न विवक्षितं तेषामकर्मकपदेन ग्रहणस्येष्टत्वाच्च। उक्तरीतेर्भाष्यप्रामाण्ये चोक्तोदाहरणे एव स्वीकारात् तदुक्तातिप्रसङ्गस्य अभावाच्च। ततः क्रियावता कर्त्रेति हरिस्वारस्येन क्तस्य अभावाभिधायकत्वलाभाच्च कर्मान्वययोग्यधात्वर्थाविवक्षायाऽकर्मकत्वमभिप्रेत्यैव "णेरणौ यत्कर्म णौ चेत् स कर्त्ताऽनाध्याने" (१-३-६७) इति सूत्रप्रदीपे कैयटेन

लुनातेर्निर्वृत्तप्रेषणास्ति लावयति केदारं देवदत्त इति प्रयोगे गतिबुद्धीत्यनेन कर्मत्त्वमित्युक्तम्। यत्तु तत्रार्थान्तरवृत्तित्वेन धातोरकर्मकत्वकर्मकपदे धातोरन्यपदार्थत्वादर्थभेदात् शब्दभेदस्य विवक्षितत्वात् नत्वविवक्षितकर्मत्वादिति तच्चिन्त्यम्। एतादृशे विषयेऽपि धातोः अर्थान्तरवृत्तित्वेन अकर्मत्वेऽभियुक्तोक्तावपि पक्षान्तर इत्यस्य वैयर्थ्यापत्तेः। तस्माद्धातोः अर्थान्तरे वृत्तेरित्यस्य सर्वथा फलव्यापारयोः त्यागे नदी स्पन्दत[४८७] इत्यर्थकं नदी वहति इत्याद्येव उदाहरणमिति मञ्जूषायां स्पष्टम्। अत एव कर्मणः शेषत्वेन विवक्षायाम् अविवक्षायाम् अविवक्षितकर्मत्वेन अकर्मकत्वाद्भावे लादय "अधीगर्थदयेशां कर्मणि"(२-३-५२) इति सूत्रे भाष्यकैयटयोः उक्तास्तथाहि कर्मादिष्वकर्मवद्भावो वक्तव्यः। किं प्रयोजनकर्मकाणां भावे लोभवतीति भावे लो यथा स्यात् मातुः स्मर्यते, पितुः स्मर्यते इति अर्थवत्करणं किमर्थम् स्वाश्रयमपि यथा स्यात् माता स्मर्यते पिता स्मर्यते कर्माभिधाने हि लिङ्गवचनानुपपत्तिस्स्यात् मातुः स्मृतं मात्रोः स्मृतं मातृणां स्मृतमिति मातर्यलिङ्गवचनं च तत्स्मृतशब्दस्यापि प्राप्नोति षष्ठी च प्रसक्तं व्याकुर्वतो मातृशब्दात् स्मृतशब्देन अभिहितकर्मेति कृत्वा षष्ठी न प्राप्नोति तर्हिः वक्तव्यं अविवक्षिते कर्मणि षष्ठी भवति । किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते शेषे इति वर्तते कश्चशेषः[४८८] कर्मादीनामविवक्षा शेष इति। यद्यपि उपसंहारभाष्यात् कर्मप्रत्ययेन अभिहितत्वात् मातृशब्दादप्राप्तायाः षष्ठ्याः प्रापणार्थमेव कृतस्य अकर्मकवद्वचनस्य अविवक्षितकर्मत्वेन प्रत्याख्यानं लभ्यते, तथापि मातुः स्मर्यते मातुः स्मृतमित्युपक्र-मोक्तभावालादिसिद्धये भगवतोपायस्य अनुक्तत्वाद्धातोः अर्थान्तरवृत्तित्वे न

---

[487] स्पन्दत G2 : स्पन्दनम् F1, G1

[488] कश्चशेषः F1 : वार्तिकशेषः G1, G2

अकर्मकतायाः त्वदुक्तायाः कर्मत्वानुपपत्त्या असंभवाच्च। अकर्मकवद्वचनस्य आवश्यक-त्वेन प्रत्याख्यातासङ्गत्याऽविवक्षितकर्मत्वस्य आवश्यकत्वमिति भाष्यतात्पर्यात्। एतेन यत्तु कर्मणः शेषत्वविवक्षायामविवक्षितकर्मत्वादकर्मकत्वेन भावे लकारो भाष्ये उदाहृत इति शेखरशब्दरत्नयोः उक्तम्। तन्न तर्हि वक्तव्यं न वक्तव्यमविवक्षिते कर्मणि षष्ठी भवति किं वक्तव्यं एतन्न हि कथमनुच्यमानं गंस्यते शेषे इति वर्तते कश्च शेषः। कर्मादीनामविवक्षाया शेष इत्युपसंहारभाष्यात् कर्मप्रत्यये तेन अभिहितत्वात्[489] मातृशब्दप्राप्तायाः षष्ठ्याः प्रापणार्थं कृतस्य वचनान्तरस्यैव अविवक्षितकर्मत्वेन प्रत्याख्यानलाभादिति प्रत्युक्तम्। यत्तु वस्तुतो भाष्ये अकर्मकवद्भावो वक्तव्यः किं प्रयोजनकर्मकाणां भावे लो भवतीति भावे लो यथा स्यात् इत्यत्र अकर्मकाणां लो यथाधर्म्यमभिधायकस्तथा सकर्मकाणां अधीगर्थादीनां कर्मणि लोधर्म्यभिधानेऽपि तदनभिधानप्रयुक्तकार्यभाग्भवतीत्यर्थोन तु भावबोधको भवतीत्यपीति तच्चिन्त्यम्। तथात्वे हि सकर्मकाणां कर्मणि लो कर्मकाणां भाववाद्भवतीति भगवान् ब्रूयात्। अधीगर्थादीन् सकर्मकानुद्दिश्य अकर्मवद्भावविधानेन अकर्मकत्व प्रयुक्तभाव-लकारादेरेव विधेयतया वार्तिकात्प्रतीतेः भगवतापि भावे लो यथा स्यादिति वदता विधेयतया भावल एव अभिहितः। किञ्च "अधीगर्थदयेशां कर्मणि"(२-३-५२) इति सूत्रे अनभिहिताधिकारादनभिहिते कर्मणि शेषत्वेन विवक्षिते इत्यर्थात्कर्मसामान्ये उक्ते मातृशब्दात् शेषत्वविवक्षायामपि षष्ठ्यनापत्तिः भावविशेष्यकबोधनापत्तिश्च। एतेन कर्मविशेषस्य मात्रादेः शेषत्वविवक्षायां कर्मसामान्यक्तान्तस्य लिङ्गसर्वनामनपुंसके एकवचने मातुः स्मृतं मात्रे स्मृतमित्यादिसिद्धिरित्यपास्तम्। विशेषातिरिक्तसामान्यसद्भावे

---

[489] अभिहितत्वात् F1 , G1 : अभिन्नत्वात् G2

मानाभावाच्चेति संक्षेपः। प्रतिपदोक्तमपि निरवकाशत्वे सत्येवेति यथा रमायामित्यादौ ङे रामायाढो बाधः। याटि कृते याड्विशिष्टस्य निर्दिश्यमानत्वाभावात्। निर्दिश्यमानस्य ङेर्याटा व्यवधान ङे रामोऽप्राप्ते निरवकाशत्वात्। सप्तम्येकवचनरूपङिविशेषमुद्दिश्यामो विधानेन प्रतिपादोक्तत्वाच्च। निरवकाशत्वेन बाधकप्रवृत्त्युत्तरमुत्सर्गप्रवृत्तेः पश्चाद्याद् सिद्धिरिति शेखरे स्पष्टम्। ये तु मनोरमाकारादयः "टाबृचि" (४-१-९) इत्यस्य प्रतिपदोक्तत्वात्पादोऽन्यतरस्यामिति ङीब् बाधकत्वं वदन्ति ते तु प्रतिपदविहितस्य निरवकाशत्वे एव बाधकत्वमिति उगवादिभ्यो यत् "शेषाद्विभाषा" (५-४-१५४) इति सूत्रस्थ भाष्यविरोधादपेक्ष्याः पादोऽन्यतरस्यामिति ङीपो वैकल्पिकत्वेन तदभावे अच्यभिधेयायां टाबृचीत्यस्य सावकाशत्वेन निरवकाशत्वाभावात्। तत्रो "गबादिभ्यो यत्[४९०]" (४-२-१३७) इति सूत्रे भाष्ये छदिरुपधिवलेर्ढक् भवति चर्मणो ञः पूर्वविप्रतिषेधेन पाठञो अवकाशः छादिषेयं तृणमजोऽवकाशः बाध्रं चर्मछदिनीमचर्मविकारः तस्मादुभयं प्राप्नोति। छादिषेयं चर्मठञ् भवति पूर्वविप्रतिषेधनेत्युक्तम्। महाविभाषायामञोऽभावपक्षे चरितार्थेन अपि ठञा प्रतिपदोक्तत्वेन बाधे पूर्वविप्रतिषेधो अनर्थकः स्यात्। यद्यपि कैयटेनोक्तरीत्या अत्राहरित्यादि दूषितं भाष्यं तथापि आहुरित्यरुचिवीजं निरवकाशत्वे सत्येव प्रतिपदविहितंत्वबाधकत्वे प्रयोजकं न अन्यथा इत्युक्तम्। "शेषाद्विभाषा" (५-४-१५४) इति सूत्रे भाष्येऽपि नैव कबपेक्ष्यं शेषग्रहणं नापि समासान्तापेक्षा किन्तर्हि अनन्तरोयो बहुव्रीह्यधिकारः बहुब्रीहौ सक्थ्यक्ष्णोरिति सोऽपेक्ष्यते इत्युक्तेस्तदपेक्षयैवशेष उक्तपक्षदूयोक्तदोषाणां निरासात्। अस्मिन् अपि अङ्गुलेर्दारुणीतिप्रति यदि प्रतिपदविहित समासान्तैः स्वविषयकपो बाधनेन एवोपपत्तेः। शेषग्रहणवैयर्थ्यं तु न तेषां कबभावे

[490] गबादिभ्योः F1 : गहादिभ्योः G1, G2

सावकाशत्वेन निरवकाशत्वाभावादिति। अत एव “ङ्याप्प्रातिपदिकात्” (४-१-१) इति सूत्रभाष्ये द्विपदा ऋगित्यस्य आण्ग्रहणप्रयोजनकथनावसरेऽकारान्तं पदशब्दमङ्गी-कृत्यादन्तत्वाट्टापि एकदेशो पूर्वान्तवत्वात्प्रातिपदिकत्वे न स्वाद्युत्पत्तिमाश्रित्य टाबृचीति प्रत्याख्यातम्। अन्यथा ऋच्यभिधेयायां प्राप्तङीबाधनार्थं टाबृचीत्यस्य आवश्यकत्वेन प्रत्याख्यानमसङ्गतं स्यात्। तेन ऋच्यभिधेयायामपि द्विपदीद्विपादत्तीष्यत एव। एवं च सूत्रमतेऽपि तयोः सिद्ध्ये टाबृचीत्यत्र पादोऽन्यतरस्याम् इत्यन्यतरस्या-ग्रहणमनुवर्त्यमेव प्रत्याख्यानेन सह फलैक्याय अनभिधानं तु न युक्तम्। मानाभावादिति “ङ्याप्प्रातिपदिकात्” (४-१-१) इति सूत्रे उद्योते “टाबृची” (४-१-९) इति सूत्रे शेखरे च स्पष्टम्। नन्वेवमपि क्रुञ्चा उष्णिहा देवविशा इत्यादौ हलन्ताट्टा सत्त्वेन एकादेशभावेन स्वाद्युत्यत्त्यर्थम् आग्रहणमावश्यकमिति वाच्यम्। कुञ्चानालभेत [४९१] उष्णिहककुभौ देवविशं च मनुष्यविशेष्यश्चेति प्रयोगानुरोधात् तेषामदन्तत्वं स्वीकृत्य “ङ्याप्प्रातिपदिकात्” (४-१-१) सूत्रे भाष्यकृतैवान्यथासिद्धेः कृतत्वात् ननु अन्तादिवतसूत्रे भाष्येऽप्यादिवत्त्वे कानि प्रयोजनानीति प्रघट्टके आप् खद्वा माला आबनयोरेकादेशे आदिवद्भवति यथा शक्येत कर्तुभावान्तात् सोर्लोपोभवतीति क्व तर्हि स्यात्। यत्र एकादेशो न कुञ्चाउष्णिहादेवविशेति हलन्तादवुक्तः स विरुध्यते इति चेन्नोक्तप्रयोगात्तेषामादन्ततत्वस्वीकारेऽपि जातिलक्षण ङीष् बाधनार्थोऽअजादिषु पाठ इति कैयटोक्तरीत्याजादिपाठस्यावश्यकत्वे हलन्तानेवै-तान्पठित्त्वा टाप् कार्यं इति भाष्याशयात्। नेत्येतावताऽदन्तानां कुञ्चादीनामभावो लभ्यते। उक्तादन्तभाष्यीयप्रयोगानुपपत्तेः। वस्तुतस्तु एकदेश्युक्तिरियं हलन्तेभ्य एभ्यष्टाबन्तप्रयोगसिद्धावपि अदन्तेभ्योऽदन्तत्वात् प्राप्तं टापं बाधित्वा स्त्रियां

---

[491] कुञ्चानालभेत G2 : कुञ्चानालाभेत F1, G1

जातिलक्षणङीषापत्तेदुरुद्धारत्वात्। अजादिष्वजन्तत्वपाठस्य आवश्यकत्वात्। भाष्यन्तु [४९२] भागुरिमताभिप्रायेण अत एव मनोरमाकारोऽपि त्रयोऽमी हलन्ता इत्येके इति भागुरिमताभिप्रायेणा स्वरसंसूचितत्वात्। अत एव च वष्टि भागुरिरल्लोपमिति कारिकाव्याख्यानावसरे । इदं भाष्येन दृश्यते इत्यादिना निशादिशयोः इगुपधलक्षणे एकेऽदन्तत्वाट्टापं स्वीकृत्य क्रुञ्चादीनामदन्तत्वं स्वीकृत्य च वाचोत्यादीनां साधुत्वमुक्तमव्ययशेषे शेखरे। अत एव तस्मात् क एवं विषये देवविशमिति भाष्यव्याख्यानावसरे एतेन हलन्तेभ्योऽपि टाबिति [४९३] भागुरिमतं चिन्त्यमिति "ङ्याप्प्रातिपदिकात्" (४-१-१) सूत्रे उद्द्योते उक्तम्। बहुराजेति भाष्यप्रतीकमुपादाय तत्रैव वाचादिशानिशादेरप्युपलक्षणमिति व्याख्यातम्। तद्भागुरिमतसिद्धस्येति शेषपूरणेन व्याख्येयम् अन्यथा एतेनेत्यादिपूर्वोक्तग्रन्थविरोधापत्तेः। अत एव गुरुचरणैः अजन्तस्त्रीलिङ्गवाचेत्यादिलिङ्गविशिष्टपरिभाषायास्वादय [४९४] इति शेखरग्रन्थो भागुरिमतेन आह वाचेत्यादावितीत्येवमवतारितः। लिङ्गविशिष्टपरिभाषामवष्ठाम्भोक्त भाष्यस्य एकदेश्युक्तत्वे भयोरप्येकदेश्युक्तत्वमस्तु वस्तुतः सूत्रमते एतत्तग्रन्थसत्त्वान्नैकदेश्युक्तत्वं युक्तमिति दिक्। क्वचिदवकाशत्वाभावेऽपीति यथा स्वापीत्यादावन्यत्र चारितार्थ्यस्याप्यप्तृन्निति दीर्घस्य झलन्तलक्षणनुमः पूर्वप्रवृत्तिरिति हलन्तनपुंसके परे त्वित्यादिना शेखरे एव स्पष्टम्। अत्र च लक्ष्यानुरोध एव व्यवस्थाहेतुः, तेन स्त्रीणामित्यादौ पदोक्तस्यापि स्त्रिया इति इयङादेशस्य ह्रस्वनद्याप इति नुटः पूर्वन्न

---

[492] भाष्यन्तु F1 : भाष्यतु G1, G2

[493] टाबिति G1, G2 : ठाविति F1

[494] स्वादय F1 : भ्वादय G1, G2

प्रवृत्तिः तदेतत्क्वचिदित्यनेन सूचितमिति सङ्क्षेपः। पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान् कुम्भशब्दस्यैव पादानादिति उत्तरपदत्वेन इति शेषः।

**इति श्रीमता वैयाकरणकुलतिलकेन मन्नुदेवेन प्रणीते दोषोद्धारणेति परिभाषेन्दु-शेखरव्याख्याने बाधबीजं नामकमिति द्वितीयप्रकरणं समाप्तम्॥**

## { शास्त्रशेषं नाम तृतीयं प्रकरणम् }

**प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्॥ ७२॥**

कुमारीशब्दस्यैव सामानाधिकरण्यमिति। न च कुमारीश्रमणात्वारोपेण सामानाधिकरण्योपपत्तेः न ज्ञापक इति वाच्यम्। भिन्नलिङ्गानां तादृशौपचारिकं सामानाधिकरण्यमादाय उद्देश्यविधेयभावाप्रतीतेः। शब्दशक्तिवभावसिद्धत्वादिति गदायां स्पष्टम्। सर्वासां सर्वस्यामित्यादौ तु यणादिवद्भावेन एकादेशस्य आपूत्त्वादनयान्तस्य सर्वनामत्वात् सुट्स्याडारिति शेखरे स्पष्टम्। यत्त्वेकादेशस्य पूर्वोक्तत्वेन ग्रहणादामि सर्वनाम्नः सुडिति [495] कौमुदीस्थं एकादेशस्य इति प्रतीकमुपादाय न चैमाक्ततत्वा-भावा इति यत् शेखरे शंकितं तद्भ्रमसात्। तत्र आबन्तस्य निमित्तत्वेन अनुपादानादिति तच्चिन्त्यम्। कादेशस्य पूर्वान्तत्वेन ग्रहणादित्येतावन्मात्रस्य सर्वनामत्वमिति शेषपूरणसहितस्य सर्वनाम्नः सुट् सर्वसामित्येको ग्रन्थ इति **देहलीदीपकन्यायेन** तावन्मात्रस्य पूर्वपरोभयशेषत्वमिति वा अनेका विकल्पनाः। उपपदविधौ द्विषत्पर योस्तापेरिति स्वश् यथेह भवति। द्विषन्तपः [496] इति एवं द्विषन्तीताप इत्यत्र न भवति। सामासान्तविधौ राजाहसखिभ्यष्टच् यथेह भवति मद्राज् इति मद्राज्ञीत्यत्र न भवति। महदात्त्वे आत्मेहत इत्यात्वं यथेह भवति महाप्रिय इति एवं

---

[495] सुडिति F1 : स्याडिति G1, G2

[496] द्विषन्तपः G1 : विषन्तपः F1, G2

महतीप्रिय इत्यत्र न भवति। ञ्नित्स्वरविधौ ञ्नित्यादिरित्याद्युदात्तत्वम्। स्वरो यथेह भवति दाक्षिरहि चुंम्बकायनिरिति एवं दाक्षी[४९७] अहि चुम्बकायनीत्यत्र न भवति। राजस्वरे ब्राह्मणकुमारयोः परयो राजा चेति प्रकृतिस्वरो यथेह भवति राजब्राह्मणः राजकुमार इति। एवं राजब्राह्मणी राजकुमारीत्यत्र न भवति। बहो नञ्वदुतरपद-भूम्नीत्यादौ समाससंघातग्रहणे चेति इत्यादिरूपसमाससंघातेत्याद्यर्थे उत्तरपदभूयस्त्वं वर्तमानात् बहुशब्दात् परवर्त्यदन्तस्य समासस्य नञ् इव स्वरो भवति इत्यर्थकेन "बहोर्नञ्वदुत्तरपदभूम्नि" दिव्यतिदेश[४९८] सूत्रेण समासान्तोदात्तत्वं यथेह भवति। बहुगोमान् एवं बहुगोमतीत्यत्र न भवति समाससंघातग्रहणे इति विशेषणात् कुसूलकूपकुम्भशालंविले इति पूर्वपदोदात्तत्वं कुसूलबिलं कुसूलीबिलमित्युभयत्रापि भवति। **राजाहसखिभ्य** इत्यादौ लिङ्गविशिष्टपरिभाषाया अप्रवृत्तिरित्यर्थः। समाससंघातग्रहणे चेति समासरूपसंघातग्रहणे चेत्यर्थः। समासान्तविधावित्यनुवर्त्तते। तेन शेषाद्विभाषात्यादेः उभयत्रापि प्रवृत्तिः। अत्र हेतुमाह स्वरेति नञ्सुभ्यामित्यादावित्यर्थः भाष्याच्चेति । तत्र नद्यृतश्चेत्यादि समासान्तविधौ समाससंघातग्रहणे परिभाषायाः प्रवर्त्तनात् शंकाया अज्ञानेन उपपत्तेः[४९९] आह **नद्यन्तानामिति इत्याशयादिति** तथा च अनया बहुव्रीहित्वस्य विशिष्टे अतिदेशात्[५००] शंकाद्युपपत्तिरिति भावः।

**विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ ७३॥**

---

[497] दाक्षी G1, G2 : दाक्षि F1

[498] अतिदेश F1 : आदेश G1, G2

[499] उपपत्तेः F1 : अपपत्तेः G1, G2

[500] अतिदेशात् G1, G2 : अतिदेशा F1

न च “श्वयुवम....” (६-४-१३३) इत्यत्र विभक्तित्वेन विभक्तेरनिमित्तत्वात् युवतीः पश्येत्यत्र कथम् अनया निषेध इति वाच्यम्। वस्तुगत्या विभक्तौ परत सम्प्रसारणस्य प्राप्तत्वात् एतत्परिभाषाप्रवृत्तेरिति प्रदीपोद्द्योतयोः स्पष्टम्। नन्वेवमपि “श्वयुवम....” (६-४-१३३) इति सूत्रे मघवतेत्यत्र लिङ्गविशिष्टपरिभाषया युवतीः पश्येत्यत्र सम्प्रसारणातिप्रसङ्गमाशंक्य नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति समाधायय तावत् उच्यते इत्यादीनां मघवतेत्यस्य छान्दसत्वात् युवतीः पश्येत्यस्य विभक्तौ लिङ्गविशिष्टग्रहणाच्च अन्यथासिद्धया [501] नकारान्तग्रहणं प्रत्याख्याय अथवेत्यादिना “अल्लोपोऽनः” (६-४-१३४) इति योगविभागं कृत्वा तस्य उभयविशेषत्वं प्रसाध्य मघवता युवतीः पश्येत्यनयोः सम्प्रसारणं वारितं [502] भाष्ये तेन युवतीः पश्येत्यस्य प्रकृतपरिभाषा असाधारणोदाहरणत्वभाव एव लभ्यते इति लम संङ्गतमिति चेन्न। शून्या गोमती सुपथीसुपुंसीसखीभगवतीत्यादौ लिङ्गविशिष्टपरिभाषया प्राप्तानां स्वरनिषेधानुमात्वासुङनङणित्वे उत्वौत्वानां वारणाय विभक्तौ लिङ्गविशिष्टाग्रहणमिति परिभाषयैव युवतीः पश्येत्यत्र दोषवारणस्य “युवोरनाकौ” (७-१-१) इति सूत्रे भाष्ये कृतत्वादेतत्परिभाषासाधारणफलत्वात्। अत एव एवमर्थम् इत्युभयोः शेष इति नाश्रयणीयमिति तत्रैव प्रदीपकृतोक्तम्[503]। अत एव “श्वयुवम....” (६-४-१३३) इति सूत्रे शेखरे परे त्वित्यादिनाऽनन्तानामित्यस्य मघवन्शब्दस्य विभ
ाषाविषयत्वम् अभ्युपेत्य मघवतेत्येव प्रयोजनमुक्तम्। न तु युवतीः पश्येति राजकीयमित्यादौ च **एकदेशविकृत न्यायेन** अनन्तत्वमादायाल्लोपेन इत्यतिप्रसङ्गस्य “श्वयुवम....” (६-४-१३३) इति सूत्रोपसंख्यात् नकारान्तग्रहणमनुवृत्त्या वारणाय ऋलृक् सूत्रस्थभाष्यं एकदेश्युक्तिः नकारान्तग्रहणस्य भाष्ये प्रत्याख्यानात् [504]।

---

[501] अन्यथासिद्धया F1 : असिद्धया G1, G2

[502] वारितम् F1 : पारितम् G1, G2

[503] प्रदीपकृतोक्तम् F1 : प्रदिपकृतोक्तम् G1 : प्रदीपकृतौक्तम् G2

[504] प्रत्याख्यानात् F1 : पक्षायात् G1, G2

एकदेशविकृतन्यायो प्राप्तेश्चेति "श्वयुवम...." (६-४-१३३) इति सूत्रे शेखरे स्पष्टम्। अत्र परिभाषायां विभक्ताविति विषयसप्तमी तेन विभक्तौ परतः पूर्वस्य यत् कार्यं विभक्तेश्च यत्कार्यं तत्र सर्वत्र अनया निषेधः शुनेत्यत्र सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्त्वस्य न गोश्वन्निति यथा प्रतिषेधः। तथा शुत्येत्यत्र गौरादित्वान्ङीषि कृते प्राप्तस्य उदात्तयणो हल्पूर्वादिति विभक्तिस्वरस्य न गोश्वन्निति न प्रतिषेधः। अनया निषेधे न श्वन्शब्दग्रहणे धुनीशब्दस्याः। ग्रहणादिति "युवोरनाकौ" (७-१-१) एकात् इति सूत्रभाष्यात्। न चैवं विभक्ति स्थानिककार्येप्युक्तपरिभाषया निषेधे कुमति चेति णत्वस्यापि विभक्तिस्थानिकत्वात् अनया लिङ्गविशिष्टपरिभाषया निषेधात् कवर्गवदुत्तरपदकसमासत्वस्य चित्रगवीणामित्यादौ ङीवन्तेऽभावात् परत्वाप्राप्ते "हलन्त्यम्" (१-३-३) इति सूत्रशब्दरत्ना सङ्गतिरिति वाच्यम्। उक्तभाष्यात् प्रधानन्यायाच्च विभक्तेः प्राधान्येन स्थानित्वे एव एतत्परिभाषाप्रवृत्तेः अभ्युपगमात्[५०५] णत्वे तु नकारस्य प्राधान्यं न विभक्तेरिति भावप्रकाशे स्पष्टम्। ननु **"यदागमा"** (परि-११) इति परिभाषया आगमानामपि धर्मवैशिष्ट्यबोधनात् नकारस्य विभक्तित्वात् प्राधान्याच्च एतत्परिभाषाप्रवृत्त्यापत्तिरिति चेन्न। विभक्तावित्यावर्त्य विभक्तिस्थानिकनिषेधविषये विभक्तित्वेन अपि विभक्तेः प्राधान्येन नाश्रयणे एव निषेधाङ्गीकारात्। नकारास्य उक्तरीत्या विभक्तित्वेऽपि प्राधान्येऽपि च तत्त्वेन स्थानिताया अनाश्रयणमपि तु तत्त्वेन विभक्त्यशलत्वेन स्थानित्त्वेऽपि प्राधान्येन आश्रयणमपि अविशेषणत्वेनेति न दोषः। एतेन एकशेषप्रकरणे प्रदीपे स्त्रीगवीनां इति प्रयोगे "हलन्त्यम्" (१-३-३) सूत्रे मनोरमायां चित्रागवीनां इति प्रयोगे च कुमति चेति णत्वाभावो व्याख्यातः। कवर्गदुत्तरपदकसमासत्वस्य ङीबन्ते लिङ्गविशिष्टपरिभाषालभ्यस्य विभक्तेः णत्वे कर्तव्ये अनया निषेधात्। नव्यतरणां[५०६] तु तत्र सणत्वपाठमङ्गीकृत्य दन्त्यपाठे लेखकप्रमादकृतत्वकल्पना निर्बीजेत्यपास्तम्।

---

[505] अभ्युपगमात् F1 : उपगमात् G1, G2

[506] नव्यतरणाम् G1 : नव्यातराणाम् F1, G2

इयञ्चापूर्ववचनरूपो "अनेकाल्..." (१-१-५४) इति सूत्रे भाष्ये पठितान्तरमाह। घटघटीति[507]। अत्र विभक्तिग्रहणस्य उपलक्षणत्वात् उपपदविधौ द्विषत्परयोस्तापेरित्यादि भाष्योक्ता लिङ्गविशिष्टपरिभाषादोषाणां संग्रहः। यत्तु "ङ्याप् प्रातिपदिकात्" (४-१-१) इति ङ्याप् ग्रहणं लिङ्गविशिष्टपरिभाषाया अनित्यत्वात्तन्मूलैवेति तन्न भाष्यकृता ङ्याव् ग्रहणस्य प्रत्यख्यानात् सूत्रमते ङ्याबन्तात्तद्धितोत्पत्त्यर्थे। ननु भाष्योक्त मता दोषेषु यूनस्तिरित्यस्या परिगणनात् तद्विषये लिङ्गविशिष्टपरिभाषाया प्राप्नोतीति चेदत्रोच्यते। किं ङ्यावृग्रहणं प्रत्याख्यानवादिभाष्यमते आपाद्याते अतोङ्यन्तादावन्ता-त्तद्धितोत्पत्तिरिति सूत्रमते। नाद्यः प्रातिपादिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति अनया हि लिङ्गबोधकप्रत्ययरहिते दृष्टानां प्रातिपदिकत्वव्याप्यधर्माणां लिङ्गप्रत्ययविशिष्टे प्रसिद्धेऽतिदेशो यथा अयस्कुम्भीत्यत्र कुम्भीशब्दे कुम्भत्वातिदेशः। एवं पूनीशब्दे अनया पुंवत्त्वात् अतिदेशाद्यूनस्तिरिति ति प्रत्ययातिप्रसङ्गो वाच्यः। स च न सम्भवति येन नाप्राप्तिन्यायेन इति प्रत्ययस्य अनान्तलक्षणङीव्बाधत्वात् बाधकविषये ङीपोऽप्रसङ्गेन यूनीति ङीवन्तस्यैव अभावेन निरधिष्ठानपुम्वत्त्वातिदेशा संभवात् नान्त्यः तद्धितोत्पत्ति ङ्याभ्यः। परैव न पूर्वेत्यर्थेन यत्र ङ्यापृतद्धितयोः युगपत्प्राप्तौ परत्वान्तरङ्गत्वाभ्यां तद्धितस्य ङ्याभ्यः प्राक् प्रसङ्गस्तत्रैव अनेन नियमेन तस्य प्राक् प्रसङ्गो निवर्त्यते यथा लोहिनिकेत्यादौ इह तु ति प्रत्ययस्य अपवादत्वात्तद्विषय उत्सर्गस्य अप्रवृत्तेः युगपत्प्राप्त्यभावादित्यन्यत्र स्पष्टम्। अन्ये तु उक्तार्थकङ्यावृग्रहणेन एव लोहिनिका लोहितिकेति रूपद्वयसिद्धेः लोहिताल्लिङ्गबाधनं वेत्यनेन ङ्यावृग्रहणकृतनियमस्य कालिकेत्यादिफलकस्य अनित्यत्वज्ञापनाद् यूनीतिरिति प्रयोगस्य निरासः। अत एव ङ्याबग्रहणप्रत्याख्यान-परभाष्यशेषे कथं लोहिनिकेति वक्ष्यते। तल्लौहिताल्लिङ्गबाधनं वेति भाष्यप्रतीकमुपादाय अवश्यं कर्त्तव्यतां दर्शयति। क्रियमाणेऽपि ङ्यावृग्रहणे लोहितान्मणौ वर्णेश्च अनित्येदक्ते इति प्रतिपत् विधानात् बलीयस्त्वात् स्त्रीप्रत्ययं बाधित्वात कन्नेवस्यदित्यु-

---

[507] घटघटीति F1 : पटपटीति G1, G2

भयथा आवश्यकत्वप्रतिपादकः कैयटः सङ्गच्छते। परत्वादिति वक्तव्ये प्रतिपदविधेः बलीयस्त्वादिति हेतूपन्यासश्चिन्त्यो निरवकाशत्वाभावादिति त्वन्यदित्याहुः। भिक्षादिषु युवतिरिति निर्देशः तदपि नित्यत्वज्ञापक इत्यपि केचित्। एतत्फलितं तद्धितपदं तिप्रत्ययात् व्यतिरिक्तमिति शेखरेऽभिहितम्। एतेन ङ्याब्ग्रहणं ङ्यावन्तात्तद्धितोत्पत्तिः। यस्मात् ङ्याभ्यां प्राङ् माभूदिति पक्षे तु "यूनस्तिः (४-१-७७) इति प्राप्नोत्येवेत्यपास्तम्। यत्तु मान्याः "सर्वत्र लोहितादिकतन्तेभ्यः" (४-१-१८ ) इति सूत्रे आरम्भसामर्थ्यादिव प्राचां ग्रहणनिवृत्तौ सर्वत्र ग्रहणमुदीचांमते चरितार्थस्य चाप आवट्यानीत्यत्र प्राचां मतेऽपि परत्वाद्बाधकस्य बाधनार्थमिति भाष्योक्तसर्वत्रग्रहणप्रयोजनस्य चावन्तेऽ प्येकादेशस्य पूर्वान्तत्वेन न यञन्तत्वात् ष्फसिद्धेः अन्यथासिद्धिप्रसङ्गाच्चातुरर्थिक स्त्रियाम् इत्यधिकारविहितस्त्रीप्रत्ययान्तत्वात् अधिकारविहितस्त्रीप्रत्ययो न भवति इत्यस्य सर्वत्रग्रहणेन अवश्यज्ञापनीयत्वत् यूनीतिरिति प्रयोगो न भविष्यति ष्फप्रत्ययान्तान्ङी पुषित्त्वसामर्थ्यादिव यङश्चाबित्यत्र ञ्यङ ष्यङोः सामान्यग्रहणार्थात् यङन्ताच्चबित्याहुः। तन्न ण्ङीत्यत्र उदीचां[508] मते सावकाशे शार्ङ्गरवादिङीनं बाधित्वा आवट्यायनीत्यादाविव सर्वत्रग्रहणात् प्राचां मते प्राप्तस्यापि ष्फस्यवारणायात् इत्यनुवृत्तेः शेखरे स्पष्टत्त्वेन उक्तरीत्या ज्ञापकस्य वर्णयितुं शक्यत्वात्। यदपि ष्फविधानवत् इति न अनुवर्त्ततेऽकारान्तात् ष्फतस्यायनादेशे एकादेशेन अपि रूपसिद्धि ष्फस्य तद्धितसंज्ञायायस्येति लोपप्रयोजिकाया आनर्थक्यप्रसङ्गात्। अत **एवासुरेरूपसंख्यानाम्** इति वार्त्तिकस्यापि सूत्रेणैव सङ्ग्रह इति चाबन्तादेकादेशे ष्फोन प्राप्नोत्यत इति तत्राधिकारदिति नव्यतरोक्तं दूषणं प्रयुक्तमिति तदपि चिन्त्यम्। परत्वाच्चापि **सकृद्गतिन्यायेन** (परि-४० ) पुनः ष्फस्याप्राप्तेः किञ्चिद्ग्रहणानुवृत्तौ हि गार्गीत्यादावुदीचां मते ष्फस्याप्राप्तया यञन्तान्ङीपि गार्गीति सिद्धावपि प्राचां मते यञन्तात् ष्फङीपोः प्राप्तयोर्ङ्यैव ग्रहणकृतनियमेन यूनीतिरित्यापादकत्वम् उक्तरीत्या प्रातिपदिकत्वञ्चाप्य-यञन्तत्वस्य लिङ्गविशिष्टपरिभाषाया ङीबन्तोऽतिदेशात् ष्फे तस्य यस्येति लोपार्थ

---

[508] उदीचाम् G1, G2 : प्रदीचाम् F1

तद्धितसंज्ञाया आवश्यकत्वेन वैयर्थ्याभावात् आसुरेरूपसंख्यानस्य अपूर्वत्वापत्तेः। अत इति अनुवृत्तौ तु लिङ्गविशिष्टपरिभाषाया अत्वानतिदेशात् गार्गीत्यत्राप्राप्तौ तद्धितग्रहणं व्यर्थं सद्यन्तस्य एव अत्वस्यापि बाधनद्वाराऽजन्तात् ष्फ बोधयति तेन आसुरायणीत्यस्य सिद्धिरिति दिक्।

नन्वेवमपि बहवो गोमन्तो यस्यामिति विग्रहे बहुव्रीहौ ङीपि तदन्ते लिङ्गविशिष्ट परिभाषाया [509] बहुव्रीहित्वातिदेशाच्छेषाद्विभाषेति कपि बहुगोमती [510] केति स्यान्न तु बहुगोमत्केतिचेन्न। ङ्याब्ग्रहणप्रत्याख्यानपक्षे ङीप्कपोः[511] प्राप्तयोः परत्वान्तङ्गाभ्यां कबुत्पत्तेर्भाष्यकृतैव उक्तत्वात् ङ्याब्न्तातोत्पत्तिरिति मते ङ्याब्ग्रहणकृतनियमस्य अनित्यत्वेन समाधानात्। यत्तु ङ्यावन्तात् तद्धितोत्पत्तिर्न तु ततः प्रागिति पक्षे समासान्तविधोणि अङ्गविशिष्टपरिभाषाया अप्रवृत्तेः। स्त्रीप्रत्ययान्तस्य बहुव्रीहित्वस्यैव अभावान्न कबिति तच्चिन्त्यम्। "ङ्याप्प्रातिपदिकात्" (४-१-१) इति सूत्रभाष्यप्रामाण्यात् समासात् समासावयवो यत्र स्त्रीप्रत्ययान्तो मद्रराज्ञीत्यादौ तद्विषयसमासान्तविधौ राजाहसखिभ्यः इत्यादौ तस्या प्रवृत्तावपि बहुव्रीहेः ऊधसो ङीष् इति सूत्रभाष्य-प्रामाण्यात् स्मासरूपसंधातविषये समासान्तविधौ परिभाषायाः प्रवृत्तेः एतेन अव पश्ये यत्र स्त्रीप्रत्ययान्तस्तत्रैवं सामासान्तविधौ सा न प्रवर्त्तते इति नव्यतरोक्तिः न युक्ता प्रमाणाभावादित्यपास्तम्। यदपि बहुव्रीहिप्रकृतिकङीषन्तस्य नद्यन्तत्वाभावात् पूर्वपक्षानुत्थानात्। व्यपदेशिवद्भाववर्णयोरेव नदीसंज्ञेति पक्षावलम्बनात् पूर्वपक्षाशयवर्णनस्य कर्त्तुं शक्यत्वेऽपि न नद्यन्तानां यो बहुव्रीहिरिति तत्समाधाने यावन्नद्यन्तावयवो बहुव्रीहिरित्यर्थकल्पने बहुकुमारीक इत्यादावव्याप्तिर्यत्किञ्चिन्नद्यवयवबहुव्रीहिरित्यर्थकल्पने

---

[509] परिभाषाया F1 : परिभाषया G1, G2

[510] बहुगोमती F1 : बहुगति G1, G2

[511] कपोः G1, G2 : किप F1

कुमारी भार्या इत्यादावतिव्याप्तिरिति नद्याः[512] परः समासार्थपदस्य अन्तावयवः प्रत्त्यासत्त्या नदीरूपस्य कप परो भवति सोऽपि समासस्यान्तावयवो यथा भवति तथेति समासार्थोत्तरपदावयवाः समासान्ता इति निष्कृष्ट [513] सूत्रार्थे तात्पर्यलिङ्गविशिष्ट-परिभाषायाः समासान्तविधानप्रतिरूपसमाधानेन तस्य लङ्घयितुम् अशक्यत्वादिति भाष्यप्रयोजनम्। तदप्यसत्। सर्वत्र समासान्तविधौ परिभाषाया अप्रवृत्तिम् अभिधाय तामेव पुनरवलम्ब्य पूर्वपक्षाशयवर्णनस्य असङ्गतेः। यथाकथंचित् सूत्रार्थवर्णनेऽपि नद्यन्तानां यः समास इति भाष्याक्षरायोजनाच्च। "गोस्त्रियो...." (१-२-४८) "उपसर्जनस्यान्तः" (२-२-३०) इति सूत्रभाष्यप्रामाण्यात् द्युतश्चेत्यादीनां समासान्ता इत्यनेनैकवाक्यतया नद्यन्तानामिति बहुवचनस्य राज्ञां मतं गुरूणामागमनमित्यादाविव प्राधान्यसूचकतया च प्रधानीभूतनद्यन्तावयकबहुव्रीहेः समासस्य तदर्थकवाक्यस्यान्तावयवो अर्थान्नद्यान्तात्परः कव् भवतीत्यर्थेन अदोषाच्च। उक्तभाष्य प्रामाण्यादेव च प्रातिपदिकादित्यस्य समासान्तप्रकरणेऽसम्बन्ध एव। एतेन समासार्थपदसमुदायस्यैवावयवः समासान्तेनोत्तरपदमात्रस्येति नव्यतरोक्तिः। प्रत्युक्ता आपञ्चमसमासे अधिकृतस्य प्रातिपदिकस्य इत्यस्य अन्वयप्रसङ्गादित्यपास्तम्। तादर्थ्यात्ताच्छब्द्यमिति सामान्यप्रवृत्तात् भाष्यादुत्तरपदावयवत्वस्याप्रतीतेश्च [514] सरूपसूत्र-भाष्यमपि नास्माकं प्रतिकूलमिति "समासान्ता" (५-४-६७) इति सूत्रे शेखरे स्वरूपसूत्रे उद्योते स्पष्टम्। तथा हि कृद् द्वन्द्वानामेकविभक्तौ परत एकशेष इति पक्षे **स्वरसमासान्तेषु दोष** इति वार्त्तिकव्याख्यानावसरे समासान्तेषु दोषमुपक्रम्य ऋक् च ऋचौ समासान्ते कृतेऽसारूप्यादेकशेषो न प्राप्नोति इति भाष्ये उक्तम्।

---

[512] नद्याः F1 : नद्यः G1, G2

[513] निष्कृष्ट F1 : बिकृष्ट G1, G2

[514] प्रतीतेश्च F1 : प्रतीतश्च G1, G2

तस्यायमाशयः। संख्यावाच्येव अत्रपक्षे एकशब्दपूर्वभाष्य संदर्भादितश्च समासार्थपदसमुदायावयवसमासान्तप्राग्वर्त्तिसुपो लुका लुप्तत्वेन प्रत्ययलक्षणाभावात् सरूपयोः ऋच् शब्दयोर्ना अस्त्येकविभक्तिपरत्वं तदन्तसमुदायात् उत्पन्नसुपमादायापि न तत्समासान्तेन व्यवधानात्। तद्विशिष्टविभक्तिपरत्वेन सरूपत्वमिति यत्तु तुल्यता-वाच्येकशब्दो वचनसामर्थ्यात् प्रत्ययलक्षणम् आश्रित्य भाष्यप्रवृत्तेः। कथमन्यथा तत्रैव स्वरे दोषमुक्रम्या समासान्तोदात्तत्वे कृते एकशेषः प्राप्नोति इदमिह सम्प्राधार्यं समासान्तोदात्तत्वं एकशेष इति किं अत्र कर्तव्यं परत्वात् समासोदात्तत्वे च दोषो भवतीति भाष्ये उक्तम्। संख्यावाच्येकशब्दसमाश्रयणे हि अवयवविभक्तेर्हि लुको वलवत्त्वात् पूर्वं लुकि समुदायोत्तरविभक्तिनिमित्तकत्वेन बहिरङ्गादेकशेषात् अन्तरङ्गस्यस्वरस्य परत्वेन बाधकत्वोक्तेः युक्तत्वापातादिति तच्चिन्त्यम्। परत्वादित्यस्य उत्कृष्टत्वात् पूर्वकालप्राप्तत्वादिति उद्योते एव समाधानात्। कृते द्वन्द्वे एकविभक्ताविति वदता भाष्यकारेण समुदायोत्तर सुपमादायैव दोषस्य सूचनाच्च। उत्तरपदावयवः समासान्त इति तव मते प्रत्ययलक्षणेन विभक्तौ परतः सारूप्यसद्भावादुक्त भाष्यविरोधापत्तेश्च ननूत्तरपदावयवत्वेपि उत्तरपदसम्बन्धिविभक्तेः प्राक् "समासान्ता" (५-४-६७) इति आश्रयणान्न भाष्यविरोध इति चेन्न। समासान्त इत्यत्र अन्तशब्दस्य चरमावयववाचित्तया सुपः प्राक्प्रवृतौ[515] समासार्थोत्तरपदचरमावयवत्वस्य सिद्धया-पत्तेः[516]। बहुचर्मिकेत्यादयः सुपः परत्वादित्यनापत्तेश्च न च प्रतिपदं विधीयमान-समासान्तानान्तु समासावयवत्वमिति स्वीकारात् बहुचर्मिकेत्यत्र शेषाद्विभाषेति कपः सत्वान्न दोष इति वाच्यम्। प्रमाणम्[517] अर्द्धजरतीयस्य अनौचित्यात्। समासात्तोदात्त-त्वमुत्तरपदस्य चेति विकल्पाद्ये इदं प्रथमकार इत्यादौ कपोऽन्तोदात्तत्वम् इतरत्र समासान्तोदात्तत्वमित्यन्त इति सूत्रभाष्यविरोधापत्तेश्च। तत्रैदं प्रथमकार इत्यत्र

---

[515] प्राक्प्रवृतौ F1 : वाक्प्रवृत्तौ G1, G2

[516] सिद्धयापत्तेः G1, G2 : असिद्धयापत्तेः

[517] प्रमाणम् G1, G2 : विप्रमाणम् F1

शेषाद्विभाषेति कपः प्रतिपदविधानात् समासावयवत्वात् उक्तदोषात् अवस्था योजनेऽपि अनृत इत्यत्र ऋक्पूरिति समासान्तस्य प्रतिपदविधानात् उत्तरपदावयवत्वाच्च। शब्दकारस्यैव उदात्तत्वसिद्धयान्तोदात्तत्वानापत्तिः इत्युक्तेः सङ्गत्यापत्तेः [518] । एकदेश्युक्तत्वकल्पनन्तु प्रमाणाभावादयुक्तम्। ननु द्वित्रिभ्यां पाद्धन्मूर्द्धसु बहुब्रीहाविति सूत्रभाष्यविरोधः। तत्र हि मूर्धास्विति निर्देशान्नकारान्तग्रहणे अकारान्तस्योपसंख्यानात् द्विमूर्धस्त्रिमूर्ध इत्याशङ्क्य उदात्तलोपात् सिद्धं पूर्वपदप्रकृतिस्वरं बाधित्वाऽनेनोत्तर-पदान्तोदात्तत्वे कृते लोपे च सत्युदात्तनिवृत्तिस्वरेण असिद्धमित्यभिधाय इदमिह सम्प्रधार्यमन्तोदात्तत्वं क्रियतां लोप इति। परत्वाल्लोप इत्युदात्तलोपाभावम् आशङ्क्य पुनरुक्तमेवन्तर्हि अन्तोदात्तत्वं क्रियतां समासान्त इति परत्वादन्तोदात्तत्वं नित्य-समासान्त इत्यादि नोभयोर्नित्ययोः परत्वादन्तोदात्तत्वं तत्र कृते समासान्तः समासान्ते कृते टिलोपः टिलोपे कृते उदात्तनिवृत्तिस्वरेण सिद्धमित्युक्तं कैयटेनापि एवन्तर्हीति प्रतीकमुपादाय यदा कृते समासे समासान्तः क्रियते इति पक्षस्तदा सम्प्रधारणैवात्र नास्तीत्युक्तम्। ततश्चतद्भाष्यकैयटाभ्यां समासचरमावयवत्वमेव समासान्तं लभ्यते न तु समासार्थपदसमुदायावयवत्वमिति चेन्न। गोस्त्रियोः [519] उपसर्जनस्यान्त इति सूत्रद्वयं भाष्यप्रामाण्येन अस्य भाष्यस्यैकदेश्युक्तित्वेनाविरोधात्। समासान्तानां समासार्थपद-समुदायावयवत्वेऽपि आद्युदात्तत्वविशिष्टसमासान्तप्रवृत्तिसमकालंसमाससंज्ञायां पूर्वस्य शेषनिघातेनोत्तरपदभूतमूर्द्धन्शब्दाकारस्योदात्तत्वे समासान्तस्य शेषनिघात मूर्ध इत्यादावोदात्तनिवृत्तिस्वरसिद्धिः निर्विघ्नसमासार्थोत्तरपदावयवः समासान्त इति पक्षे तु अन्तरङ्गत्वादुत्तरपदान्तोत्तरात्प्राक् उत्तरपदावयवे समासान्ते कृते समास इति मूर्द्धेति विशिष्टस्य उत्तरपदान्तोत्तरपदत्वात् नकारान्ते भावादुत्तरपदान्तोदात्तत्वं न प्राप्नोतीत्युदात्ततद निवृत्तिस्वरेण इष्टसिद्धिः वक्तुं शक्यैव यत्तु मूर्द्धन्शब्दावयवत्वात्

---

518 सङ्गत्यापत्तेः F1 : असङ्गत्यापत्तेः G1, G2

519 गोस्त्रियोः F1 : गौस्स्त्रियोः G1, G2

समासान्तस्य विशिष्टे मूर्द्धन्शब्दरूपोत्तरपदत्वमस्त्येवेति नान्तनिर्देशेऽपि सूत्रेण एव सिद्धिः इत्याशयः। युक्तश्चैतत्। कृते समासे समासान्त इत्याद्यपक्षमादाय उदात्तलोपात् सिद्धिमित्येतदुपपादनस्य कर्तुमशक्यत्वेऽपि सति विशिष्टत्वात्प्रत्ययस्वरेण बहुव्रीहिप्रयुक्त पूर्वपदप्रकृतिस्वरस्य बाधनादन्यथासिद्धत्वात्। अथ ङचश्चित्करणात् ज्ञापकात् सति विशिष्टप्रत्ययस्वरो बहुव्रीहिस्वरस्य बाधक इति कल्पते तत्किमिति समासान्तोत्तर-पदावयवत्वे समासान्तानां न कल्पते इति तन्न युक्तम्। तथा सति प्रतिपदविहित-समासान्तविषये बहुकुमारिका नगरिका नगरीत्यादौ कप उत्तरपदभूतकुमारीशब्दा-वयवत्वाद्विशिष्टे कुमारीशब्दरूपोत्तरपदत्वम् अस्त्येवेति गोस्त्रियोरिति ह्रस्वापत्तेः। न च स्त्रीप्रत्ययान्तत्वेन अस्ति नकारान्तत्वमपि नास्तीति तुल्यत्वात् समृद्धा पूर्यस्य समृद्धपुरो राजेत्यादौ पूर्वपदविहितसमासान्तानां द्वित्रिभ्यांषमूर्द्ध इत्यादीनां उत्तरपदावयवत्वस्यैवत्वया स्वीकारात् कृते समासे समासान्त इत्येतत्यप् उक्तसूत्रभाष्यैकदेशयुक्तित्वस्य वक्तव्यतया किमिति "गोस्त्रियोः" (१-२-४८) इति सूत्रभाष्यात् विरुद्धं समासार्थपदसमुदायवयवत्वं समासान्तानां न अङ्गीकारोपि एतेनैतेन च समासार्थपदसमुदायावयवत्वं समासानामवलम्ब्य विग्रहवाक्ये एतत्समाससमासान्त प्रवृत्त्या तस्य तत्सन्नियोगशिष्टाद्युदात्तत्वेन एकवाक्यतापन्ने शेषनिघाते च पूर्वपदस्य उदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वराप्राप्तेर्ङच श्चित्वं व्यर्थं सत्समासान्त-विधावाद्युदात्तश्चेत्यस्य असम्बन्धः ज्ञापकं भवतीति बहुव्रीहिस्वरस्य प्रत्यय स्वरबाधकत्वात्। द्विमूर्द्धः इत्यादौ दोषं वारयन्तो नव्यविवरणकाराः प्रत्युक्ताः समासार्थपदसमुदायावयवत्वं पक्षस्य पूर्वं निरस्तत्वाच्चेति दिक् इत्यपास्तम्। तादर्थ्यात्ताच्छब्द्यमिति सामान्यप्रवृत्तभाष्यसिद्धस्य समासार्थसमुदायावयवत्वस्यैव मया स्वीकारेण कल्पनायस्य अभावाच्चेत्यलम्। तस्यापत्यमित्येकवचननपुंसकाभ्यामिति। तस्य इति एकवचननिर्देशादिति क्रमेणान्वायः। तस्येति नपुंसकनिर्देशादिति तु नार्थः। एकशेषेणोभयनिर्देशस्य कर्त्तुं शक्यत्वादित्युद्योते स्पष्टम्। गार्ग्यौ गार्ग्यौ इत्याद्ययुक्तमिति मूले आदिपदेन गर्गयोः अपत्येऽर्थे गार्ग्य इति न स्यादिति सङ्ग्राह्यम् अपत्यमिति एकवचन निर्देशादित्यपि नार्थः। तत् विवक्षायामपि गार्ग्यावित्यादेः एकशेषेण

सिद्धत्वादिति केचित्। गुरवस्तु अपत्यमित्येकवचननिर्देशादित्येव व्याचक्षते। तेषामयमाशयः। अपत्यमित्येकस्य विवक्षायाः एकस्मिन्नेवापत्ये गुणगतबहुत्वारोपेण बहुवचनान्तस्य गार्ग्या इत्यादेरेकशेषेण निर्वाहादविवक्षाया आवश्यकत्वं नित्यशब्द-वादिमते औपगव इत्यादौ उपसर्जनेऽभेदैकत्वं संख्यास्वीकारेण द्वित्वादेरभानात्तस्य इत्येकत्वाविवक्षायाः फलाभाव इति प्राहुः । अपत्यमिति नपुंसकनिर्देशादिति अन्वयः अयमर्थः यश्शब्दोलिङ्गवैशिष्ट्येन प्रयुज्यते तल्लिङ्गस्य तदर्थमात्र परिच्छेदकत्वं तन्त्रत्वं तदभावेऽतन्त्रत्वम्। यथा युग्यं च पत्रे इत्यादौ युग्यमिति नपुंसकनिर्देशत्तस्य तदर्थपरिच्छेदकत्त्वे युग्यो गौरित्यसिद्ध्यापत्त्याऽतन्त्रत्वमुच्यते परमियान्विशेषः निपातलिङ्गापत्त्यादिशब्दस्थले तल्लिङ्गे तदर्थपरिच्छेदकत्वाभावः तत्च्छब्दवोध्यार्थ परिच्छेदकत्वाभावेन असंभवान्नापि तदर्थकाणादिशब्दवोध्यार्थपरिच्छेदकत्त्वाभाववत्त्वेन पर्यवस्यति अपत्यशब्दावच्छेदेन तदर्थ परिच्छेदकत्वाभावाभावस्तल्लिङ्गे सन्नपि तदर्थकाणादि शब्दावच्छेदेन तदभावस्तल्लिङ्गे अक्षत इत्यर्थः। अपत्यशब्दावच्छेदेन तदर्थैकतरल्लिङ्गापरिच्छेद्यत्त्वे अपि तदर्थकाणादिशब्दावच्छेदेन तदर्थे तल्लिङ्गपरिच्छेद्यत्वा-भाव इति यावत् ।अनियतलिङ्गयुग्यादिशब्दस्थले तु तल्लिङ्गे युग्यादिशब्दावच्छेदेन अपि तदर्थपरिच्छेदकत्वाभाव एव संभवतीति । अत एव भगवता भाष्यकारेण निरुक्ततन्त्रत्वाभिप्रायेणापत्याभिधाने[५२०] स्त्रीपुंलिङ्गस्य न स्यादिति आशङ्क्य निरुक्तातन्त्रा-भिप्रायेणैव सिद्धन्तु प्रजनस्य अविवक्षितत्वात्[५२१] प्रजनोऽत्र विवक्षितः प्रसवमात्रं विवक्षितं न तु लिङ्गसंख्ये अपि । स च सर्वलिङ्ग इति समाहितम्। निरुक्तविशेषाभिप्रायेणैव नियतलिङ्गशब्दविषयं शब्दशक्तिस्वभावसिद्धनिदर्शनमुपन्यस्तमेकार्थे शब्दान्यत्वात्। दृष्टलिङ्गान्यत्वं यथा पुण्यतारका नक्षत्रं गेहं कुटीति भावे इति सूत्रेऽपि स्फुटमेतत्। तस्मादपत्यमिति नपुंसकलिङ्गे तदर्थकाणादिशब्दावच्छेदेन तदर्थपरिच्छेदकत्वे गार्ग्यावित्याद्यसिद्धेः तदतन्त्रत्वमनयोच्यते इति मूलं सम्यगेवेति संक्षेपः एतेन

---

[520] अपत्याभिधाने F1 : सत्याभिधाने G1, G2

[521] अविवक्षितत्वात् F1 : विवक्षितत्वात् G1, G2

यत्त्वपत्यमिति नपुंसकनिर्द्देशादौपगव इति पुंस्त्वं न प्राप्नोतीति लिङ्गविवक्षायां नव्यतरैः उदात्तजह्रे तन्निरसारम् अपत्यशब्दस्य [५२२] नित्यनपुंसकत्वेन लिङ्गविवक्षायाः तन्न वक्तुमशक्यत्वात् अपत्यार्थवोधकप्रत्ययस्य तु नपुंसकलिङ्गवैशिष्ट्येन अभिधायकत्वं प्राप्तमेकार्थिशब्दन्यत्वात् दृष्टं लिङ्गान्यत्वं पुष्यस्तारकान् क्षत्रमित्यादाविवेत्येवं भाष्यकारैः [५२३] समाहितं चेत्यपास्तम् एकार्थिशब्दान्यत्वादिति भाष्यस्य विधायकाभावेन तत्रापि कथमित्याशंकायामुत्तराभावात् निदर्शनमात्रेण अर्थासिद्धेः [५२४] उक्तरीतेरेव आश्रयणीयत्वात्[५२५]।

**सूत्रे लिङ्गवचनमतन्त्रम्॥ ७४॥**

अर्ध नपुंसकम् इति सूत्रे अर्द्धमिति नपुंसकलिङ्गस्यार्द्धशब्दार्थपरिच्छेदकत्वे पुंलिङ्गार्द्धशब्दग्रहणा प्रसक्तेः नपुंसकग्रहणं व्यर्थं सदुक्तविधौ तन्त्रत्वं ज्ञापयति इत्याहा। अर्द्धमिति। न च षडभ्यो लुगित्यत्र अनया वहुवचनाविवक्षायां गौणे लुगापत्तिरिति वाच्यम्। अविवक्षायामिष्टापत्तेः प्रियपञ्चानइत्यादौ। गौणे लुग्वारणन्तु विहितविशेषणाश्रय-णादेव ननु प्रियपञ्चामित्यादौ षट्चतुर्भ्यः इति नुट् स्यादेव तत्र षट्चतुर्भ्यामिति द्विवचननिर्द्देशस्य गुरुत्वादसङ्गतत्वाच्च बहुवचननिर्द्देशस्य लाघवार्थत्वात् सङ्गतत्वाच्चा-वश्यकेनार्थं अप्राधान्यवोधकत्वे प्रमाणाभावात्। प्रियच तसृणामित्याद्यनुरोधे [५२६] न विहितविशेषणानां आश्रयणस्य शेखरेऽभिधानाच्च एतेन षड्भ्यो लुगित्यत्र

---

[522] अपत्यशब्दस्य G1, G2 : अपत्यशब्दत्वेन F1

[523] भाष्यकारैः F1 : भाष्यकारेण G1, G2

[524] अर्थासिद्धेः F1 : अर्थासिद्ध G1, G2

[525] आश्रयणीयत्वात् F1 : आश्रयणेव G1, G2

[526] तसृणामित्याद्यनुरोधे F1 : तृसृणामित्याघनुरोध G1, G2

बहुवचननिर्देशात् षडर्थ प्राधान्यबोधेऽपि षट्चतुर्भ्यश्चेत्यत्रासंभवः षट्चतुर्भ्यामिति द्विवचननिर्देशे गौरवाल्लाघवार्थं बहुवचननिर्देशस्य उपक्षीणत्वादिति परास्तम्। अन्वितार्थं द्विवचनमपेक्ष्य अनन्वितार्थबहुवचनाश्रयणे केवलद्वन्द्ववृत्तिमपैक्ष्यकशेषसंहितायाः तस्या आश्रयणि च गौरवस्य स्पष्टत्वादित्यपास्तम्। षडिति संज्ञाशब्दस्य अनेकसंज्ञभिप्रायेण बहुत्त्ववदर्थप्रतिपादकतया बहुवचनस्य अनन्वितार्थकत्वाभावात् बहुवचनान्तस्यैव संज्ञात्वाच्च एकशेषस्य अभावेन वृत्तिद्वयकल्पनाया अभावाच्च । षड्भ्य इत्यादावुक्तरीत्या बहुवचनावश्यकत्वेन तस्यार्थप्राधान्यबोधकत्वाभावाच्चेति चेन्न। प्रियपञ्चानामित्यादेः[५२७] इष्टत्वात् प्रियपञ्चानामित्येव रूपमिति ग्रहे तु षट् चतुर्भ्यश्चेत्यत्र लुप्तपञ्चम्यन्तं षडिति स्वीकृत्य विहितविशेषणं चाश्रित्य नुड् वारणीयः चतुर्भ्य इति बहुवचनन्तु तिसृभ्यो जस इति वेति बोध्यम्। यत्तु प्रियपञ्चानः प्रियपञ्चां प्रियचतुरामित्यादौ गौणे लुग्नुकोरति प्रसङ्गः प्राधान्येन षडर्थबोधकात्परत्वस्य सत्वादित्याशंक्य उभयत्र विहितविशेषणाश्रयणादित्याह तच्चिन्त्यम्। एवं सति परमचतुर्णामित्यादौ नुडनापत्तेः[५२८] । प्रियपञ्चा द्रौपदीत्यादौ षडन्त्येऽपि न षडिति निषेधः। अन उपधेति ङीप् न। स्त्रियां यत्प्राप्नोति तन्नेत्यर्थे नस्यापि निषेधादिति स्त्रीप्रत्ययप्रकरणे शेखरे उक्तम्। यत्त्वनो बहुव्रीहेरित्यनेन षडित्यस्य परत्वाद्बाधर्मन्यमानाः पक्षे ङीष्टापाविच्छन्ति विध्युन्मूलकत्वेन सकलप्राप्तिबाधकन्तु न युक्तम्, दामहायनान्ताच्चेत्यत्र अव्ययग्रहणा-ननुवृत्तेः उद्दामाडवदवेत्यत्र डात्प्रतिषेधावपि पक्षेस्तोऽपिनाऽन उपधेत्यनेन पक्षे ङीविति सिद्धान्तभङ्गप्रसङ्गादिति तच्चिन्त्यम्। न षडित्यस्यानो बहुव्रीहेरित्येतदपवादतया परत्वादित्यस्यासङ्गतेः निषेधानां विध्युन्मूलकत्वेऽपि बाधकविषयेऽप्रवृत्तेश्च कथमन्यथा

---

[527] प्रियपञ्चानामित्यादेः G1 : अप्रियपञ्चानामित्यादेः F1, G2

[528] नुडनापत्तेः F1 : नूडानापत्तेव G1, G2

आरतुरीत्यादौ गुणनिषेधकस्य ङिति चेत्यस्य ऋच्छत्यृत्तामिति गुणनिषेधकत्वं नेति एवमनो बहुव्रीहेरिति निषेधविषये आरभ्यमाणस्य न उपधेत्यस्य तद्बाधकत्वात्तद्विषये निषेधस्याप्रसङ्ग इति सिद्धान्तासङ्गतिः। इह तु स्त्रियां यत्प्राप्नोति तन्न इत्यर्थकरण-सामर्थ्यान्निषेधस्तस्या अपि इति बोध्यम् ।

**नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥७५॥**

स्पष्टा चेयं भृशादिभ्य इतीति । अत एव "आङो दो नस्यविहरणे " (१-३-२०) इति सूत्रे अनास्य इति पर्युदासः आख्यानस्य समुदायश्चास्य भिन्न आस्य सदृश इति विधिरेव भवति तेन मुखविपादिका व्यादत्ते इत्यात्मनेपदमेवेति प्रदीपोद्योतौ। यत्त्वेतदुद्योमनूद्य तत्र मुखाविपादिकोभयसमवेतविवर्णविशेषस्य उपलक्षितत्वेन प्रतिषेधस्य योग्यत्वादित्याह तच्चिन्त्यम्। विहरणग्रहणाभावे नास्ये इत्येतावतैवास्य भिन्नास्यसदृश समवेतफलजनक [५२९] क्रियावाचकाद्दधातोरात्मनेपदमिति पर्युदासमादाय कैयटोक्तार्थे स्वमुखमादत्ते इत्यादाविव मुखविपादिकेत्यादत्ते इत्यत्राप्यात्मनेपदप्राप्तिः। विहरणग्रहणे तु आस्यग्रहणस्य विहरणस्य विहरणविशेषोपलक्षणत्वात् प्रसज्यप्रतिषेधेनैव व्याख्यानाच्च न भवत्येव अत्र आत्मनेपदमिति वस्तुतु इत्यादिना उद्योत एव स्पष्टमिति दिक्[५३०] । एवञ्च पर्युदासपक्षे विपादिकां व्याददातीत्यत्र आत्मनेपदापत्तेः भाष्योक्तप्रसज्य-प्रतिषेधाश्रयणस्य आवश्यकतया एतत् परिभाषोदाहरणत्वं शुद्धमेवेति विभाव्यम्। जातिलक्षणा ङीष् न स्यादिति कुक्कुट्यादीनामण्डादिष्विति पुम्वद्भावप्रत्याख्यान-प्रकारेण निर्वाहस्तु न अत्र अपक्रीतेत्यादीनां जातिव्यञ्जकत्वाभावात् न च तदभावेऽपि

---

[529] समवेतफलजनक F1 : समेतफलजनक G1, G2

[530] दिक् F1 : दिग् G1, G2

पूर्वस्त्रीत्त्वाविवक्षायामपि समासे स्त्रीत्वविवक्षायामदन्तत्वान्ङीषुत्पत्तौ व्याघ्रयादीनां सिद्धिरिति वाच्यम्। आघ्राणकर्तृत्वमात्रविवक्षायामपि समासे स्त्रीत्वविवक्षायाम् अदन्तत्वान्ङीषुत्पत्तौ व्याघ्रयादीनां सिद्धिरिति वाच्यम्। आघ्राणकर्तृत्वमात्रविवक्षायाम् उक्तरीत्या व्याघ्रीत्यादेः सिद्धावपि यत्र कप्रत्ययोत्पत्तिकाल एव प्रत्ययार्थे स्त्रीत्वविवक्षायां तत्रैतत्परिभाषां विना सिद्धेः न चैवमपि मृगशब्दार्थे एव पूर्वस्त्रीत्वविवक्षया मृग्याः क्षीरमिति विग्रहे मृगक्षीरमिति सिद्धये वार्तिकमावश्यकमिति वाच्यम्। आव्यविकन्यायेन तादृशविग्रहे वृत्त्यभावस्य आकरे स्थितत्वात्। प्रकृते तन्न्यायसंचारस्तु न स्त्रीत्वस्य प्रत्ययार्थविशेषणत्वादिति दिक्। नन्वेवमपि उपजनिष्यमाण-निमित्तोऽप्यपवाद इति न्यायेन दधतीत्यादावदादेश इव व्याघ्रीत्यादेः समासात् पूर्वं ङीषि सुपि ततः समासे सिद्धिः अन्येव न चायं न्यायो निरवकाशविधिविषय इति वाच्यम्। जक्ष्यतीत्यादावदभ्यतादित्यद्विधेश्चारितार्थ्येन निरवकाशत्वाभावादिति चेन्न। माष-वापिणीत्यादौ न्यायविषये समासरूपप्रातिपदिकान्तस्य नस्य णत्वसिद्धयेऽस्याः परिभाषाया आवश्यकत्वादिन्यत्र विस्तरः। न च परिभाषाया अभावे कौम्भकारयोः सिद्धिः स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वात् पूर्वं कारशब्दान्ङीपि ततः सुपि समासे स्त्रीभ्यो ढक्गितिकारीशब्दादेव ढक्स्यात्ततश्च कशब्दाकारे वृद्धिर्न स्यादिति वाच्यम्। स्त्रीप्रत्यये च अनुपसर्जने नेति परिभाषाया तदादिविधिनिषेध स्त्रीप्रत्ययान्तादपि ढक् सिद्धेः।

**गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥७६॥**

प्रागेवेति तथा सति प्रपचतितरामित्यादावामन्तेन सुबुत्पत्त्यनन्तरमपि गतिमतोदात्तवतेति सुप्सुपेति वा समास इति गतिकारकोपपदात् "कृद्" (३-१-९३) इति सूत्रे प्रदीपोद्योतयोः स्पष्टम्। नन्वेवं प्रपचतितरामित्यादौ न **गतिकारकोपपदेति** कृदुत्तरपदप्रकृतिस्वरो न प्राप्नोति कृदन्तोत्तरपदत्वाभावात्तत्पुरुषत्वाभावाच्चेति चेन्न।

"तिङि चोदात्तवति" (८-१-७१) इति सूत्रे तिङीत्यस्य प्रत्याख्याने नोदात्तवति ङामन्ते परे गतेः निघातविधानादिष्टसिद्धेः भाष्यकृताऽभिधानात् सुप्सुपेति समासस्य वैकल्पिकत्वेन तदभावपक्षेनिघातसिद्धयेऽतिङीति प्रत्याख्यानस्यावश्यकत्वाच्च प्रपचतितरामित्यादावो-त्तरपदप्रकृतिस्वरेण उदात्ते निघातेन गतेर्निघात इत्येतत्सिद्धये कृद्ग्रहणं प्रत्याख्यानमिति एतत्परगतिकारकोपेति सूत्रस्य भाष्यं त्वेकदेश्युक्तिः। समासभावपक्षे अनेन अनिर्वाहादिति उद्योते विस्तरः। एतेन यत्तु नव्यतरैः समासभावपक्षाभिप्रायकं "तिङि चोदात्तवति" (८-१-७१) इति सूत्रस्य न्यायमित्युक्तम् तन्न। पचतितरामित्यामन्तेन प्रशब्दस्य समासः सुप्सुपेत्यनेन यद्यपि वैकल्पिकः प्राप्तस्तथापि नित्येन गतिसमासेन तस्य बाधनात् समासाभावस्य तत्राभावादिति परास्तम्। बहुव्रीहिणा तिङन्ताघटितः समास इत्यर्थकस्य अतिङीत्यस्य गतिकारकोपपदानामित्यनुरोधात्कुगतिप्रादय इत्यत्र गत्यन्ते सम्बन्धात्तेन गतिसमासस्य प्रपचतितरामित्यादावव्याप्तेः यत्त्वतिङिति बहुव्रीहिरपि तु तत्पुरुषो लाघवात्ति ङिति प्रत्ययग्रहणे तदन्तग्रहणातत्तद्भिन्नम् अतिङ् पदेनोच्यते तदपि समासस्य विशेषणमतिङन्त भिन्नान्तयोः समास इति स्पष्टम् "उपपदमतिङ्" (२-२-१९) **इति** सूत्रे प्रदीपादाविति प्रपचतितरामित्यादौ गतिसमासो निष्प्रत्यूहः बहुव्रीहौ त्वतिङ्ग्रहणस्यैवमाद्यर्थे सार्थकत्वात्तज्ज्ञापकत्वोक्तिभाष्यकृतामनुपन्ना स्यादिति तच्चिन्त्यम्। "उपपदमतिङ्" (२-२-१९) "तिङि चोदात्तवति" (८-१-७१) **इति** सूत्रभाष्यविरोधापत्तेः तत्र हि अतिङ् किं कारको व्रजति हारको व्रजति अतिङिति प्रतिषेधं शास्ति तज्ज्ञापकतया आचार्योऽनयोः योगयोर्निवृत्तं सुप्सुपेति वर्तते इत्युक्तौव तर्हि सिद्धेसति यद तिङिति प्रतिषेधं शास्ति तज्ज्ञापकत्याचार्योऽनयो र्योगयोर्निवृत्तं सुप्सुपेति किमेतस्य ज्ञापनप्रयोजनगतिकारोकोपपदानामित्येषा परिभाषा न कर्तव्या भवतीत्युक्तम्। त्वदुक्तार्थेऽतिङ्ग्रहणस्य चरितार्थ्यं दुर्लभम्। कारको व्रजतीत्यादौ सति समासे व्रजति शब्दस्य उपपदस्य प्रथमनिर्दिष्टत्वात् पूर्वनिपाते व्रजति कारक इत्यस्य उत्पाद्यसमासस्य

तिङन्तान्तभिन्नत्वात् कृतेनाप्यतिङ्ग्रहणेन अस्यावारणात् न च भाष्यस्य सुप्सुपेत्ये-तत्तृतीयान्तनिवृत्तिमात्रतात्पर्यकत्त्वात् प्रथमान्तवृग्रहणानुवृत्तेः सत्वादुकृप्रयोगे समास-वारणमिति वाच्यन्तर्हि तेनैव तद्वारणे सिद्धे अतिङ्ग्रहणवैयर्थ्येन चारितार्थ्यस्य दुर्निरूप्यत्वात् अतिङ्ग्रहणेन प्रथमान्तसुपदनिवृत्तेरेव ज्ञापयितुं युक्तत्वाच्च। किञ्च किंवृत्तस्य अनधिकारात् किंवृत्तग्रहणानर्थक्यमुपपदसंज्ञार्थन्तर्हि स्यात् उपपदसंज्ञाफलस्य समासस्य तिङ्ग्रहणादप्राप्तेः इत्यनवक्लृप्तस्यमर्षयोरकिंवृत्तेऽपीति सूत्रभाष्यविरोधापत्तिः। न च संभावयामि धर्मं भावाभिन्नन्देतरामित्यादाव किंवृत्तेभवानित्यादेरामन्तेन तिङन्तभिन्नेन समासप्राप्तेः एतादृशप्रयोगाणां विना प्रमाणमनभिधानकल्पनमपेक्ष्य बहुव्रीहिणा तिङन्ताघटितः समास इत्यर्थस्य "उपपदमतिङ्" (२-२-१९) इति सूत्रे उपाध्यायोक्तस्य आश्रयणौचिन्त्यात् । न च समासादुद्देश्यविधेयभावानभिधाने प्रमाणम्। लोहितोजीषा [531] इत्यादौ समासेऽपि तत्प्रतीतेः इत्यन्यत्र विस्तरः। तिङन्तभिन्नं इत्यर्थलाभेऽपि तिङन्तभिन्नान्त इत्यस्यालाभेन [532] तिङन्तान्तभिन्न इत्यस्यार्थलभ्यत्वाभावाच्च बहुव्रीहौत्वित्याद्यपि चिन्त्यम्। "उपपदमतिङ्" (२-२-१९) इति सूत्रसम्बद्धेनैव अतिङ्ग्रहणेन तिङ्घटितसमासव्यावर्तकेन एकदेशानुमत्या- कांशे इव गत्यंशेऽपि तु ज्ञापकत्वात्। न त्वतिङ्ग्रहणस्य योगद्वयशेषत्वं ब्रूमो येन अतिङ्ग्रहणस्य प्रपचतितरामित्यादौ सार्थक्यं स्यादिति शेखरे एवोक्तत्वात् यत्त्वेतत् शेखरमनूद्य तत्र माभूत्तरामित्यत्र समासव्यावृत्तये तिङ्ग्रहणसार्थकस्य एवमपि सत्वात् न चोपपदमित्यत्राप्यतिङित्यस्य सम्बन्धो नास्तीति शक्यते वक्तुं न

---

[531] लोहितोजीषा F1 : लोहितोग्रीषा G1, G2

[532] लाभेन G1, G2 : लोभेन F1

च माङि लुङित्यत्र माङीति सत्यपि सप्तमीनिर्देश तस्योपपदसंज्ञायां फलाभावः इति वाच्यम्। अतिङ्ग्रहणाभावे उक्तप्रयोगे एवोपपदसमासस्योपपदसंज्ञाफलस्य वक्तुं शक्यत्वात्। अतिङिति तत्पुरुष इति सिद्धान्तपक्षे माभूत्तरामित्यत्रोपपदसमासो ह्यीष्यत एवेत्याहुः तच्चिन्त्यम्। माङ उपपदत्वे उपपदमिति महासंज्ञाकरणेन अन्वर्थलाभान्माकदाप्यवर्णभून्माकदाप्यवृत्तिर्भूदित्यादि भाष्यप्रयोगे हि त्रिपदव्यवधानं[533] न माङ्प्रयोगानापत्ते उष्ट्रप्रणाय इत्यादौ तु धातोरुपसर्गद्योत्यार्थविशिष्टक्रियाप्रतीतेः धातोः प्रागुपसर्गप्रयोगमन्तराऽसंभवाद्द्योतकोपसर्गस्य मध्येपाठेऽपि समासस्वीकारः स्वाढ्यंभवं स्वाढ्यंकरणं इत्यादौ सोरुपपदत्वाद्द्योत कत्वाच्च । धातोः प्राक् प्रयोगप्राप्ताविति खलः खित्वसामर्थ्यात् उपपदस्यानुपसर्गस्याप्याढ्यशब्दस्य धातोः प्राक्प्रयोगः अनव्ययस्येति निधेनसौखिलफलासंभवादित्यन्यत् कारको व्रजतीत्यादाव-तिङ्ग्रहणे नोपपदसमासाभावेऽपि क्रियार्थोपपदस्येति तुमुनृण्वुलावित्युपपद-संज्ञाफलस्येवेह तस्य कथञ्चिद्वक्तुमशक्यत्वाच्च तिङ्ग्रहणाभावे प्राप्तस्योपपदसमासस्य अतिङ्ग्रहणेन[534] उपपदसंज्ञाभावेन उपपदसमासवारणे कश्चिद्दोषोस्ति वस्तुतोज्ञापक परभाष्यप्रामाण्यत् कारकोव्रजति तरामित्यादेरिवमामित्यादेः अनभिधानमेवेति तत्त्वम् । एतेनोद्देश्यविधेयभावस्य समासादप्रवृत्तेः। क्रियार्थक्रियायाः समासादनवगमादनभिधान-कल्पनात्वस्मदभिप्रेतत्वम्। पुनर्भक्षितेऽपिलशुने न शान्तोदप्रवृत्तेः क्रियार्थक्रियायाः समासादसमासादुद्देश्यविधेयभावप्रतीतेः अस्मन्मतेऽङ्गीकारेण तदनवगमप्रयुक्तानाभिधाना भावेऽपि ज्ञापकपरभाष्यप्रामाण्यात् अनभिधानस्वीकारादिति संक्षेपः। उपपदमतिङ् इत्यत्रातिङ्ग्रहणात् सुप्सुपेत्यनयोर्निवृत्तावपि उपपदमहासंज्ञाबलादन्वर्थत्वलाभेन

---

[533] त्रिपदव्यवधानम् F1 : त्रिपदाव्यवधानम् G1 : त्रिपादव्यवधानम् G2

[534] अतिङग्रहणेन G1, G2 : तिङग्रहणेन F1

सुवन्तस्यैव उपपदसंज्ञासंविज्ञानाद्राजयुध्वेत्यादौ पूर्वपदेन[535] लोपादयः यत्तु कुम्भकार इत्यादौ कृत्प्रत्ययोत्पत्तेः प्राक् कर्मषष्ठ्याः कर्तुमशक्यद्वितियाश्चापवादविषयत्वाद-प्रवृत्तेः कुम्भेत्यस्योपपदत्वाभावात् कर्मण्यणोऽप्रसङ्गात् अस्मन्मते तु पञ्चकं प्रातिपदिकार्थपक्षे प्रातिपदिकस्यैव कर्मत्वबोधकत्वादुपपदत्वे तन्निबन्धने प्रत्यये कर्मषष्ठ्याः (कुम्भ+ङस्+कार) इति प्रक्रियावाक्ये समास इति तच्चिन्त्यम्। आहरकुम्भं करोति कटमित्यदावसमर्थे कर्मण्यणोऽतिप्रसङ्गवारणाय समर्थवचनं कर्तव्यमिति वार्तिकस्य समर्थपरिभाषोपस्थित्या प्रत्याख्यानाय भाष्यकारेण यावता चेदानीं पदगन्धोऽस्तीत्युक्तोपपदमिति महासंज्ञायाम् अन्वर्थत्वाश्रयणस्य तत्र “उपपदमतिङ्” (२-२-१९) सूत्रभाष्ये बोधनेन प्रत्ययविधौ सुबन्तत्वेन निमित्तताया आश्रयणात्। किञ्च पञ्चकमिति पक्षेऽपि सकलकारकशक्तिमानर्थः समुदायाकारेणैव प्रातिपदिकेनोच्यते न तु विशेष्येति कर्मोपपदत्वं प्रयुक्ताणोऽप्राप्तिः। अन्यथा करणाद्युपपदेऽपि कर्मोपपदप्रसङ्गः वार्तिकस्योक्तिसंभवस्तु “कर्मण्यण्” (३-२-१) इत्यत्र धातोरित्यधिकारेऽपि प्रत्त्यासत्त्यनाश्रयणेन अन्यथा यस्माद्धातोरण् भवति तद्धात्वर्थक्रियाकर्मण्युपपदे इति कर्मवत्कर्मणेति सूत्रभाष्यप्रदर्शितप्रत्त्यासत्त्यान्यथासिद्धेः। एतेन अत एव “उपपदमतिङ्” (२-२-१९) सप्तमीस्थमिति सूत्रे आहर कुम्भं करोति कठमित्यत्र उपपदसंज्ञा संज्ञानिबंधनयोरणा समासवारणायोपपदसंज्ञायां समर्थवचनं कर्तव्यमिति वार्तिककृतोक्तं सङ्गच्छते इत्युपषष्टम्भकमपास्तम्। अस्मन्मते च कृत्प्रकृत्यर्थकर्मत्वसत्त्वेन तदनुत्पत्तावपि भाविकृदन्ततत्वमादाय षष्ठीप्रवृत्तिरिति “उपपदमतिङ्” (२-२-१९) इति सूत्रे उद्द्योते स्पष्टम्। ननु राजदर्शी राजयुध्वेत्यादावुपपदमिति महासंज्ञाबलात् सुबन्तस्यैव उपपदत्वस्वीकारान्नलोपादि

---

[535] पूर्वपदेन F1 : पूर्वपदे G1, G2

सिद्धावपि गतिसमासविधायके सुप्सुपेत्यस्य निवृत्तौ पदान्तत्वाभावान्निर्गतः संयन्तेत्यादौ रत्वानुस्वारयोरनापत्तिः। प्राटित्यादौ पररूपापत्तिश्चेति चेन्न। कुत्सिते इति सूत्रभाष्यप्रामाण्यात् शब्दान्तरसम्बधात्पूर्वं[536] निसृशब्दादेः सुबुत्पत्तौ लुकि च पदत्वोत्तरपदान्तरसम्बन्धेन समासे सति दोषाभावादिति "उपपदमतिङ्" (२-२-१९) इति सूत्रे शब्दरत्ने स्पष्टम्। उक्तप्रकारेण तु उपपदसमासेन निर्वाहः इति स्पष्टमेव। एतेन अतिङ्ग्रहणं ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति भाष्योक्तिस्तु सुप्सुपेति पदद्वयनिवृत्तितात्पर्यिका सुपेत्यस्य निवृत्तिं गमयति। सुवित्येतावत्त्वनुवर्तते एवेऽति व्याख्याता यथाश्रुतव्याख्यानेत्वेन योर्योगयोरिति भाष्यात्पूर्वसूत्रेऽपि पदद्वयनिवृत्तौ तिरोभूयेत्यादे रुत्वादि न स्यादित्य पास्तमिति दिक्।

**साम्प्रतिकाभावे भूतपूर्वगतिः॥ ७७॥**

नमस्करोति देवानिति ननु "नमः स्वस्ति...." (२-३-१६) इति सूत्रे स्वरत्यादि साहचर्यात्स्वरादिपठितस्यैव नमशब्दस्य ग्रहणात् साक्षात् प्रभृत्यूर्याद्यिन्यतरगणपठितस्य नमशब्दयोगे द्वितीयैव भवति गतिसंज्ञकस्य सहनमशब्दस्योपसर्गद्योतकतया कृञ एव प्रणत्यर्थकत्वेन कर्मणि द्वितीयेत्यस्य प्रवृत्तेः उपपदविभक्तेरित्यस्य नात्रोपयोग इति चेत्। अत्राहुः कुतोऽध्यागच्छति गाः स्वामी व्रजति नमस्यति देवानित्याद्यर्थम् आवश्यिक्यानया नमः करोति देवान्मुनित्रयं नमस्कृत्येत्यादेः अपि सिद्ध्या संकोच साहचर्यपरिभाषायाः फलाभावेनानादरः। अत एव अवतरणे नमस्यति देवानित्यप्युक्तमिति केचित्तु नमस्वस्तीत्यत्र साहचर्यपरिभाषाप्रवृत्तौ रावणाय नमस्कुर्या (रा.व) इति भट्टिप्रयोगे द्वितीयाप्रसङ्गः। न च सत्त्वार्थकस्य स्वरादिपठितस्यैव अयं प्रयोग इति वाच्यम्।

---

[536] शब्दान्तरसम्बधात्पूर्वम् F1 : शब्दस्यन्तरपूर्वम् G1, G2

**नमस्पुरसोर्गत्योरिति** सत्वाभावप्रसङ्गात् नमः [५३७] स्वस्तीत्यनेन चतुर्थीति जयमङ्गलव्याख्यानुरोधात् सविसर्गपाठकल्पनेऽपि स्वयंभुवे नमस्कृत्य इत्यत्र समासस्यानापत्तिः परिहारा न च रावणमनुकूलयितुं स्वयंभुवमनुकूलयितुम् इत्यर्थकल्पनया क्रियार्थोपपदस्येति चतुर्थीति वाच्यम्। तया बोधाविवक्षायां दोषस्योद्भटत्वादित्याहुः तदपरे न क्षमन्ते। तथा अर्थविवक्षायां चतुर्थ्युपपत्तेः अथ अपि अभावादिति उपपदविभक्तेः कारकविभक्तिर्बलीयसी क्रियान्वयित्वादिति यत्तु क्रियान्तरान्वयानपेक्षक्रिया क्रियान्वय्यर्थप्रयोज्यविभक्तेः कारकविभक्तित्वेन विवक्षितत्त्वात्। गोषुदुह्यमानासु गत इत्यादौ च तथात्वाभावात्। अत एव अन्तरङ्गन्यायमूलैव-मित्युपाध्यायाः। क्रियान्वयं विना पदार्थप्रतीतेरभावेन पदान्तरान्वयस्य ततः पूर्व वक्तुमशक्यत्वात्। तन्निमित्तोपपदविभक्तेः उपजीविकत्वेन दौर्बल्यमप्यस्या मूलम् क्वचित् वृत्तिघटकपदस्य नैरर्थक्यात्तन्निमित्तकविभक्तेरप्रसङ्गोऽपि तथा यथा नमस्यति देवानि-त्यादौ भाष्ये चतुर्थ्यापादानशंका तु पूर्वपक्षिणस्तदज्ञानादिति नमोवरिव इत्यादिसूत्रस्थ-भाष्यविरोधो नास्तीति तच्चिन्त्यम्। एतादृशविवक्षाया भाष्याद्यनुग्रहाभावेन अप्रामाणिक-त्वात्। किञ्च क्रियान्तरान्वयानपेक्ष्यत्वं क्रियान्वय्यर्थान्वयि नाद्यः। ओदनं भुक्ता व्रजतीत्यादावोदनमिति द्वितीयाविभक्तेः कारकविभक्तित्वेनपि ते द्वितीयाया व्रजनक्रियान्वयाः अनपेक्षभजिक्रियान्वयिकर्मत्वरूपार्थप्रयोज्यविभक्तित्वात्। नान्त्यः गोषु दुह्यमानासु गत इत्यादौ गोष्विति सप्तम्याः कारकविभक्तित्वापत्तेः। सप्तम्या गमिक्रियानपेक्ष्यो गोदोहनक्रियान्वय्याश्रयत्वलक्षणस्तत्प्रयोज्यविभक्तित्वात् क्रियान्वयं विनापि पदाच्छक्तिग्रहत्वेऽर्थोपस्थितेश्च प्रत्येकं क्रियान्वयपदे सत्त्वासत्त्वेऽपि विशिष्टक्रियान्वय इति वादे त्वादेः पदार्थान्वयस्य क्रियान्वयात्प्राक् वक्तुं शक्यत्वाच्च

---

[537] नमः F1 : नमो G1, G2

नमस्यति देवानित्यादौ प्रथमं नमशब्दस्य अनर्थकत्वात् चतुर्थीनिर्वाहायमुण्डयतो मुण्डस्येव नमशब्दस्य अपि अर्थवत्त्वाभिप्रायेण अथ वा।

**उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ १०३ ॥**

इति चतुर्थीवारणपर नमोवरिवश्चित्रङ् क्यजिति सूत्रभाष्यविरोधस्यावारणाच्चेति दिक्।

**अन्त्यविकारे अन्त्यसदेशस्य ॥ १०४ ॥**

**प्रधानाप्रधानयोः प्रधाने कार्यसंग्रहः ॥ १०५ ॥**

भाष्यकैयटयोरिति। अत एव श्लाघन्हुङ्स्थाशपां ज्ञीप्स्यमानपदेन प्रधानभूतण्यर्थग्रहणमेतन्यायात् स नः स्वारस्येन समर्थेच्छाविषयत्वाविशेषाद्विषयक-ज्ञानानुकूलव्यापारः[538] तस्य प्रकृत्यर्थकर्मणोऽपि ग्रहणम्। अन्यथा ज्ञाप्यमान इत्येव वदेत् इति सिद्धान्तमञ्जूषायां विस्तरः। यत्तु ज्ञाप्यमानत्वाभावेऽपि ज्ञापनेच्छासद्भावमात्रेण चतुर्थीप्रयोगस्येष्टत्वात्सनः सार्थक्यात् "अन्तर्धौ येनादर्शनम् इच्छति" (१-४-२८) इत्यत्र अदर्शनेच्छायां सत्त्यपि दर्शने पञ्चम्यर्थेकेच्छतिग्रहणवदिति तच्चिन्त्यम्। ज्ञाप्यमानत्वाभावश्च ज्ञापनविषयभावः स किं ज्ञापनाभावप्रयुक्तः नाद्यः जिगमिषतीत्यत्रेव ज्ञीप्स्यमान [539] इत्यत्र सनर्थे इच्छायाः प्रकृत्यर्थे निरूपितशाब्दप्राधान्येऽपि गमने[540] इव प्रकृत्यर्थभूतेण्यन्तार्थे ज्ञापने उद्देश्यत्वलक्षणार्थप्राधान्यसत्त्वेन तदभावस्य वक्तुमशक्यत्वात्। अत एव न द्वितीयोऽपि तत्सत्त्वेन तद्विषयस्य अवश्यभावात्

---

538 कूलव्यापारः G1, G2 : कुलव्यापारः F1

539 ज्ञीप्स्यमान F1 : जीप्स्यमान G1, G2

540 गमने F1 : गमनेन G1, G2

अन्यथा ग्रामं ग्रामाय जिगमिषतीत्यादौ गमनेच्छासद्भावमात्रेण स न उत्पत्तावपि ग्रामस्य गमिकर्मत्वाय गम्यमानत्वाभावेन द्वितीयाचतुर्थ्योरिनापत्रौ गमेज्यात् कर्मइषेः उभेकर्मणी इति सन्सूत्रस्थभाष्यविरोधापत्तिः। किञ्च ऊनैतद्भाष्यप्रामाण्यात् सकर्मकधातोः प्रकृत्यर्थविषयत्वाभावे तदर्थमात्रेच्छायां सनोऽनिष्टिरेव दृष्टान्ते इच्छतिग्रहणसत्त्वेन तद्वैषम्याच्चेति प्राहुः। अन्येत्विच्छाविषयत्वस्य ज्ञानविषयत्वं व्याप्यत्वाज्ज्ञानविषयत्त्वावश्यकत्वेन तदर्थतया तदनुकूलव्यापाररूपज्ञापनस्य अवश्यं भावात्तद्विषयत्वाभावोऽसंभवी। अत एव तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति। यज्ञेन दानेन तपसा नाशकेनेति श्रुतौ यज्ञादीनां प्रकृत्यर्थविद्यासाधनत्वं तस्यार्थ-प्राधान्यान्नेच्छासाधनत्वमित्युक्तं वेदान्तिभिरित्याहुः। यदपि घटश्च पटश्च अस्मिन् भूतले इत्यादौ परमन्तरङ्गमपि द्वन्द्वं बाधित्वानेन न्यायेन प्रधानकार्यत्वात् बहुव्रीहिमाशंक्यानभिधानेन वारणमाह[541]। तदपि चिन्त्यम्। त्रिकतः शेष इति भाष्य प्रतिपादितप्रथमान्तत्वेऽपि समानाधिकरणानां बहुव्रीहिवचनादन्यत्र तस्य प्राप्तयभावादन-भिधाकनां वैयर्थ्यात् न च सामानाधिकरण्यं समानविभक्तिकत्वमात्रं तच्चेहास्ति। अत एवोच्चैर्मुखो वा दृषदप्रिय इत्यादौ वृत्तिविषये[542] उच्चैरादिशब्दस्योच्चैः कल्पमित्याद्यनुरोधाच्छक्तिमत्परत्वादुक्तं सामानधिकरण्यमक्षतम्। वा दृषदप्रिय इत्यादौ वा दृषदोः परस्परं निरुक्तसामानाधिकरण्याभावेऽपि प्रियशब्देन तयोः सामानाधिकरण्यात् बहुव्रीहिः पञ्च भुक्तवन्तोऽस्येत्यादौ तु गमकत्वाभावाद्बहुव्रीह्यभाव इति "अनेकमन्यपदार्थे" (२-२-२४) इति सूत्रे भाष्ये स्पष्टम्। यदपि वृत्तिविग्रहयोः समानार्थबहुव्रीहौ पञ्चविधेऽपि इति प्रतीकमुपादाय व्याख्यानपरे कर्मकरणसम्प्रदानाधिकरणरूपे इति शब्दरत्नग्रन्थे

---

[541] वारणमाह G1, G2 : वारणामाह F1

[542] वृत्तिविषये G1, G2 : वृत्तिविषय F1

कर्तुरसंग्रहेण न्यूनतापत्तिः[५४३] दोषोद्भावनम्। तदपि चिन्त्यम्। षष्ठ्यर्थे इति पदस्वारस्ये न कर्मादिपदानां तत्तदर्थक द्वितीयादिविभक्तिपरतया दोषवशाभावात् नन्वेवमपि सिद्धान्ते कथं वृत्तिग्रहयोः समानार्थत्वमिति चेन्न।

चित्राभिन्नगोसम्बन्धीत्येव बोधसत्वाच्च वृत्त्यर्थप्राप्तोदक इत्यादावपि वृत्तिविग्रहः उभयोरपि प्राप्ताभिन्नोदककर्मण्येव बोध्यविशेष्ये उदके तन्निरूपकत्वबाधेऽपि विशेषणीभूत-प्राप्तौ तन्यर्थवसानं खुर्गोध्वस्त इतिवत् शाब्दबोधस्तु विशिष्टे तदारोपणोपपाद्यः। अन्यथा प्राप्तभार्य इत्यादौ वृत्तिघटकपदयोः एकविशेष्यकप्रतीतिः अनेकत्वलक्षणा-सामानाधिकरण्या भावात्पुम्वद्भावे न स्यात्। न अस्यश्चोक्तसामानाधिकरण्या-भावाद्बहुव्रीहिरिति शेखरे स्पष्टम्। अत एव “तद्वहति रथयुगप्रासङ्गम्” (४-४-७६) इति सूत्रे भाष्ये तस्येदमित्येव सिद्धे इदं व्यर्थमित्याशंक्य वहति वोढेति शब्दयोर्भेद इत्यर्थः। अर्थसामान्यादित्यस्य वृत्त्यर्थो यदारोपो वहतीत्युक्तं तत्र शब्दभेदादित्यस्य क्रियाप्रधानककर्तुप्रधानयोर्वहति वोढेति शब्दयोर्भेद इत्यर्थः। अर्थसामान्यादित्यस्य वृत्यर्थोयदारोपि वहतीत्यत्र विशेष्यविशेषणमपि तद्वहनकर्तेत्येवार्थ इत्यर्थः। एवं “कालाः परिमाणितः” (२-२-५) इति सूत्र भाष्येऽपि स्फुटमिदम्। अत एव आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदेशकम्। गुणप्रधानभावस्य तत्र दृष्टान्तविपर्ययः इति हरिरप्यन्यत्र विस्तरः। एतेन उक्तशेखरमनूद्य सोपस्थानोपालम्भः जहत्स्वार्थायां वृत्तौ वृत्तिघटकपटानां सामानाधिकरण्यस्य क्वापि वक्तुं शक्यत्वात्। अजहत्स्वार्थायां वृत्तौ तु स्वार्थविशिष्टान्तरा-पसंक्रमात्सवत्रैव वृत्तौ तदस्तीति व्यावर्त्यालाभाद्विग्रहवाक्योपपदनां सामानाधिकरण्यं

---

[543] न्यूनतापत्तिः F1 : न्यूतापत्तिः G1, G2

वृत्तिघटकपदेष्वारोप्य दोषस्य सुपरिहरत्वादित्यपास्तम्। वृत्तेर्जहत्स्वार्थत्यागाभावात्। अजहत्स्वार्थायां वृत्तौ त्वदुक्तरीत्या सामानाधिकरण्यसत्वाच्च पुम्वद्भावनिर्वाह-विग्रहवाक्योपपदसामानाधिकरण्यस्य वृत्तिष्वारोपे प्रयोजनाभावात्, न च अजहत्स्वार्था-वृत्तिरितिपक्षे दर्शनीयामातेत्यादौ वृत्तौ सामानाधिकरण्यसत्त्वेन पुम्वद्भावः कस्मान्न भवति दर्शनीयमातेति। अथ मतमेतत् प्राक् सामानाधिकरण्यं तत्र प्रवृत्तेर्दोषाभावात्। अस्तु वा त्वदुक्तरीत्या प्राप्तभार्य इत्यादौ पुम्वद्भावसाधनंप्राप्तोदक इत्यादौ वृत्तिविग्रहयोः समानार्थकत्त्वन्तुदुसमानविशेष्यकत्वमेव समासार्थत्वमिति तु वक्तुमशक्यम्। यत्कर्मक कत्रभिन्नकमिति विग्रहार्थस्वोदककर्तृकप्राप्तिकर्मेति कृत्यर्थस्य त्वया स्वीकारेण समानविशेष्यकत्वाभावादिति दिक्।

**अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ १०७ ॥**

**श्रूतानुमितयोः श्रुतसम्बन्धो बलीयान्॥ ११३ ॥**

**अभेदका गुणाः ॥ ११८ ॥**

किं भेदकाः गुणाः विधेयाण्विषये त्विति यत्त्वेतदादिनिर्देश इत्यन्तमनूद्य-दूषणाभिधानमप्तृन्निति तृन्तृचोर्ऋकारेऽन्तरतमा दीर्घासिद्ध्यापत्तेः। बहुवचने झल्येदित्यत्राप्येवमिति तच्चिन्त्यम्। त्रैस्वर्याभावरूपैकैकश्रुत्या सूत्राणां कैयटमते पाठादच्संज्ञायामुदात्तादे रहित एव सत्त्वेन तत्रैव दीर्घसंज्ञायाः अपि जायमानत्वेन [544] अन्तरतमदीर्घादिसिद्धेः बहुवचने झल्येदित्यत्राप्येवमेव अत एव वधादेशादावाद्युदात्तनिपै तनापादयत्नाद्विवक्षासिद्धिः । नह्येतदर्थं गुणानां भेदकत्वपक्षाश्रयणस्यावश्यकता अत

---

[544] जायमानत्वेन : जायमानत्त्वेण F1, G1, G2

एव द्यौर्विमलद्यौरित्यादौ अन्तरतमउददात्तवृद्धिसिद्धिः वस्तुतस्त्रैस्वर्येण पाठपक्षेऽपि दीर्घवृद्ध्यादिसंज्ञाया भाव्यमानत्वान्न दोषः अप्रत्ययपदेन तत्तद्रूपेण विधीयमानप्रत्यये एव निषेधेन तदकदेशानुमत्या बोध्यमानभाव्यमानेति परिभाषयापि तत्तद्रूपेणोपादान एव निषेधात्। अतएव इको गुण इतीग्ग्रहणाभावे जनेर्नस्य आन्तरतम्यादकारोऽनुनासिकः प्राप्नोतीत्युक्तं भाष्ये। किञ्चाक्षरसमाम्नाये यत्किञ्चिद्ग्रहणविशिष्टस्य पाठे सावर्ण्यात्तद्भिन्नगुणकस्यापि ग्रहणम्। न चोदात्तादिगणभेदेन सावर्ण्याभावः[५४५]। उदात्तत्वादीनां बाह्यत्वेन तद्भेदेऽपि सावर्ण्यसत्त्वात् बहुवचने झल्येदित्यादौ त्वन्यपक्षे "अ अ" (८-४-६७) इति सूत्रस्थभाष्योक्तरीत्या एकशेषेणव सिद्धेः यद्यप्यण्ग्रहणाननु-वृत्तिपक्षेऽणि चरितार्थेन तपरसूत्रेण अणुसु परत्वादणुदित्सूत्रबाध इति भेदकत्वपक्षो-पष्टंभकत्वेन उपन्यस्तं भाष्यं तदप्येकदेश्युक्तम्। भेदकपक्षाश्रयणे फलाभावात्[५४६]। यदपि यत्त्वभेदकत्वपक्षे तपरसूत्रस्य अनवकाशत्वात् सवर्णग्रहणबाधकत्वमभिधाय तत्रैव पक्षे नियमार्थमित्युक्तं शेखरे तद्व्याहतमिति तन्न युक्तम्। गुणानां भेदकत्वपक्षे परत्वात् बाधमभिधाय गुणानां भेदकत्वे पुनरपि वैयर्थ्येन गुणानामभेदकस्यत्वन-वकाशत्वाद्बाधः इत्युक्तं क्वेदानीं व्याहतिरिति शब्देन्दुशेखरदोषोद्धारे स्पष्टीकृतम् अस्माभिरित्यलम्। बाधकान्येव निपातनानि ननु द्यौर्विमलद्यौः प्रदोष इत्यादौ णित्त्वे वृद्धिरान्तरतम्या उदात्ताद्यनुदात्ताश्चेष्यन्ते न तु तत्रोपत्तिः बृद्धिशब्देन हयैज् प्रत्याय्यत्ते स च आचार्येणाक्षरसमाम्नाये यत्किञ्चिद्गुणकः पठित इति तेनैव प्रवर्तितव्यम्। नन्वितरगुणकेनापि न च तेन सवर्णानां ग्रहणादभिमतार्थसिद्धिः उदात्तादिजनयन्न आभ्यन्तरकार्यकारित्वेन अभ्यन्तरत्वात्तद्भेदे सार्वर्ण्यस्यैवाभावादत आह अभेदका

---

545 सावर्ण्याभावः G1, G2 : सवर्ण्याभावः F1

546 फलाभावात् F1 : फलभावात् G1, G2

उदात्तादयः स्वशब्दोच्चारणं विना भेदेन नविवक्षिता इत्यर्थः। अत्र च ज्ञापकमस्थिदधिसक्थ्यक्ष्णामनङुदात्त एवोच्चारणीये उदात्तग्रहणम् एतदपि प्रत्त्यासत्त्या शास्त्रे उच्चारितो यो गुणस्तद्विषयेऽपीति लौकिके प्रयोगे गुणोभेदकः अतएव एषां सावर्ण्यानुपयोगित्वान्तरतम्य परीक्षोपयोगित्व साम्याद्भाष्यानुक्तानामपि बाह्यप्रयत्नेषु परिगणनं कैयटप्रभृतिभिः उररीकृतम्। स्पष्टं चेदं तुल्यास्यसूत्रे भाष्ये। नन्वेवं घटवानित्यत्र मतोर्मस्य आन्तरतम्यादनुनासिकवकारः स्यात्। लोकेऽपि पण्डेनापि कृते चौर्यसंजातकेशोऽसौ प्रत्यभिज्ञाय निगृह्यते अत एव यूस्त्राख्यौ इत्यादावनणत्वेपि तत्तद्गुणकेकारादित्यग्रहणमत आहा भेदका उदात्तादयः "अणुदितसवर्णनस्य चाप्रत्ययः" (१-१-६८) सूत्रेऽजुदिदिति वक्तव्येऽण् ग्रहणमिह ज्ञापकम्। तद्धित अपि अन्तेत्यत्र अनुनासिक उपकारस्य प ग्रहणाद्द्वित्वार्थगुणानाम-भेदकत्वे निरर्थकं स्यादिति "वृद्धिरेचि" (६-१-८५) सूत्र कौस्तुभे स्पष्टम्। अणग्रहणप्रत्याख्यानपक्षे तु अज्ञापको बोद्धयः। अत एव च न सर्वाद्युदात्तनिपातनं करिष्यते वधादेशे आद्युदात्तनिपातनं करिष्यते इत्यादि तत्र तत्र भाष्यकृतः एतेन भाव्यमानेन सवर्णानां ग्रहणं नेति परिभाषया सर्वणग्रहणप्राप्तस्य जातिग्रहणप्राप्तस्य च निषेध इव गुणाभेदकत्वप्राप्तस्यापि निषेधस्तेन घटवदित्यादौ नानुनासिको वकार इति शब्देन्दुशेखरादौ प्रतिष्ठितः। सिद्धान्तप्रत्युक्तः अप्तृन्निति तृन्तृचोर्ऋकारेऽन्तर-तमदीर्घासिद्ध्यापत्तेः। "बहुवचने झल्येत्" (७-१-१०३) इत्यत्राप्येवम्। न चान्तरतम-विधाने इष्टापत्तिः। नामे वृक्षेभ्यो हरिकेशेभ्य इत्युदात्तानुदात्तयोः एकारयोः श्रवकार प्रसङ्गात्। न च अनुदात्त एव सर्वत्र विधीयतां वृक्षेभ्य इत्यत्र तु तस्मिन्विहिते पुनः प्रातिपदिकान्तोदात्तत्त्वेनेष्टसिद्धिरिति वाच्यम्। लक्ष्ये लक्षणस्य इति न्यायविरोधात् विकारान्यानुपूर्व्यैक्येतत्प्रवृत्तेस्त्वयैव सिद्धान्तिततत्वात् तत्र भेदकत्वाश्रयणादेव इष्टसिद्धिः वक्तव्या। तथाहि "इको गुणवृद्धी" (१-१-३) इत्यत्रेग्ग्रहणाभावे जनेर्नस्यान्तर-

तम्यादकारोऽनुनासिकः प्राप्नोतीति भाष्ये उक्तमिति दिक्। अत एव "तपरस्तत्कालस्य" (१-१-६९) सूत्रे अणग्रहणाननुवृत्तावनणि तपरे चारितार्थ्येन समकालग्रहणेन अण्सु परत्वात्सवर्णग्रहणं बाध्यत इत्युक्तं भाष्ये। यत्त्वभेदकत्वपक्षेतपरसूत्रस्य अनवकाशत्वात् सवर्णग्रहणबाधकत्वमभिधाय तत्रैकपक्षे नियमार्थमित्युक्तं "तपरस्तत्कालस्य" (१-१-६९) सूत्रे शेखरे तद्व्याहतं स्पष्टमेव। अनयोश्च पक्षयोः लक्ष्यानुरोधाद्व्यवस्था। अत एव ऊँ आदेशः स्थानिवत्त्वान्मय उञ् इति प्रकृतिभावापवादभूते आन्तरतम्यादननुासिके वकारे किम्वितीति रूपं मनोरमायां प्रतिपादिनत स्पष्टञ्चेदं एतत्सूत्रे भाष्यकैयटयोः ।

**इति श्रीमता वैयाकरणकुलतिलकेन मन्नुदेवेन प्रणीते दोषोद्धारणेति परिभाषेन्दु-शेखरव्याख्याने शास्त्रशेषनामकमिति तृतीयं प्रकरणं समाप्तम्॥**

**इति श्रीमन्मन्नुदेवविरचिता परिभाषेन्दुशेखरटीका समाप्ता॥**

# उपसंहारः

"ब्राह्मी तु भारती भाषा गीः वाक् वाणी सरस्वती"[५४७] इति रचानानुसारं संस्कृत भाषासाक्षात् सरस्वतीरूपा। यदि संस्कृतभाषारूपा शब्दः संसारे न प्रयुज्यते। तर्हि संम्पूर्णम् इदं जगत् तमसा अविभूतं भवेत्। तदिदमाह-

इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारे न दीप्यते॥[५४८] इति॥

---

547 Amrkae;> 1£1£6

548 kaVyadzR> 1£4

अत्र शब्दपदेन व्याकरणशास्त्रं परिलक्ष्यते। व्याकरणं न केवलं भावशुद्धिसाधनमेव। अपि तु शब्दब्रह्मशोधकं शब्दब्रह्मावाप्तिसाधनं च वर्तते। अत एव ऋग्वेदे वर्ण्यते यद् यो वाक्तत्त्वं सर्वथा पश्यति , वाक्तत्त्वमपि तस्मै स्वीयं प्रकटयति -

उत त्वं पश्यन् न ददर्श वाचम्। उत त्वः श्रृण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे। जायेव पत्य उशती सुवासाः[५४९] ॥ इति ॥

अत एव भर्तृहरिणापि शब्दसंस्कारस्य शब्दब्रह्मप्राप्तिसाधनत्वेन निरूप्यते-

तस्माद् यः शब्दसंस्कारः। सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते[५५०] ॥ इति ॥

अत एव व्याकरणमिदं वेदाङ्गत्वेन परिगणितमस्ति। तत्रापि त्रिमुनिव्याकरणमिति प्रसिद्धम् पाणिनीयव्याकरणं प्रमखस्थानं भजते। पाणिनीयसूत्राणि षट्प्रकारकाणि भवन्ति। कानिचित् संज्ञारूपाणि, कानिचित् परिभाषारूपाणि, कतिचन च विधिरूपाणि कानिचित् पुनः नियामकानि भवन्ति। अतिदेशात्मकान्यपि कतिचन भवन्ति, तथैव च अधिकाररूपाण्यपि सूत्राणि भवन्ति।

तेषु परिभाषा सूत्राणाः किमपि वैशिष्ट्यमस्ति। परिभाषा नाम अनियमे नियमकारिणि। अर्थात् अनियमे नियमकारकं परिभाषासूत्रं भवति। तदुक्तं भगवता पतञ्जलिना –

"परिभाषा पुनरेकदेशस्था (सती)
सर्वं शास्त्रमभिज्वलयति प्रदीपवत्॥"[५५१] इति ॥

---

549 \Gved 10.71.4

550 vaKypdIym! 1.133

551 mha-a:y %*aetm! £2.1.1

"परितो भाष्यतेऽनया" [५५२] इति व्युत्पत्त्या "परिभाषा" शब्दः व्युत्पन्नः। श्री नागेशभट्टो व्याकरणमहाभाष्ये उद्योतटीकायां वदति-

"एकदेशस्थिता शास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते॥" [५५३] इति॥

काशिकादिग्रन्थेषु "अनियमे नियमकारिणी परिभाषा" इति लक्षणमुपलभ्यते। विधिसंज्ञादि सूत्राणां प्रवृत्तौ अव्याप्ति-अतिव्याप्ति-असम्भवादि दोषनिवारणं परिभाषाणां प्रमुखं लक्ष्यमस्ति।

यत्र साधुशब्दानामनुशासने साहाय्यमपेक्ष्यते वा, तत्रैव परिभाषाणामाश्रयणं विधीयते। यत्र परिभाषाया आश्रयणे दोषस्तत्र परिभाषा आश्रयणं न विधीयते। यथा यत्र लवणप्रयोगेण कार्यं सिध्यति तत्र लवणमेव प्रयुज्यते। यथा सूपशाकादिषु। किन्तु यत्र शर्कराया कार्यं सिध्यति तत्र शर्करैव प्रयुज्यते। अतो अनित्यत्वादपि परिभाषा व्याकरणशास्त्रे शब्दाननुशासयितुमतीवोपकारिक्यः सहायिकाश्च भवन्ति।

अतः व्याकरणशास्त्रे परिभाषाः अतिमुख्यं स्थानं वहन्ति लक्ष्यनिर्वहणे। तदधिकृत्य बहुभिः व्याकरणशास्त्रे कृतभूरिपरिश्रमैः वैयाकरणार्णवैः बहवः ग्रन्थाः आरचिताः। तत्र त्रिमुनिहृदयप्रदर्शकेषु परिभाषाग्रन्थेषु अद्वितीयः भवति अयं परिभाषेन्दुशेखरः। परिभाषेन्दुशेखरद्वारा परिभाषाणां स्वरूपं सुष्ठु प्रकाशितम्। प्रक्रियाप्रदर्शनवेलायां पाणिनिसूत्राणाम् अनियतप्रसक्तौ सञ्जातायां तां निराकृत्य नियमकारीणि परिभाषावचनानि। शब्दसाधुत्वनिरूपणे सूत्रार्थनिर्णये च आसां परिभाषाणामनिवार्यस्थानमस्ति। ताः एताः परिभाषाः काश्चित् पाणिनिना साक्षात् कण्ठरवेण प्रोक्ताः। काश्चिच्च स्वनिर्देशादिभिः लिङ्गैः ज्ञापिताः। काश्चिच्च लोकन्यायसिद्धाः सन्ति।

---

[552] kaizka Vol£1£ 72-73p

[553] mha-a:y %*aetm! £2.1.1

तासु ज्ञापकन्यायसिद्धानां परिभाषाणां व्याख्यानरूपतया अयं परिभाषेन्दुशेखरग्रन्थः नागेशेन प्रणीतः। तत्र ग्रन्थादौ प्राचीनव्याकरणतन्त्रे वाचनिकानि। अत्र पाणिनीये ज्ञापकन्यायसिद्धानि। भाष्यवार्त्तिकयोः उपनिबद्धानि यानि परिभाषा रूपाणि तानि व्याख्यायन्ते इति प्रतिज्ञातम्। का परिभाषा कुत्र प्रवर्तते? कुत्र न अत्र किं प्रमाणम्? इत्यादयः अंशाः सुष्ठु प्रतिपादिताः। शास्त्रत्वसम्पादकभबाधबीजकथनशास्त्रशेषनामके प्रकरणत्रये १३३ परिभाषाः व्याख्याताः। प्राचीनैः लक्ष्यसाधकत्वेन अङ्गीकृतानां कासाञ्चित् परिभाषाणां भाष्याशयविरुद्धत्वं प्रतिपाद्य ताः परिभाषाः नागेशेन खण्डिताः। तत्साध्यलक्ष्याणाञ्च प्रकारान्तरेण साधनञ्च तत्रैव निरूपितम्। अस्मिन् ग्रन्थे त्रीणि प्रकरणानि सन्ति। यथा शास्त्रत्वसम्पादकं प्रथमम्, बाधबीजकथनं द्वितीयम् , शेषार्थकथनं तृतीयम्।

तमिमम् परिभाषेन्दुशेखरं व्याख्यातुं बहवः प्रयतन्ते स्म। तेषां सूची अपि मया प्रबन्धेऽस्मिन् न्यवेशि । तेषु व्याख्याकारेषु मन्नुदेवः अन्यतमः। अनेन दोषोद्धारः इति व्याख्यानं परिभाषेन्दुशेखरस्य रचितम् । तदिदम् अप्रकाशितं व्याख्यानं अवलम्ब्य प्रवृत्तेऽस्मिन् शोधप्रबन्धे अध्यायः चतुष्टयं न्यबन्धि मया।

तत्र प्रथमाध्याये संस्कृतव्याकरणशास्त्रस्य वैशिष्ट्यम् ,व्याकरणशास्त्रस्य प्रयोजनम्, व्याकरणशास्त्रस्य वेदमूलकत्वम्, नवव्याकरणसंक्षिप्तपरिचयः , पाणिनिसूत्राणां प्राशस्त्यम्, पाणिनीयव्याकरणे नागेशस्य स्थानम्, नागेशपूर्ववर्तिपरिभाषाग्रन्थकर्तारः इत्यादयः विषयाः न्यवेशिष्यत।

द्वितीयाध्याये सूत्रस्य स्वरूपम्, सूत्रं षड्विधम्, परिभाषाशब्दस्य अर्थः, परिभाषाणां मूलम्, प्राचीनानि परिभाषासूत्राणि, परिभाषाणां लक्ष्यम् , परिभाषेन्दुशेखरस्य वैशिष्ट्यम्, परिभाषेन्दुशेखरस्य प्रकरणत्रयम्, परिभाषेन्दुशेखरव्याख्यानपरम्परा विमर्शः, मन्नुदेवप्रणीतदोषोद्धारव्याख्यानस्य वैशिष्ट्यम्, मन्नुदेवस्य परिचयः ,मन्नुदेवस्य वंशवृक्षः इत्यादयः न्यरूपयिष्यत। एवं अत्र प्रकृतव्याख्यायाः मातृकाणां विवरणमपि व्यधायि।

तृतीयाध्याये  मन्नुदेवेन समर्थितानां परिभाषाणां विवरणम् ,नागेशेन प्रतिपादिताः विद्यमानाः परिभाषाः ,व्याख्यानरहिताः परिभाषाः , विमर्शनविषयरहिताः परिभाषाः  इति इत्येषां परिचयः प्रादर्शि।

चतुर्थाध्याये परिभाषेन्दुशेखरव्याख्यानस्य दोषोद्धारस्य पाठसमीक्षापूर्वं सम्पादनम् अकारि मया। एवं अनुबन्धवर्गे प्रकृतशोधप्रबन्धे उपयुक्तानां सूत्राणां, वार्तिकानां, ग्रन्थानां च सूची न्यवेशि।

# अनुबन्धः - 1

## शोधप्रबन्धे उपयुक्तानाम्  अष्टाध्यायीसूत्राणां सूची

अ अ  (8-4-068)

अकः सवर्णे दीर्घः  (6-1-97)

अङ्गस्य (6-4-1)

अचः परस्मिन्पूर्वविधौ  (1-1-057)

अचश्च  (1-2-028)

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ  (6-4-077)

अचो रहाभ्यां द्वे  (8-4-046)

अट्कुप्वाङ्नुम्व्यवायेऽपि  (8-4-2)

अणुदित्सवर्णस्य चाप्रत्ययः (1-1-68)

अत आदेः  (7-4-070)

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य (8£3£46)

अतो भिस ऐस्  (7-1-009)

अदसो मात् (1-1-012)

अदसोऽसेर्दादु दो मः  (8-2-080)

अदेङ् गुणः (1£1£2),

अधीगर्थदयेशां कर्मणि  (2-3-052)

अनचि च  (8-4-047)

अनुपसर्जनात्  (4-1-014)

अनेकमन्यपदार्थे   (2-2-024)

अनेकाल्शित्सर्वस्य (1-1-055)

अन्तर्धौ येनादर्शनमिच्छति   (1-4-028)

अपादने पञ्चमी   (2£3£28)

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्  (6-4-011)

अमि पूर्वः  (6-1-107)

अर्वणस्त्रसावनञः  (6-4-127)

अलुगुत्तरपदे  (6-3-001)

अल्लोपोऽनः  (6-4-134)

अव्यक्तानुकरणस्यात इतौ  (6-1-098)

असिद्धवदत्राभात्   (6-4-022)

अस्य च्वौ   (7-4-032)

आकडारादेका संज्ञा (1-4-1)

आङो दोऽनास्यविहरणे (1-3-020)

आत औ णलः (7-1-034)

आतोऽनुपसर्गे कः (3£2£3)

आदेः परस्य ( 1£1£53)

आदेशप्रत्यययोः (8-3-059)

आद्गुणः ( 6-1-84)

आप्ज्ञप्यृधामीत् (7-4-055)

आने मुक् (7-2-082)

आन्महतः समानाधिकरणजातीययोः (6-3-046)

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2)

इको गुणवृद्धी (1-1-003)

इको यणचि (6£1£74)

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (6-1-127)

इग्यणः सम्प्रसारणम् (1-1-045)

इट ईटि (8-2-028)

इतश्च (3-4-100)

इदुदुपधस्य चाप्रत्ययस्य (8-3-041)

ई हल्यघोः (6-4-113)

उणादयो बहुलम् (3-3-001)

उदः स्थास्तम्भोः पूर्वस्य (8-4-061)

उपपदमतिङ् (2-2-019)

उपसर्गादृति धातौ (6-1-091)

उपसर्जनं पूर्वम् (2-2-030)

उरण् रपरः (1-1-051)

उरत् (7-4-066)

ऊदुपधाया गोहः (6-4-089)

ॠच्छत्यॄताम् (7-4-011)

ॠत इद्धातोः (7-1-100)

ओतो गार्ग्यस्य (8£3£20)

कडाराः कर्मधारये (2-2-38)

कमेर्णिङ् (3-1-030)

करणाधि करणयोश्च (3£3£117)

कर्मण्यण् (3£2£1)

कार्मस्ताच्छील्ये (6-4-172)

कालाः परिमाणिना (2-2-005)

कालाध्वनोरत्यन्तसंयोगे (2-3-005)

काश्यादिभ्यष्ठञ्ञिठौ (4-2-116)

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः (5-3-002)

किमः कः (7£2£103)

कु तिहोः (7£2£104)

कुमार श्रमणादिभिः (2£1£69)

कृत्तद्धितसमासाश्च ( 1-2-46)

कृदतिङ् (3-1-093)

केऽणः (7-4-013)

क्वाति (7£2£105)

क्ङिति च (1-1-005)

क्तक्तवतू निष्ठा (1-1-026)

खरवसानयोर्विसर्जनीयः  (8-3-015)

गदमदचरयमश्चानुपसर्गे (3£1£100)

गर्तोत्तरपदाच्छः   (4-2-137)

गाङ् लिटि  (2-4-049)

गुरोश्च हलः (3-3-103)

गोत्रेऽलुगचि  (4-1-089)

गोस्त्रियोरुपसर्जनस्य  (1-2-048)

ग्रहोऽलिटि दीर्घः  (7-2-037)

घसिभसोर्हलि च  (6-4-100)

ङमो ह्रस्वादचि ङमुण्णिनित्यम् 8£3£32

ङे प्रथमयोरम्   (7-1-028)

ङेर्यः  (7-1-013)

ङ्याप्प्रातिपदिकात्  (4-1-001)

चार्थे द्वन्द्वः  (2-2-029)

च्छ्वोः शूडनुनासिके च  (6-4-019)

जराया जरसन्यतरस्याम् (7-2-10)

झोऽन्तः (7-1-3)

टाबृचि (4-1-009)

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने (1-3-067)

णो नः (6-1-065)

ण्वुल्तृचौ (3-1-133)

तदोः सः सावनन्त्ययोः (7-2-106)

तद्धितार्थोत्तरपदसमाहारे च (2-1-051)

तद्वहति रथयुगप्रसङ्गम् (4-4-076)

तपरस्तत्कालस्य (1-1-070)

तरप्तमपौ घः (1-1-022)

तस्थस्थमिपान्तान्तन्तामः (3-4-101)

तस्मादित्युत्युत्तरस्य (1£1£66)

तस्मिन्निति निर्दिष्टे पूर्वस्य (1£1£65)

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ (5-2-024)

तस्य लोपः (1-3-009)

तस्यापत्यम् (4£1£92)

तिङि चोदात्तवति  (8-1-071)

तिङ्ङतिङः  (8-1-028)

तितुत्रतथसिसुसरकसेषु च  (7-2-009)

ति विंशतेर्डिति  (6-4-142)

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्  (1-2-063)

तीषसहलुभरुषरिषः  (7-2-048)

तुरिष्ठेमेयःसु  (6-4-154)

तुल्यास्यप्रयत्नं सवर्णम् 1-1-009

तुश्छन्दसि  (5-3-059)

तृज्वत् क्रोष्टुः  (7-1-95)

तृतीयासप्तम्योर्बहुलम्  (2-4-084)

तृषिमृीषकृशेः काश्यपस्य (1£2£25)

तेन प्रोक्तम्  (4-3-101)

त्यदादीनामः (7£2£102)

दामहायनान्ताच्च (4-1-27)

दीर्घोऽकितः  (7-4-083)

द्वन्द्वे च  (1-1-031)

द्विर्वचने चि   (1-1-58)

धातोस्तन्निमित्तस्यैव   (6-1-77)

न ङिसंबुद्ध्योः  (8-2-008)

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु (1£1£47)

नपुंसकाच्च   (7-1-019)

न पूजनात्  (5-4-069)

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च  (2-3-016)

न मु ने च८-२-३फ

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्  (7-3-003)

नलोपः सुप्स्वर संज्ञातुग्विधिषु कृति (8-2-2 )

न ल्यपि  (6-4-069)

न वेति विभाषा  (1-1-044)

नामि  (6-4-003)

नेड्वशि कृति  (7-2-008)

पक्षात्तिः  (5-2-025)

पदान्तस्य (8-4-36)

पुंयोगादाख्यायाम् (4-1-048)

पूर्वत्रासिद्धम् (8-2-1)

प्रत्यभिवादेऽशूद्रे (8-2-083)

प्रत्ययलोपे प्रत्ययलक्षणम् (1-1-61)

प्रथमयोः पूर्वसवर्णः (6-1-102)

बहुलं छन्दसि (7-1-103)

ब्राह्मोऽजातौ (6-4-171)

भस्य (6-4-129 )

भावे (3£3£18)

भृञामित् (7-4-076)

भोभगोअघोअपूर्वस्य योऽशि (8-3-017)

मतोश्च बह्वजङ्गात् (4-2-072)

मिदचोऽन्त्यात्परः (1-1-047)

मिदेर्गुणः (7-3-082)

यञिञोश्च (4-1-101)

युवा  खलतिपलितवलितजरतीभिः (2£1£66)

युवोरनाकौ  (7-1-001)

यूनस्तिः  (4-1-077)

यू स्त्र्याख्यौ नदी    (1-4-003)

येन विधिस्तदन्तस्य (1-1-72)

रदाभ्यां निष्टातो नः पूर्वस्य च दः    य8-2-42)

रषाभ्यां नो णः समानपदे  (8.4.1)

रात्सस्य (8-2-24 )

रो रि  (8-3-014)

रोः सुपि  (8-3-016)

लुक्तद्धितलुकि  (1-2-049)

लुटः प्रथमस्य डारौरसः  (2-4-085)

लुपि युवद् व्यक्तिवचने (1-2-51)

लोपो व्योर्वलि  (6-1-066)

वनो र च  (4-1-007)

वर्णो वर्णेन   (2-1-069)

वर्तमाने लट् (3-2-123)

वान्तो यि प्रत्यये (6-1-76 )

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः (3-1-070)

वामि (1-4-005)

वासरूपोऽस्त्रियाम् (3-1-094)

va suPyaipzle> (6£1£89)

वाह ऊठ् (6-4-132)

विपराभ्यां जेः (1-3-19)

ivàit;exe pr< kayRm! (1£4£2)

विभाषा ङिश्योः (6-4-136)

विसर्जनीयस्य सः (8-3-034)

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतङ्गम

प्रगदिन्वराहकुमुदादिभ्यः (4-2-080)

वृद्धिरादैच् (1£1£1)

वृद्धिरेचि (6-1-088)

वेरपृक्तस्य (6-1-067)

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (8£2£36)

शमिता यज्ञे   (6-4-054)

शेषाद्विभाषा  (5-4-154)

शेषे प्रथमः (1-4-108)

शेषे लोपः  (7-2-090)

शेषो बहुव्रीहिः   (2-2-023)

श्वयुवमघोनामतद्धिते (6£4£133)

षड्भ्यो लुक् (7-1-22)

षत्वतुकोरसिद्धः  (6-1-086)

षष्ठी स्थाने योगा  (1-1-049)

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे  (6-1-013)

संख्याव्ययादेर्ङीप् (4-1-26)

समासान्ताः  (5-4-068)

सर्वत्र लोहितादिकतन्तेभ्यः  (4-1-018)

ससजुषो रुः   (8-2-066)

साक्षात्प्रभृतीनि च  (1-4-074)

साक्षाद्द्रष्टरि संज्ञायाम्   (5-2-091)

सार्वधातुकमपित् च1-2-4)

सुपि च (7-3-102)

सुप्तिङन्तं पदम् (1-4-014)

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् (6£3£33)

स्थानिवदेशोऽनल्विधौ (1-1-55)

स्थानेऽन्तरतमः 1-1-050

स्यतासी लृलुटोः (3-1-033)

स्वरितेनाधिकारः (1-3-11)

हलः (6-4-002)

हलन्त्यम् (1£3£3)

हलश्च (3-3-121)

हलि सर्वेषाम् (8-3-022)

हुझल्भ्यो हेर्धिः (6-4-101)

ह्रस्वः (7-4-059)

## अनुबन्धः – 3

# शोधप्रबन्धे उपयुक्तानां ग्रन्थानां सूची

## संस्कृतग्रन्थाः


१. अनुसन्धानस्य प्रविधि-प्रक्रिया - डॉ. हर्षनाथमिश्र,
राष्ट्रिय संस्कृत संस्थानम्,
नई दिल्ली,२०१०

२. अमरकोषः - अमर सिंह,
चौखम्बा संस्कृत सीरीज्,
वाराणसी, १९३८

३. ऋग्वेदः - डॉ. जीयालाल कम्बोज,
विद्यानिधि प्रकाशनम्,
दिल्ली, २००५

४. काव्यप्रकाश (नागेश्वरीटीका) - श्रीहरिशङ्करशर्मा,
चौखम्बा प्रकाशन,

वाराणसी, २००७

५. काव्यादर्शः - वि. नारायण आयार्
वि. रामस्वामी शास्त्रुलु
एण्ड् सनस्
मद्रास्, १९३०

६. काशिका - विद्वद्वरवामनजयादित्य,
चौखम्बा संस्कृत सीरिज्
आफिस्,
वाराणसी – १९५२

७. नागेशगूढार्थदीपिका - पण्डितराज पेरी वेङ्कटेश्वरशास्त्रि ,
आन्ध्रविश्वकलापरिषत्
राजमहेन्द्रनगरी, १९५५

८. निरुक्तम् - यास्काचार्यः, मेहर्चन्द
लच्छमनदास, दिल्ली – १९८२

९. परिभाषेन्दुशेखरः - वैद्यनाथ पायगुण्डे,
(गदाव्याख्यासहितः) आनन्दश्राममुद्राणलय,
पुणे, महाराष्ट्र, १९१३

१०. परिभाषेन्दुशेखरः - पण्डितकालिकाप्रसादशुक्लः,
(हैमवतीव्याख्या) सम्पूर्णानन्दसंस्कृतविश्वविद्यालय,
वाराणसी, १९९१

११. पाणिनीयशब्दानुशासनम् - सत्यानन्दवेदवागीशः,
भगवती लेजर प्रिंट्स्,
नई दिल्ली,
२०६० वि०स

१२. पाणिनीय शिक्षा - गोस्वामी प्रह्लाद गिरिः,
चौखम्बा संस्कृत सीरीज्,
वाराणसी, २००४

१३. बृहद् धातुकुसुमाकरः - प० हरेकान्त मिश्रः,

चौखम्बा संस्कृत प्रतिष्ठानम्,

दिल्ली,२००३

१४. बृहद् शब्दकुसुमाकरः - प० हरेकान्त मिश्रः,

चौखम्बा संस्कृत प्रतिष्ठानम्,

दिल्ली,१९९९

१५. महाभाष्य दीपिका - चौखम्बा अमरभारती प्रकाशन,

वाराणसी, १९९७

१६. महाभाष्यम्(१-६ खण्ड) - महर्षिः पतञ्जलिः,

(प्रदीप-उद्योतव्याख्याद्वयसहितम्) चौखम्बा संस्कृत प्रतिष्ठानम्,

दिल्ली,

१७. महाभाष्यप्रदीपव्याख्या - फ्रेन्च् इन्स्टीट्युट्, पाण्डिच्चेरी,

(Vol i-x) १९७३-१९८३

१८. मनुस्मृतिः - शिवराज आचार्य कोण्डिन्नायन,

(१ एवं २ भागः) चौखम्बा विद्याभवन,
वाराणसी, २००७

१९. यजुर्वेदः - प.ईश्वरचन्द्र ,
परिमल पब्लिकेशन्स,
दिल्ली- २००४

२०. रामायणम् - श्रनिवासशास्त्रि एवं सातकोडि
(१-७ काण्ड) मुखोपाध्याय,परिमल पव्लिकेशन्,
दिल्ली, २००१

२१. लघुशब्देन्दुशेखरः (१ भाग) - नागेशभट्टः
चौखम्भा संस्कृतसंस्थानम्,

२२. वाक्यपदीयम् - डाँ मण्डनमिश्रः,
वाराणसी, १९९८

२३. वाक्यपदीयम् - वैयाकरणवृद्धः भर्तृहरिः,
संपूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी– १९८०

२४. वैदिकवाङ्मयस्येतिहासः - डॉ जगदिशचन्द्र मिश्रः,

चौखम्भा सुरभारती प्रकाशनम्

वाराणसी, २००२

२५. वैयाकरणप्रबन्धमुक्तावली – डा० अशोकचन्द्रगौडशास्त्री,

नाग् पब्लिशर्स्,

दिल्ली , २००५

२६. वैयाकरणसिद्धान्तकौमुदी – वैयाकरणार्णवः भट्टोजिदीक्षितः,

(१–४ भागः सम्पूर्णम्) मोतीलाल् बनारसीदास्, दिल्ली

२७. वैयाकरणसिद्धान्तकौमुदी - डॉ. नर्वदेश्वर तिवारी,

(सम्पूर्ण–मूलपाठ) भारतीय विद्या प्रकाशनम्,

दिल्ली , २००५

२८. वैयाकरणसिद्धान्तलघुमञ्जूषा – सभापतिशर्मा उपाध्याय,

चौखम्बा संस्कृत संस्थान,

वाराणसी, २००६

२९. संस्कृतनिबन्धशतकम् - कपिलदेव द्विवेदी,

विश्वविद्यालय प्रकाशनम्,

वाराणसी, २००२

३०. सारस्वती-सुषमा- - डॉ० हरिश्चन्द्र त्रिपाठी,

वैभवोन्मीलनम् संपूर्णानन्दसंस्कृतविश्वविद्यालय,

वाराणसी,२००४

<u>हिन्दी ग्रन्थाः</u>


१. ऋग्वेदभाष्य भूमिका – डाँ. श्रीकान्त पाण्डये, भारतीय विद्या प्रकाशन, दिल्ली, १९८५।

२. परिभाषेन्दुशेखरः (दुर्गाव्याख्या) – डाँ० हर्षनाथ मिश्रः, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, १९८७

३. परिभाषेन्दुशेखरः (सुबोधिनी) – आचार्य विश्वनाथ मिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००९

४. परिभाषेन्दुशेखरः – डाँ० पर्णदत्त सिंह, इन्दु प्रकाशन, वाराणसी,१९८७ ।

५. भाषाविज्ञान - डाँ० कर्णसिंह, साहित्यभण्डार, मेरठ, २००२।

६. वैदिकसाहित्य का इतिहास - पारसनाथ द्विवेदी चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५।

७. वैयाकरणसिद्धान्तकौमुदी (१-२ भाग) - श्रीगोपालदत्तपाण्डे, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००३।

८. संस्कृत् व्याकरणशास्त्र् का इतिहास् (१-२ भाग) - पण्डित युधिष्ठिर मीमांसकः, रामकपुरलालट्रष्ट्, बहालगढ, सोनीपत्, हरियाणा, सं०२०४१।

९. सर्वदर्शनसंग्रह - डाँ० उमाशंकरशर्मा ऋषि, चौखम्बा विद्या भवन, वाराणसी, २००८

१०. हिन्दी निरुक्त - डाँ० कपिलदेवशास्त्रि एवं

डाँ० श्रीकान्त पाण्डये,

साहित्यभण्डार, मेरठ,२०००

## ENGLISH BOOKS

1. A.B.Keith - A History of Sanskrit Literature, MLBD, Delhi, 1993.

2. Dr. K.C. Dash - Methodology in Sanskrit, 2009.

3. Dr. M.Srimanarayana Murty - Research Methodology in Indological Research, ORI , S.V.University, Tirupati , 1991.

4. Dr.R.S Shivaganesha Murty - Introduction to Manuscriptology, Sharada Publishing House, New Delhi,1996

5. F.Kielhorn - Paribhasendusekhara of Nagoji bhatta, (Text, English translation

& notes), Parimal Publ. 1985

6. George Cardona - Panini, his work and its Tradition, MLBD, Delhi, 1988.

7. Kapil kappur - Dimensions of Panini Grammar, The Indian Grammatical System, D.K.Printworld(p)ltd, New Delhi,2007

8. K.Maheswaran Nair - Manuscriptology, Swantham Books, Trivandrum-16,1998.

9. Koroda Subramanyam - Theories of language, Oriental and accidental, D.K.Printworld(p) ltd, New Delhi,2005.

10.L.Bloomfield - Language,Pub. Heeny Holt andCompany, New York,1954

11. Lokmani Dahal - A History Of Sanskrit Grammar, Bharatiya Vidya Prakasan, Delhi,1990

12. Madhukar M.Patkar - History of lexicography, Munshiram Monoharlal Publ. Pvt ltd, Delhi, 1981.

13.Maheswaranant Karandikar and Shailaja Karandikar - Bhattikavyam, MLBD, Delhi 1982.

14. Niladri sekhar Das - Language Corpora and Applied linguistic, Sahitya samsad, Kolkatta, 2007.

15. Pandya , Vijay - Sanskrit texual criticism, Parshav Publication, Ahemedabad, 2001.

16. Prof. Gaurinath Sastri - A history of Vedic literature, Sanskrit pustak bhandar, Kolkatta,1985.

17. Prof.R.Basu & K.Das - Aspects of manuscriptology, The Asiatic Society, Kolkatta,2005.

18. Prof. Srinirudha Dash - New Lights on Manuscriptology, S.S.E.S, Madras, 2004.

19.P.Visalakshy - The fundamentals of Manuscriptology, Dravidian linguistics Association, 2003.

20. S.D.Joshi - Panini as a variationist, CASS, University of Pune, 1980.

## DICTIONARY

1. Ramswarup Rasikesh : Adarsh Hindi-Sanskrit Kosh, Chakhamba Vidya Bhavan, Varanasi-2007.

2. Sir Monier Williams : The Sanskrit – English Dictionary, Indica Books, Varanasi-1996.

3.V.S. Apte : Sanskrit-Hindi Kosh, New Bharatiya Book Corporation, Delhi-2009.

4. V.S. APTE : The Practical Sanskrit-English Dictionary, Nag Publisher, New Delhi- 1989.

## ENCYCLOPEDIA

1. -------------- : Encyclopedia of Indian Philosophy, Volume-5 (Philosophy of Grammar)

# CATALOUGES

1. Raghavan, V.Kunjanniraja, Veezinathan N : New Catalouges Cataloguram, University of madras, Vol- VI & XI- 1983.

2. Prof. Srinirudha Dash : New Catalouges Cataloguram, University of madras Vol-xix, xviii- 2007.

3. Descriptive catalogue of Sanskrit Manuscripts, Volume- III, Govt. Oriental Manuscript Library, Madras-1906

# शोधलेखसूची


१. अनुसन्धानपद्धतिः – डॉ. भागीरथप्रसादत्रिपाठी,

सारस्वती सुषमा,

सम्पूर्णानन्द संस्कृतविश्वविद्यालयः,

वाराणसी, २३ वर्षाङ्कः, १५१–१९०

२. पाणिनिव्याकरणे सूत्रसमीक्षा – प्रो. बाँकेलालमिश्रः

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी, ५८ वर्षाङ्कः, ३– ४

पृष्ठाङ्कः, २१९ – २२८

३. पाणिनीयव्याकरणे परिभाषा – श्रीति. गो. अनन्तसुब्रह्मण्यम्,

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी, ३५. वर्षाङ्कः, १-२,

पृष्ठाङ्कः ,७८-८१

४. पणिनीयव्याकरणस्य महत्त्वं - डाँ. आदित्यनाथभट्टाचार्यः,

महनीयत्वञ्च

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी, ५५. वर्षाङ्कः, १-४

पृष्ठाङ्कः, २२३-२३६

५. पाणिनीयं व्याकरणं भाषाविज्ञानं च- डाँ. रामप्रसादत्रिपाठी,

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी ,२७ वर्षाङ्कः १

पृष्ठाङ्कः, १-६

६. वेदानामपौरुषेयत्वम् - डाँ. देवेन्द्रनाथत्रिपाठी,

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी, ४७ वर्षाङ्कः ३-४, पृष्ठाङ्क,

२२५-२३४

७. व्याकरणस्वरूपम् - श्रीकालिकाप्रसादशुक्लः,

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी २.२ वर्षाङ्कः १ पृष्ठाङ्कः,

१३-२८ ।

८. संस्कृतपाण्डुलिपीनां संरक्षणे पण्डितानामवदानम् - डॉ. गयाचरणत्रिपाठी,

सारस्वती सुषमा,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,

वाराणसी, ४२ वर्षाङ्कः, १-२

पृष्ठाङ्कः ,१ - १२

9. Manuscriptology : A Great - Heritage of Indian Culture — Dr. C.Palaiah & D. K. Das, Bhavans Journal, Bharatiya Vidya Bhavan, Mumbai, Vol-56 , No.8, 2009 Pg - 44-47

10. Preparing and Publishing Sanskrit Texts : Yesterday, Today and Tomorrow - Ramkrishna Bhattacahrya, The Asiatic society, Kolkatta, Vol- LI, No.4, 2009, Pg-1-12